संस्कृत व्याख्या—प्रमाणतः—प्रमाणानुसारतः, ब्राह्मणस्य—विप्रस्य, दण्डः—यष्टिः, केशान्तिकः—केशान्तः प्रमाणमस्येति, केशपर्यन्तः; क्षत्रियस्य, ललाटसम्मितः—ललाटेन सम्मितः, मस्तकपर्यन्तः; विशः—वैश्यस्य, तु, नासान्तिकः—नासिकान्तः प्रमाणमस्येति, नासिकापर्यन्तः; स्यात्—भवेत्।

विशेष—दण्ड की लम्बाई में अन्तर वर्ण परिचय मात्र की दृष्टि से किया गया था।

दण्ड स्वरूप विधान—

ऋजवस्ते तु सर्वे स्युरव्रणाः सौम्यदर्शनाः।
अनुद्वेगकरा नृणां सत्वचोऽनग्निदूषिताः ॥४७॥

अन्वय—ते सर्वे तु ऋजवः, अव्रणाः, सौम्यदर्शनाः, नृणाम् अनुद्वेगकराः, सत्वचः, अनग्निदूषिताः स्युः।

शब्दार्थ—अव्रणाः—बिना कटे-फटे, सौम्यदर्शनाः—सुदर्शन, अनुद्वेगकराः—शान्त, सत्वचः—छाल से युक्त।

हिन्दी अर्थ—ब्रह्मचारियों के वे सभी दण्ड सीधे, बिना कटे हुए, देखने में सुन्दर, मनुष्यों के लिए भय न उत्पन्न करने वाले, छाल से युक्त और बिना जले हुए होने चाहिए।

संस्कृत व्याख्या—ते सर्वे तु—प्रोक्ताः सकलाः दण्डाः, ऋजवः—सरलाः, अव्रणाः—अक्षताः, सौम्यदर्शनाः—शोभनाकाराः अभयप्रदाः इत्यर्थः, नृणां—जनानां, अनुद्वेगकराः—उद्वेगं न कुर्वन्ति ये ते, सत्वचः—वल्कलेन सहिताः, अनग्निदूषिताः—न अग्निना दूषिताः, अदग्धाः; स्युः—भवेयुः।

विशेष—दण्ड के इस आकार-प्रकार का समर्थन सूत्र ग्रन्थ इन शब्दों में करते हैं—

'अपीडिता यूपवक्राः सशल्काः इति'।

—गौतम धर्मसूत्र

भिक्षा विधान—

प्रतिगृह्येप्सितं दण्डमुपस्थाय च भास्करम्।
प्रदक्षिणं परीत्याग्नि चरेद् भैक्षं यथाविधि ॥४८॥

अन्वय—(ब्रह्मचारी) ईप्सितं दण्डं प्रतिगृह्य, भास्करं उपस्थाय, अग्निं प्रदक्षिणं परीत्य च यथाविधि भैक्षं चरेत्।

शब्दार्थ—भास्करं—सूर्य को, उपस्थाय—उपासना करके, परीत्य—चारों ओर घूम करके।

हिन्दी अर्थ—ब्रह्मचारी अपने वर्ण एवं शास्त्र के अनुरूप ईप्सित दण्ड को ग्रहण कर, सूर्याभिमुख खड़े होकर, प्रदक्षिणा विधि से अग्नि की परिक्रमा सम्पन्न कर, शास्त्रोक्त विधिपूर्वक भिक्षाचरण करे।

संस्कृत व्याख्या—(ब्रह्मचारी), ईप्सितं—इष्टं, दण्डं—यष्टिकां, प्रतिगृह्य—धारयित्वा, भास्करं—आदित्यं, उपस्थाय—वैदिकमन्त्रपूर्वकं स्थित्वा, अग्निं—पावकं, प्रदक्षिणं—परिक्रमां, परीत्य—सम्पाद्य, यथाविधि—शास्त्रसम्मतं, भैक्षं—भिक्षावृत्तिं, चरेत्—कुर्यात्।

विशेष—उपस्थाय—देवताओं का पूजन-अर्चन जीवन तथा प्रकाश की प्रशस्ति के लिए सर्वोत्तम उपाय था।

यथाविधि—आगे बताए गए नियमों के अनुसार। प्रस्तुत स्थल पर केवल उपनयन संस्कार सम्बन्धी भिक्षाविधि कही है। सामान्य अथवा नित्य भिक्षाविधि मनुस्मृति, २.१८३-१८४ में वर्णित होगी।

भिक्षा विधि—

भवत्पूर्वं चरेद् भैक्षमुपनीतो द्विजोत्तमः।
भवन्मध्यं तु राजन्यो वैश्यस्तु भवदुत्तरम् ॥४९॥

अन्वय—उपनीतः द्विजोत्तमः भवत्पूर्वं भैक्षं चरेत्, राजन्यः तु भवन्मध्यं, वैश्यः तु भवदुत्तरम् (भैक्षं चरेत्)।

शब्दार्थ—उपवीतः—यज्ञोपवीत से युक्त, भवत्पूर्वं—भवत् शब्द का पूर्व में प्रयोग करके।

हिन्दी अर्थ—यज्ञोपवीत संस्कार सम्पन्न ब्राह्मण ब्रह्मचारी 'भवत्' शब्द का उच्चारण वाक्य के पूर्व भाग में—'भवति भिक्षां देहि', क्षत्रिय ब्रह्मचारी 'भवत्' शब्द का उच्चारण वाक्य के मध्य भाग में 'भिक्षां भवति देहि' तथा वैश्य ब्रह्मचारी भवत् शब्द का उच्चारण वाक्य के अन्त भाग में 'भिक्षां देहि भवति' करके भिक्षा याचना करे।

संस्कृत व्याख्या—उपनीतः—यज्ञोपवीतेन संस्कृतः, द्विजोत्तमः—ब्राह्मणवटुः, भवत्पूर्वं—भवच्छब्दः पूर्वं यस्मिन् तत् 'भवति भिक्षां देहीति' रूपेण भवच्छब्दं वचनाग्रमुच्चार्य; राजन्यः तु, भवन्मध्यं—भवच्छब्दः मध्ये यस्मिन् तत्, 'भिक्षां भवति देहीति' रूपेण भवच्छब्दं वचनमध्यमुच्चार्य; वैश्यः तु, भवदुत्तरं—भवच्छब्दः उत्तरे अन्ते यस्मिन् तत्, 'भिक्षां देहि भवतीति' रूपेण भवच्छब्दं वचनान्तमुच्चार्य; भैक्षं चरेत्—भिक्षाम् आचरेत्।

विशेष—भैक्षम्—भिक्षाचरण द्वारा विद्यार्थी के मन पर यह अङ्कित करने का प्रयास किया जाता था कि ब्रह्मचर्य आश्रम में पारिवारिक प्रतिष्ठा का कोई

महत्व नहीं, सब समान हैं और प्रत्येक को निरभिमानी भाव से समाज पर आश्रित रह कर, धन-सम्पत्ति के प्रति निर्लोभी रह कर, विद्यार्जन करना है। यह प्राचीन परम्परा उपनयन संस्कार में आज भी सम्पन्न होती है।

भिक्षा की ग्राह्यता—

मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम्।
भिक्षेत भिक्षां प्रथमं या चैनं नावमानयेत् ॥५०॥

अन्वय—प्रथमं निजां मातरं वा स्वसारं वा मातुः भगिनीं वा या च एनं न अवमानयेत् भिक्षां भिक्षेत।

शब्दार्थ—स्वसारं—बहिन, भगिनीं—बहिन, अवमानयेत्—अपमान करे।

हिन्दी अर्थ—ब्रह्मचारी सर्वप्रथम अपनी माँ से, बहिन से, माँ की बहिन अर्थात् मौसी से अथवा जो उसका अपमान न करे, उससे भिक्षा माँगे।

संस्कृत व्याख्या—ब्रह्मचारी, प्रथमं—आदौ, निजां—स्वकीयां, मातरं—जननीं, वा, स्वसारं—भगिनीं, वा, मातुः भगिनीं—जनन्याः सहोदरां, वा, या च एनं—ब्रह्मचारिणं, न, अवमानयेत्—प्रत्याख्यानेन तिरस्कारयेत्, भिक्षां भिक्षेत—भिक्षाचरणं कुर्यात्।

विशेष—भिक्षाम्—प्रथम भिक्षा स्त्री से माँगे। स्त्री से भिक्षा याचना करते समय 'भवत्' शब्द के स्त्रीलिंग सम्बोधन का एकवचन रूप 'भवति' प्रयोग करना चाहिए। एक शंका है कि स्त्रियाँ संस्कृत भाषा से अनभिज्ञ होती हैं, अतः उन्हें संस्कृत शब्दों से सम्बोधित करना व्यर्थ है। इसका समाधान यह है कि स्त्रियाँ अपभ्रंश शब्दों का प्रयोग तो करती ही हैं, इन शुद्ध शब्दों से अशुद्ध शब्द का सादृश्य होने के कारण शुद्ध शब्दों से अर्थ ग्रहण कर ही लेती हैं।

गुरुकुल में भिक्षा माँगना निषिद्ध है किन्तु पिता के आचार्य होने पर, आचार्य-पत्नी अर्थात् स्वमाता तथा अन्य स्त्रियों से भिक्षा माँगी जा सकती है।

अवमानयेत्—भिक्षाचरण में तिरस्कार के फलस्वरूप सत्कार्यों से उत्पन्न गुण, यज्ञादि से उत्पन्न पुण्य, सन्तान, पशु, आध्यात्मिक यश आदि का नाश हो जाता है। —धर्मशास्त्र का इतिहास, काणे, भाग १

भिक्षा उपयोग—

समाहृत्य तु तद् भैक्षं यावदन्नममायया।
निवेद्य गुरवेऽश्नीयादाचम्य प्राङ्मुखः शुचिः ॥५१॥

अन्वय—तद् भैक्षं तु समाहृत्य, यावदन्नम् अमायया गुरवे निवेद्य, (पश्चात् तदाज्ञया) आचम्य, शुचिः प्राङ्मुखः अश्नीयात्।

शब्दार्थ—समाहृत्य—एकत्र करके, अमायया—लोभ रहित भाव से, प्राङ्मुखः—पूर्वाभिमुख होकर, अश्नीयात्—खाए।

हिन्दी अर्थ—उस भिक्षा में मिले हुए यथावश्यक अन्न को लाकर, निष्कपट भाव से गुरु के प्रति निवेदित कर, (गुरु की आज्ञा पाकर) आचमन कर, शुचितापूर्वक पूर्वाभिमुख होकर खाए।

संस्कृत व्याख्या—तद् भैक्षं—भिक्षायाः समूहं, तु, समाहृत्य—आनीय, यावदन्नं—तृप्तिमात्रोचितं भोज्यपदार्थं, अमायया—निष्कपटभावेन (उत्कृष्ट-पदार्थान्गोपयित्वा निकृष्टपदार्थानर्पयित्वा), गुरवे—आचार्यं प्रति, निवेद्य—समर्प्य, आचम्य—उपस्पृश्य, शुचिः—पवित्रः सन्, प्राङ्मुखः—पूर्वाभिमुखः, अश्नीयात्—भुञ्जीत।

विशेष—तद् भैक्षम्—तद् पद सामीप्य सम्बन्ध से उस (नित्य) भिक्षा का द्योतक है, इस (उपनयनकालिक) भिक्षा का नहीं। भैक्ष भोजन उपनयन का अंग नहीं है। उपनयन के विषय में गृह्यसूत्रों में नियम है—'अनुप्रवचनीयं श्रपयेत्'—माँगे हुए भोजन को माणवक पकाए (खाए नहीं)। हल्के भोजन के पश्चात् उपनयन किया जाता था, शेष दिन कुछ खाने का विधान नहीं था—'तिष्ठेदहःशेषम्'।

गुरवे निवेद्य—भिक्षाचरण केवल अपनी उदरपूर्ति के लिए नहीं, गुरु तथा गुरुपरिवार के भरण-पोषण के लिए भी आवश्यक था।

बालक भिक्षा ला कर गुरु को देता है, कहता है, 'यह भिक्षा है।' गुरु ग्रहण करता है, 'यह अच्छी भिक्षा है'—'तत्समाहृत्याचार्याय प्राह भैक्षमिदमिति। तत्सुभैक्ष-मितीतरः प्रतिगृह्णाति'—बौधायन गृह्यसूत्र, २.५.५२, ५३।

शुचिः—पवित्रता के लिए आचमन के पश्चात् अपवित्र स्थान गमन, चांडाल दर्शन आदि निषिद्ध हैं।

काम्य भोजन फल—

आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः।
श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते ह्युदङ्मुखः ॥५२॥

अन्वय—प्राङ्मुखः आयुष्यं भुङ्क्ते, दक्षिणामुखः यशस्यं (भुङ्क्ते,) प्रत्यङ्मुखः श्रियं भुङ्क्ते, उदङ्मुखः हि ऋतं भुङ्क्ते।

शब्दार्थ—भुङ्क्ते—भोग करता है, प्रत्यङ्मुखः—पश्चिमाभिमुख, उदङ्मुखः—उत्तराभिमुख।

हिन्दी अर्थ—आयु का इच्छुक पूर्व दिशा की ओर, यशस्कामी दक्षिणदिशा की ओर, ऐश्वर्याभिलाषी पश्चिम दिशा की ओर एवं सत्य का आकांक्षी उत्तर दिशा की ओर मुख करके (उस भिक्षान्न का) भोजन करे।

संस्कृत व्याख्या—प्राङ्मुखः—पूर्वाभिमुखः, आयुष्यं—आयुषे हितं, दीर्घजीवनम् इच्छन्, भुङ्क्ते दक्षिणामुखः—अवाङ्मुखः, यशस्यं—यशसे हितं, यशोलाभाय, भुङ्क्ते प्रत्यङ्मुखः—पश्चिमाभिमुखः, श्रियं—वैभवं कामयन्, भुङ्क्ते उदङ्मुखः—उत्तराभिमुखः, हि, ऋतं—सत्यम् अभिलषन्, भुङ्क्ते—अत्ति ।

विशेष—प्राङ्मुखः—पूर्व तथा प्रस्तुत श्लोक के अनुसार पूर्व दिशा दो अधिकार बताती है—(१) नित्य—निष्काम व्यक्ति पूर्व दिशा की ओर मुख करके भोजन करे। (२) काम्य—आयु का इच्छुक पूर्व दिशा की ओर मुख करके भोजन करे। शेष तीनों दिशाओं में केवल काम्य विधि वर्णित है।

ऋत—शब्द अनेक अर्थों में प्रयुक्त है—सत्य, यज्ञ, स्वर्ग एवं विश्व के शाश्वत नियम।

[सायं प्रातर्द्विजातीनामशनं स्मृतिनोदितम् ।
नान्तरा भोजनं कुर्यादग्निहोत्रसमो विधिः ॥६॥]

स्मृतिग्रन्थों में द्विज को केवल सायं-प्रातः भोजन करने का विधान है। मध्यकाल में (अर्थात् तीन बार) भोजन नहीं करना चाहिए। यह विधान अग्निहोत्र के समान (पुण्यप्रद) है।

आचमन विधान—

उपस्पृश्य द्विजो नित्यमन्नमद्यात्समाहितः ।
भुक्त्वा चोपस्पृशेत्सम्यगद्भिः खानि च संस्पृशेत् ॥५३॥

अन्वय—द्विजः नित्यम् उपस्पृश्य समाहितः अन्नम् अद्यात्। भुक्त्वा च अद्भिः सम्यक् उपस्पृशेत्, खानि च संस्पृशेत्।

शब्दार्थ—उपस्पृश्य—आचमन करके, समाहितः—एकाग्रचित होकर, खानि—इन्द्रियों को।

हिन्दी अर्थ—ब्राह्मण नित्य आचमन कर एकाग्रचित्त होकर भोजन करे, भोजन करके जल से पुनः भली-भाँति आचमन करे और इन्द्रियों (आँख, कान, नाक, मुख) का स्पर्श करे।

संस्कृत व्याख्या—द्विजः—द्विजन्मा, नित्यं—सर्वदा, आजीवनं, उपस्पृश्य—भोजनात्प्रागाचमनं कृत्वा, समाहितः—दत्तचित्तः सन्, अन्नं—भक्ष्यपदार्थं, अद्यात्—अश्नीयात्, भुक्त्वा—भोजनं कृत्वा, च, अद्भिः—जलैः, सम्यक्—समुचितरूपेण, उपस्पृशेत्—आचामेत, खानि—घ्राणचक्षुःश्रोत्रादीनि इन्द्रियाणि, च, संस्पृशेत्—जलेन सम्यक्रूपेण स्पर्शं कुर्यात्।

विशेष—उपस्पृश्य—आचमन तथा भोजन क्रिया के मध्य व्यवधान नहीं होना

चाहिए। यह आचमन पञ्चार्द्रता (पाँच अंग—दो हाथ, दो पैर, एक मुख गीला कर) रूप होना चाहिए।

महर्षि दक्ष के अनुसार हाथ-पैर का प्रक्षालन एवं तीन बार स्वच्छ जल का पान—यह आचमन विधि है—'प्रक्षाल्य हस्तौ पादौ च त्रिः पिबेदम्बु वीक्षितम्'—दक्ष संहिता, २.१४।

अन्न अभिनन्दन—

पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन्।
दृष्ट्वा हृष्येत्प्रसीदेच्च प्रतिनन्देच्च सर्वशः ॥५४॥

अन्वय—अशनं नित्यं पूजयेत् एतद् च अकुत्सयन् अद्यात् (एतत्) दृष्ट्वा हृष्येत्, प्रसीदेत् च सर्वशः प्रतिनन्देत् च।

शब्दार्थ—अशनं—भोजन को, अकुत्सयन्—दोष न खोजते हुए, हृष्येत्—हर्षित हो, प्रतिनन्देत्—अभिनन्दन करे।

हिन्दी अर्थ—भोज्य पदार्थ को प्रतिदिन आदर की दृष्टि से देखे, उसकी निन्दा न करते हुये भक्षण करे, देखकर सन्तुष्टि तथा प्रसन्नता का भाव रखे, 'मुझे यह अन्न सर्वदा उपलब्ध हो' इस प्रकार सदा उसका अभिनन्दन करे।

संस्कृत व्याख्या—अशनं—भोजनं, नित्यं—सर्वदा, पूजयेत्—इदं प्राणार्थम् इति अर्चेत, एतत्—अन्नं, च, अकुत्सयन्—अनिन्दन्, अद्यात्—अन्नं गृह्णीयात्, एतत्, दृष्ट्वा—भोजनकाले अशनम् अवलोक्य, हृष्येत्—मनसि सन्तुष्येत्, प्रसीदेत्—प्रसन्नभावं धारयेत्, सर्वशः—सर्वप्रकारेण, प्रतिनन्देत्—अभिनन्देत्, 'एतदन्नं नित्यं मे उपलभेत्' अनेन भावेन धारयेत्।

विशेष—पूजयेत्—प्राणि की प्राणरक्षा का माध्यम होने से अन्न का दर्शन, नमस्कार एवं स्तुतिपूर्वक भोजन ग्रहण करना ही पूजा है, अतः भोजन को देवतावत् माने। आदित्यपुराण अञ्जलि बाँध कर सिर झुका कर स्तुति के पश्चात् ही भोजन ग्रहण का आदेश देता है—

'अन्नं दृष्ट्वा प्रणम्यादौ प्राञ्जलिः कथयेत्ततः।
अस्माकं नित्यमस्त्वेतदिति भक्त्या स्तुवन्नमेत्' ॥

अकुत्सयन्—भोजन गरिष्ठ है, लघु है, अरुचिकर है, अभक्ष्य है—इस प्रकार न कहे। यदि वास्तव में अखाद्य है तो नहीं खाए—मेधातिथि।

अभिनन्दित एवं तिरस्कृत अन्न का फल—

पूजितं ह्यशनं नित्यं बलमूर्जं च यच्छति।
अपूजितं तु तद् भुक्तमुभयं नाशयेदिदम् ॥५५॥

अन्वय—पूजितम् अशनं हि नित्यं बलं ऊर्जं च यच्छति, तु तद् अपूजितं भुक्तम् इदम् उभयं नाशयेत् ।

शब्दार्थ—ऊर्जं—क्रियाशीलता को, यच्छति—प्रदान करता है, भुक्तं—खाया हुआ ।

हिन्दी अर्थ—अभिनन्दित अन्न निश्चय ही शक्ति और वीर्य प्रदान करता है किन्तु तिरस्कृत अन्न के भोजन से इन दोनों का नाश होता है ।

संस्कृत व्याख्या—पूजितं—समर्चितं, अशनं—भोजनं, हि—निश्चयेन, नित्यं—प्रतिदिवसं, बलं—सामर्थ्यं, ऊर्जं—क्रियाशीलतां, च, यच्छति—ददाति, वर्धयति, तु तत्, अपूजितं—विगर्हितम् अन्नं, भुक्तं—गृहीतं, इदमुभयं—एतद्द्वयं, शक्तिवीर्ये; नाशयेत्—विनष्टं कुर्यात् ।

विशेष—पूजितम् अशनम्—भोज्य पदार्थ के रूप में जो भी सामग्री उपलब्ध हो, उसे प्रसन्न मन, एकाग्र चित्त व धीमी गति से ग्रहण करें तो पाचनतन्त्र पर अधिक भार नहीं पड़ेगा । सात्त्विक भोजन स्वास्थ्य रक्षा, आयुवर्धन, शक्ति विकास आदि दृष्टियों से लाभकारी है—

आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥
—श्रीमद्भगवद्गीता, १७.८

उच्छिष्ट निषेध—

नोच्छिष्टं कस्यचिद्दद्यान्नाद्याच्चैव तथान्तरा ।
न चैवात्यशनं कुर्यान्न चोच्छिष्टः क्वचिद् व्रजेत् ॥५६॥

अन्वय—उच्छिष्टं कस्यचित् न दद्यात्, तथा अन्तरा न अद्यात् । अत्यशनं च एव न कुर्यात्, उच्छिष्टः क्वचित् न व्रजेत् ।

शब्दार्थ—उच्छिष्टं—जूठा, अद्यात्—खाए, अत्यशनं—भूख से अधिक ।

हिन्दी अर्थ—उच्छिष्ट अर्थात् जूठा, भोजन किसी को (खाने के लिए) न दे, प्रातः और सायंकाल के अतिरिक्त मध्य में भोजन न करे, अत्यधिक भोजन भी न करे और (बिना आचमन किए) जूठे मुख से कहीं न जाए ।

संस्कृत व्याख्या—उच्छिष्टं—भुक्तावशेषं, कस्यचित्—कस्मैचित् न, दद्यात्—प्रदेयं, तथा, अन्तरा—दिवासायंभोजनयोः मध्ये, न, अद्यात्—अश्नीयात्, केवलं द्विवारं अन्नं गृह्णीयात् इत्यर्थः, अत्यशनं—आवश्यकताधिकं, च एव न, कुर्यात्—भुञ्जीत, उच्छिष्टः—भोजनान्ते आचमनरहितमुखः, क्वचित्—कुत्रचित्, न, व्रजेत्—विचरेत् ।

विशेष—उच्छिष्टम्—पात्र में रखा भोजन मुख में प्रथम बार रखते ही

उच्छिष्ट हो जाता है। महर्षि मनु का आदेश है कि उच्छिष्ट अन्न शूद्र को भी न दे—'न शूद्राय मतिं दद्यान्नोच्छिष्टं'—मनुस्मृति, ४.८०। वे प्राणी (कुत्ता, बिल्ली आदि) जो उच्छिष्ट तथा अनुच्छिष्ट का भेद करने में असमर्थ हैं, उच्छिष्ट उन्हें भी नहीं देना चाहिए।

अन्तरा—पद निम्न तीन अर्थों को अभिव्यक्त कर रहा है—(१) मध्य—भोजन केवल दो कालों में करे—प्रातः तथा सायं, मध्य में ग्रहण नहीं करे। (२) व्यवधान—भोजन करते समय किसी व्यवधान के कारण भोजन छोड़ देने पर पुनः उसी पात्र में भोजन ग्रहण नहीं करे। (३) विच्छेद—बाएँ हाथ से पात्र को पकड़ कर दाहिने हाथ से भोजन किया जाता है। किसी कारणवश बायाँ हाथ पात्र से हटा लेने पर भोजन नहीं करे—मेधातिथि।

अत्यशनम्—भोजन की मात्रा निर्धारित करते हुए मुनि के आठ ग्रास, अरण्यवासी के सोलह ग्रास, गृहस्थ के बत्तीस ग्रास तथा ब्रह्मचारी के यथेष्ट ग्रास कहे गए हैं। ब्रह्मचारी के लिए ग्रास की संख्या नहीं बताई गई है तथापि जितने से उसका पेट भरे केवल उतना खाए। उदर के तीन भाग हैं—आधा भाग अन्न से, आधे का एक भाग पानी से तथा एक भाग वायु संचरण के लिए खाली रखना चाहिए—यही निरोगता का मन्त्र है।

अति भोजन दोष—

अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनम्।
अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत् ॥५७॥

अन्वय—अतिभोजनम् अनारोग्यम् अनायुष्यम् अस्वर्ग्यम् अपुण्यं लोकविद्विष्टं च, तस्मात् तत् परिवर्जयेत्।

शब्दार्थ—अनारोग्यं—स्वास्थ्य, अनायुष्यं—आयुनाशक, लोकविद्विष्टं—लोकनिन्दित।

हिन्दी अर्थ—अधिक भोजन आरोग्य, दीर्घायु, स्वर्ग और पुण्य में बाधक एवं लोकनिन्दित है अतः उस प्रवृत्ति को छोड़ देना चाहिए।

संस्कृत व्याख्या—अतिभोजनं—आवश्यकताधिकान्नग्रहणं, अनारोग्यं—अस्वास्थ्यकारणं, अनायुष्यं—जीवितकालनाशकं, अजीर्णतायाः रोगमृत्युकारणमिति भावः; अस्वर्ग्यं—यागाद्यभावे स्वर्गप्राप्तौ बाधकं, अपुण्यं—पापवृत्तिवर्धकं, लोकविद्विष्टं—लोकैः परिचितजनैः विद्विष्टं निन्दितं, तस्मात्—अतः, तत्—बहुभोजनं, परिवर्जयेत्—कदापि न कुर्यात्।

विशेष—वेद के एक मन्त्र में उस आहार का स्वरूप स्पष्ट कर दिया गया है जो सर्वसुलभ और सुपाच्य है, जो पितरों को समर्पित करके ग्रहणीय है—

ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् ।
स्वधास्थ तर्पयत मे पितृन् ।।

—वाजसनेयि यजुर्वेद, २:३४

आचमन तीर्थ—

ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत् ।
कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन ।।५८।।

अन्वय—विप्रः ब्राह्मेण तीर्थेन कायत्रैदशिकाभ्यां वा नित्यकालम् उपस्पृशेत्, पित्र्येण कदाचन न ।

शब्दार्थ—ब्राह्मेण—ब्रह्म सम्बन्धी, काय—प्रजापति सम्बन्धी, त्रैदशिक—देव सम्बन्धी, पित्र्येण—पितृ सम्बन्धी ।

हिन्दी अर्थ—ब्राह्मण ब्राह्म तीर्थ, प्रजापति तीर्थ अथवा देव तीर्थ से सदा आचमन करे, पितृ तीर्थ से कदापि आचमन न करे ।

संस्कृत व्याख्या—विप्रः—ब्राह्मणः, ब्राह्मेण—ब्रह्मणः इदं ब्राह्मं तेन, ब्राह्मसंज्ञकेन; तीर्थेन—पुण्यस्थानेन, कायत्रैदशिकाभ्यां—कः प्रजापतिः, तस्य इदं, कायं, त्रैदशिकं—त्रिदशाः देवाः तेषामिदं त्रैदशिकं, कायत्रैदशिके, ताभ्यां, कायत्रैदशिकाभ्यां, प्राजापत्यदैवतीर्थाभ्यां; वा, नित्य कालं—सर्वदा, उपस्पृशेत्—आचामेत्, पित्र्येण—पितुः इदं पित्र्यं, तेन, पितृतीर्थेन; कदाचन—कदापि, न, आचमनं कुर्यात् ।

विशेष—तीर्थ—पावनता गुण सूचित करने के लिए प्रयुक्त तीर्थ शब्द निम्न अर्थों में प्रयुक्त होता है—(१) उद्धारक, (२) पाप मुक्तिदायक, (३) सरोवर की सीढ़ियाँ, (४) जल को धारण करने वाला करतल का अंश—यहाँ चतुर्थ अर्थ अभिप्रेत है ।

त्रैदशिक—त्रिदश—देवता अर्थ में अण् प्रत्यय तथा स्वार्थ में क प्रत्यय लग कर त्रैदशिक शब्द निष्पन्न हुआ ।

पित्र्येण—जलतर्पण आदि पितृकार्य करतल के इसी भाग से सम्पन्न होते हैं अतः ब्राह्म तीर्थ में घाव, फुंसी इत्यादि होने पर पितृतीर्थ से आचमन न करे । आचमन का विधान केवल ब्राह्मण के लिए नहीं, प्रत्येक वर्ण के लिए है ।

तीर्थ अभिज्ञान—

अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते ।
कायमङ्गुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः ।।५९।।

अन्वय—अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते, अङ्गुलिमूले कायं अग्रे दैवं तयोः अधः पित्र्यं (प्रचक्षते) ।

शब्दार्थ—तले—हथेली में, मूले—जड़ में, प्रचक्षते—कहा जाता है ।

हिन्दी अर्थ—हाथ के अंगूठे के मूल के नीचे ब्राह्मतीर्थ, कनिष्ठिका अंगुलि के मूल में प्रजापति तीर्थ, अंगुलियों के अग्रभाग में दैवतीर्थ और अंगूठे तथा तर्जनी के मध्य में पितृतीर्थ कहा जाता है ।

संस्कृत व्याख्या—अङ्गुष्ठमूलस्य—अङ्गुष्ठस्य मूलं तस्य, तले—अधोभागे, ब्राह्मं—एतदाख्यं, तीर्थं—पवित्रस्थलं, प्रचक्षते—कथ्यंते, अङ्गुलिमूले—कनिष्ठिकामूले, कायं—प्रजापतेः तीर्थं, अग्रे—नखसमीपे, दैवं—देवानां तीर्थं, तयोः—अङ्गुष्ठप्रदेशिन्योः, अधः—निम्ने, पित्र्यं—पितृतीर्थं, प्रचक्षते ।

विशेष—अंगुलि—कौन सी अंगुलि हो ? कुछ विद्वान् तर्जनी, कुछ कनिष्ठिका तथा कुछ चारों अंगुलियों को बताते हैं । कौन सा हाथ हो ? अधिकांश टीकाकार इस विषय में मौन हैं तथापि दाहिने हाथ को ग्रहण किया जाता है । प्रायः स्मृतियाँ मणिबन्ध (कलाई) तक हस्त प्रक्षालन का विधान करती हैं ।

तीर्थों के इन नामों का समर्थन अन्य स्मृतिग्रथों में भी समान भाषा में उपलब्ध है—

'कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च ।
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्' ॥

याज्ञवल्क्य स्मृति, १.१९

आचमन विधि—

त्रिराचामेदपः पूर्वं द्विः प्रमृज्यात्ततो मुखम् ।
खानि चैव स्पृशेदद्भिरात्मानं शिर एव च ॥६०॥

अन्वय—पूर्वम् अपः त्रिः आचामेत्, ततः द्विः मुखं प्रमृज्यात्, अद्भिः खानि च एव आत्मानं शिरः एव च स्पृशेत् ।

शब्दार्थ—मुखं—मुख छिद्र को, प्रमृज्यात्—पोंछे, अद्भिः—जल से, आत्मानं—हृदय को, स्पृशेत्—स्पर्श करे ।

हिन्दी अर्थ—सर्वप्रथम जल से (ब्राह्म आदि तीर्थ से) तीन बार आचमन करे, तत्पश्चात् दो बार मुख प्रक्षालन करे, जल से चक्षु, कर्ण, नासिकादि इन्द्रियों, हृदय तथा शिर को सम्मार्जित करे ।

संस्कृत व्याख्या—पूर्वं—प्रथमं, अपः—जलानि, त्रिः—वारत्रयं, आचामेत—गण्डूषपं पिबेत्, ततः—अनन्तरं, द्विः—वारद्वयं, मुखं—अधरोष्ठं, प्रमृज्यात्—प्रोञ्छेत्, अद्भिः—जलेन, खानि—इन्द्रियाणि च एव, आत्मानं—हृदयं, शिरः—ललाटं, एव च, स्पृशेत्—प्रक्षालयेत् ।

विशेष—अस्पृश्य—मुख प्रक्षालन करते समय ओष्ठ व अधर बन्द रहने
ाहिए—'संवृत्याङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखम्'—दक्षसंहिता।

आत्मानम्—हृदय—'हृद्यन्तर्ज्योतिः पुरुषः'—बृहदारण्यकोपनिषद्, ४.३.७।
भी टीकाकार हृदय अर्थ को स्वीकार करते हैं किन्तु (१) अमूर्त का स्पर्श असम्भव
, (२) आत्मा तो सर्वत्र व्याप्त है। ऋषियों ने हृदय में आत्मा का दर्शन किया,
तः हृदय स्पृश्य कहा गया।

ाचमन अनिवार्यता—

अनुष्णाभिरफेनाभिरद्भिस्तीर्थेन धर्मवित्।
शौचेप्सुः सर्वदाचामेदेकान्ते प्रागुदङ्मुखः ॥६१॥

अन्वय—धर्मवित् शौचेप्सुः एकान्ते प्राक् उदङ्मुखः अनुष्णाभिः अफेनाभिः
द्भिः तीर्थेन सर्वदा आचामेत्।

शब्दार्थ—शौचेप्सु—पवित्रता का इच्छुक, प्राक्—पूर्व, उदङ्—उत्तर,
नुष्णाभिः—बिना उबले हुए, अफेनाभिः—बुलबुले रहित।

हिन्दी अर्थ—पवित्रता का इच्छुक धर्मात्मा पुरुष (भोजन के पश्चात्) जनशून्य
ान में पूर्वाभिमुख, उत्तराभिमुख अथवा पूर्वोत्तराभिमुख (ईशान कोणीय) होकर
तल और स्वच्छ जल से, ब्राह्मतीर्थादि अंगुलियों से सर्वदा आचमन करे।

संस्कृत व्याख्या—धर्मवित्—धर्मं वेत्तीति, धर्मज्ञः; शौचेप्सुः—शौचमिच्छति,
ति—पावित्र्यमिच्छन्, एकान्ते—जनशून्यस्थाने, प्राक्—प्राचि, उदङ्मुख—उदीचि
मुखं यस्य, पूर्वाभिमुखः उत्तराभिमुखो वा; अनुष्णाभिः—शीतलैः, अफेनाभिः—
नरहिताभिः बुद्बुदैः हीनाभिः; अद्भिः—जलैः, तीर्थेन—ब्राह्मप्राजापत्यादितीर्थेन,
र्वदा—आजीवनं, आचामेत्—आचमनं कुर्यात्।

ाचमन जल परिमाण—

हृद्गाभिः पूयते विप्रः कण्ठगाभिस्तु भूमिपः।
वैश्योऽद्भिः प्राशिताभिस्तु शूद्रः स्पृष्टाभिरन्ततः ॥६२॥

अन्वय—विप्रः हृद्गाभिः, भूमिपः तु कण्ठगाभिः, वैश्यः तु प्राशिताभिः,
द्रः अन्ततः स्पृष्टाभिः अद्भिः पूयते।

शब्दार्थ—हृद्गाभिः—हृदय तक गए हुए, प्राशिताभिः—मुख तक गए हुए,
ष्टाभिः—ओंठ तक गए हुए, पूयते—पवित्र हो जाता है।

हिन्दी अर्थ—ब्राह्मण हृदय तक, क्षत्रिय कण्ठ तक, वैश्य मुख तक तथा शूद्र
ठ तक आचमन का जल पीने से पवित्र हो जाता है।

संस्कृत व्याख्या—विप्रः—ब्राह्मणः, हृद्गाभिः—हृदयं गच्छन्तीति हृद्गाः,

ताभिः, चित्तं प्राशाभिः; भूमिपः—भूमिं पातीति, राजन्यः, तु, कण्ठगाभिः—गलप्रदे
गताभिः, वैश्यः, तु, प्राशिताभिः—आस्यं गताभिः, शूद्रः, अन्ततः—ओष्ठान्तेनाि
अद्भिः—जलैः, पूयते—पवित्रो भवति ।

विशेष—महर्षि याज्ञवल्क्य तीनों वर्णों के लिए जल की मात्रा—'हृत्कण्ठतालुगाभिः' तथा शूद्र के लिए एक बार जल स्पर्श—'सकृत्स्पृष्टाभिरन्तत का नियम देते हैं ।

—याज्ञवल्क्य स्मृति, १

उपवीती आदि के लक्षण—

उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः ।
सव्ये प्राचीन आवीती निवीती कण्ठसज्जने ॥६३॥

अन्वय—द्विजः दक्षिणे पाणौ उद्धृते उपवीती, सव्ये प्राचीन आवी कण्ठसज्जने निवीती इति उच्यते ।

शब्दार्थ—पाणौ—हाथ में, उद्धृते—उठाने पर, सव्ये—बाएँ, कण्ठसज्जने कण्ठ में पहने गए ।

हिन्दी अर्थ—ब्राह्मण दाहिना हाथ उठा कर पहने गए (बाएँ कन्धे के उ से दाहिने ओर तक लटकते हुए) यज्ञोपवीत से 'उपवीती', बायाँ हाथ उठा पहने गए (दाएँ कन्धे के उपर से बाईं ओर लटकते हुए) यज्ञोपवीत से 'प्रा आवीती' और कण्ठ में (माला के समान लटकते हुए) पहने गए यज्ञोपवीत 'निवीती' कहलाता है ।

संस्कृत व्याख्या—द्विजः—द्विजन्मा, दक्षिणे—सत्येतरे, पाणौ— उद्धृते—ऊर्ध्वगते, (वामस्कन्धस्थापिते दक्षिणपार्श्वावलम्बिते यज्ञसूत्रे) 'उपवीत सव्ये—वामे, (दक्षिणस्कन्धस्थापिते वामपार्श्वावलम्बिते यज्ञोपवीते) 'प्राचीनावी कण्ठसज्जने—कण्ठे सज्जने, (शिरोऽवधारणे गलावलम्बिते) 'निवीती', इति उच्यते कथ्यते ।

विशेष—ब्राह्मण देवताओं के लिए आहुति देते समय 'उपवीती', पितरों लिए तर्पण करते समय प्राचीन आवीती एवं मनुष्यों के लिए कार्य सम्पादित क समय 'निवीती' होता है—'निवीतं मनुष्याणां प्राचीनावीतं पितृणामुप देवानाम्' ।

—तैत्तिरीय संहिता, २.५.

नवीन वस्तुओं की ग्रहण विधि—

मेखलामजिनं दण्डमुपवीतं कमण्डलुम् ।
अप्सु प्रास्य विनष्टानि गृह्णीयान्यानि मन्त्रवत् ॥६४॥

अन्वय—मेखलाम्, अजिनं, दण्डम्, उपवीतं, कमण्डलुम् (एतानि) विनष्टानि अप्सु प्रास्य, अन्यानि मन्त्रवत् गृह्णीत ।

शब्दार्थ—अजिन—मृगचर्म, अप्सु—जल में, प्रास्य—फेंक कर ।

हिन्दी अर्थ—मेखला, मृगचर्म, दण्ड, यज्ञोपवीत और कमण्डलु के नष्ट हो जाने पर उन्हें जल में फेंक कर मन्त्रोच्चारण पूर्वक दूसरा धारण कर लेना चाहिए ।

संस्कृत व्याख्या—मेखलां—रशनां, अजिनं—कृष्णमृगचर्म, दण्डं—बिल्वपलाशादिविरचितयष्टिकां, उपवीतं—यज्ञसूत्रं, कमण्डलुं—जलपात्रं, विनष्टानि—त्रुटितानि अनुपयोज्यानि वा, अप्सु—जलेषु, प्रास्य—प्रक्षिप्य, अन्यानि—नवानि, मन्त्रवत्—मन्त्रपाठपूर्वकं, गृह्णीत—धारयेत् ।

विशेष—दण्ड, मेखला एवं यज्ञोपवीत टूट जाए तो ब्रह्मचारी को प्रायश्चित्त करना चाहिए । ब्रह्मचर्य की समाप्ति पर यज्ञोपवीत, दण्ड, मेखला एवं मृगचर्म को जल में त्याग देना चाहिए, प्रवाहित करते समय वारुणी ऋचा अथवा 'ओ३म्' का उच्चारण करना चाहिए—'उपवीतं च दण्डे बध्नाति । तदप्येतत् । यज्ञोपवीतदण्डं च मेखलामजिनं तथा । जुहुयादप्सु व्रते पूर्णे वारुण्यर्चा रसेन' ।

—शांखायन गृह्यसूत्र, २.३६-४१

केशान्त संस्कार—

केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते ।
राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः ॥६५॥

अन्वय—ब्राह्मणस्य केशान्तः षोडशे वर्षे, राजन्यबन्धोःद्वाविंशे, वैश्यस्य ततः द्व्यधिके विधीयते ।

शब्दार्थ—केशान्तः—गोदान संस्कार, ततः द्व्यधिके—चौबीसवें ।

हिन्दी अर्थ—ब्राह्मण का केशान्त संस्कार सोलहवें वर्ष में, क्षत्रिय का बाईसवें, वैश्य का चौबीसवें वर्ष में करना विधि सम्मत है ।

संस्कृत व्याख्या—ब्राह्मणस्य—अग्रजन्मनः, केशान्तः—केशानाम् अन्तः, ब्रह्मचर्यान्ते केशश्मश्रुकर्तनं; षोडशे वर्षे, राजन्यबन्धोः—राजन्यस्य बन्धुः राजन्यबन्धुः, तस्य, क्षत्रियस्य; द्वाविंशे वर्षे, वैश्यस्य, ततः, द्व्यधिके—चतुर्विंशे वर्षे, विधीयते—विधिविधानेन क्रियते ।

विशेष—केशान्तः—केशान्त संस्कार वस्तुतः यौवन के पदार्पण का सूचक था । सभी केशों का संस्कार होने के कारण इसे केशश्मश्रुकर्म रूप कहा गया । आचार्य के प्रति गौ का दान एवं केशों का संस्कार करने के कारण इसे गोदान संस्कार भी कहा गया—'गावः केशाः दीयन्ते छिद्यन्ते यस्मिन्' ।

मन्त्रविहीन स्त्री संस्कार—

अमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषतः ।
संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम् ॥६६॥

अन्वय—स्त्रीणाम् इयम् आवृत् तु अशेषतः यथाकालं यथाक्रमं शरी संस्कारार्थम् अमन्त्रिका कार्या ।

शब्दार्थ—आवृत्—संस्कार परम्परा, अशेषतः—सम्पूर्ण रूप से, यथाका यथासमय, यथाक्रमं—क्रमानुसार, अमन्त्रिका—बिना मन्त्र पाठ किए ।

हिन्दी अर्थ—स्त्रियों के संस्कार सम्पूर्ण रूप से यथोचित समय पर, यथ से, शरीर की शुद्धि के लिए मन्त्र उच्चारण के बिना करना चाहिए ।

संस्कृत व्याख्या—स्त्रीणां—नारीणां, इयम् आवृत्—पूर्ववर्णितसंस्काराः अशेषतः सम्पूर्णतः, यथाकालं—कालमनतिक्रम्येति, यथावसरं; यथाक्रमं—क्रमम क्रम्येति, वेदोक्तक्रमानुसारेण; शरीरस्य—देहस्य, संस्कारार्थं—दोषापक्ष अमन्त्रिका—मन्त्रैः विनैव, कार्या—कर्त्तव्या ।

विशेष—यथाकालं यथाक्रमम्—पुरुष के लिए विहित काल एवं क्रम अतिक्रमण किए बिना स्त्री के लिए भी उसी काल एवं क्रम में होना चाहिए ।

— मेध

अमन्त्रिका—केवल प्रमुख मन्त्रों के उच्चारण का निषेध है गौण का नहीं

—मीमांसा सूत्र, ३.८.३४

सूत्र काल में स्त्रियों के लिए उपनयन अनिवार्य था, वेदाध्ययन, अग्नि एवं भिक्षाटन भी वे समान रूप से करती थीं । अर्वाचीन काल में मनु के अनु इन प्रथाओं का निषेध हो चुका था । बाणभट्ट ने 'कादम्बरी' में महाश्वेता ब्रह्मसूत्रधारिणी कहा है—'ब्रह्मसूत्रेण पवित्रीकृतकायाम्' ।

स्त्री संस्कार—

वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः ।
पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिक्रिया ॥६७

अन्वय—स्त्रीणां वैवाहिकः विधिः वैदिकः संस्कारः स्मृतः, पतिसेवा वासः, गृहार्थः अग्निपरिक्रिया ।

शब्दार्थ—स्मृतः—कहे गए हैं, गृहार्थः—गृहकार्यनिपटाना, अग्निपरिक्रिया अग्निहोत्र ।

हिन्दी अर्थ—स्त्रियों का विवाह संस्कार ही वैदिक संस्कार, पतिसेवा गुरुकुल में वास तथा गृहकार्यों का सम्पादन ही अग्निहोत्र कर्म है ।

संस्कृत व्याख्या—स्त्रीणां—नारीणां, वैवाहिकः—विवाहे भवः, पाणि-ग्रहणसम्बन्धी; विधिः—संस्कारानुष्ठानं, वैदिकः—आनुश्रविकः, संस्कारः—शुद्धिकर्मसम्पादनं, पतिसेवा—पतिपरायणता, गुरौ वासः—वेदाध्ययनार्थं गुरुकुले वासः, गृहार्थः—गृहकृत्यव्यस्तता, अग्निपरिक्रिया—अग्निपरिचर्या, स्मृतः—कथितः ।

विशेष—पूर्व श्लोक में स्त्रियों के समस्त संस्कारों की सम्पन्नता का आदेश है। जो स्मृति के मत का अनुकरण करते हुए अपनी पुत्री का उपनयन संस्कार नहीं करता, उस कन्या का विवाह ही उपनयन संस्कार है। शेष कन्याओं के विषय में यह पक्ष असम्मत है क्योंकि समाज को उनकी दो प्रकार की जीवन शैली मान्य थी—(१) ब्रह्मवादिनी, (२) सद्योवधू। प्रथम प्रकार की कन्याओं का उपनयन, अग्न्याधान, वेदाध्ययन एवं भिक्षाचरण घर में ही सम्पन्न होने के पश्चात् युवावस्था में विवाह होता था। इन्हें नैष्ठिक ब्रह्मचारिणी भी कहते थे। द्वितीय प्रकार की कन्याओं का उपनयन विवाह काल में होता था। तदनन्तर वे श्रौत-स्मार्त्त कर्मों में अधिकृत होकर गृहस्थाश्रम में प्रवेश करती थीं। इन्हें उपकुर्वाण ब्रह्मचारिणी भी कहते थे—हारीतस्मृति।

[अग्निहोत्रस्य शुश्रूषा सायमुद्वासमेव च ।
कार्यं पत्न्या प्रतिदिनमिति कर्म च वैदिकम् ॥७॥]

अग्निहोत्र की परिचर्या एवं सायं-प्रातः पति के कार्यों में सहयोग—पत्नी को यह कार्य प्रतिदिन करना चाहिए, यही उसका वैदिक धर्म है।

उपनयन संस्कार विधि समाप्ति—

एष प्रोक्तो द्विजातीनामौपनायनिको विधिः ।
उत्पत्तिव्यञ्जकः पुण्यः कर्मयोगं निबोधत ॥६८॥

अन्वय—द्विजातीनाम् एषः उत्पत्तिव्यञ्जकः पुण्यः औपनायनिकः विधिः प्रोक्तः, कर्मयोगं निबोधत ।

शब्दार्थ—उत्पत्तिव्यञ्जकः—द्विजत्व के बोधक, औपनायनिकः—उपनयनादि संस्कार ।

हिन्दी अर्थ—यह द्विजातियों के द्वितीय जन्म के सूचक पवित्र उपनयनादि संस्कार, विधिपर्यन्त मैंने कहे, अब उनके कर्त्तव्यों को समझिए ।

संस्कृत व्याख्या—द्विजातीनां—द्विजानां, एषः—पूर्वोक्तः, उत्पत्तिव्यञ्जकः—उत्पत्तिः व्यज्यतेऽनेनेति, द्वितीयजन्मबोधकः; पुण्यः—पुण्यप्रदः, औपनायनिकः—उपनयनादिसंस्कारः, विधिः—क्रियाकलापः, प्रोक्तः—सम्यक् रूपेण उक्तः, सम्प्रति, कर्मयोगं—कर्त्तव्यानुष्ठानं, निबोधत—अवगच्छत ।

विशेष—श्रुतिस्मृति विहित कार्यों में अधिकार प्राप्त न होने से अनुपनीत पुरुष अनुत्पन्न के समान है।

शिष्य शिक्षा—

उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः।
आचारमग्निकार्यं च सन्ध्योपासनमेव च ॥६९॥

अन्वय—गुरुः शिष्यम् उपनीय आदितः शौचम् आचारम् अग्निकार्यं, सन्ध्योपासनम् एव च शिक्षयेत्।

शब्दार्थ—आदितः—आरम्भ से, शौचं—पवित्रता की, आचारं—व्यवहार की।

हिन्दी अर्थ—गुरु शिष्य का उपनयन संस्कार कर उसे आरम्भ से शुद्धि की, सदाचार की, अग्निहोत्र की तथा सन्ध्योपासना की शिक्षा दे।

संस्कृत व्याख्या—गुरुः—आचार्यः, शिष्यं—अन्तेवासिनं, उपनीय—यज्ञोपवीतस्यानन्तरं, आदितः—आरम्भतः, शौचं—पवित्रतां, आचारं—व्यवहारपद्धति, अग्निकार्यं—सायम्प्रातः समिधाहरणं होमानुष्ठानं च, सन्ध्योपासनं—सान्ध्यकालीन-पूजाविधि, एव च, शिक्षयेत्—ज्ञानं दद्यात्।

विशेष—शौचम्—गायत्री मन्त्र के नियमित, विधिवत् अध्ययन के पूर्व विद्यार्थी में शुचिता का समावेश अनिवार्य था—'अशुद्धस्य सर्वत्रानाधिकारात्', अतः प्रथम शिक्षा शुचिता के विषय में आवश्यक थी।

आचारम्—आचार्य शिष्य को सम्यक् आचार सिखाने का प्रयत्न करता है—'आचार्यः आचारं ग्राहयति'।

—निरुक्त, १.४

अग्निकार्यम्—यज्ञीय अग्नि को प्रथम बार प्रदीप्त कर उसमें आहुति देने का कृत्य विद्यार्थी जीवन के साथ ही आरम्भ होता था और आजीवन अबाधित गति से चलता रहता था।

अध्यापन योग्य शिष्य—

अध्येष्यमाणस्त्वाचान्तो यथाशास्त्रमुदङ्मुखः।
ब्रह्माञ्जलिकृतोऽध्याप्यो लघुवासा जितेन्द्रियः ॥७०॥

अन्वय—अध्येष्यमाणः, तु, आचान्तः, उदङ्मुखः, ब्रह्माञ्जलिकृतः लघुवासाः जितेन्द्रियः यथाशास्त्रम् अध्याप्यः।

शब्दार्थ—अध्येष्यमाणः—अध्ययन का अभिलाषी, आचान्तः—मुख शुद्ध किए हुए, ब्रह्माञ्जलिकृतः—प्रणाम की मुद्रा धारण किए।

हिन्दी अर्थ—अध्ययन का इच्छुक, आचमन किया हुआ, उत्तराभिमुख,

ब्रह्माञ्जलिपूर्वक स्थित, अल्पवस्त्रधारी तथा जितेन्द्रिय शिष्य शास्त्रानुसार अध्यापन के योग्य है।

संस्कृत व्याख्या—अध्येष्यमाणः—अध्येतुमिच्छमाणः, अध्ययनं करिष्यमाणः; आचान्तः—कृताचमनः, उदङ्मुखः—उत्तराशाभिमुखः, ब्रह्माञ्जलिकृतः—बद्धाञ्जलिः, लघुवासाः—लघु वासः यस्य सः, अल्पवस्त्रः, कौपीनमात्राच्छादनः; जितेन्द्रियः—जितानि इन्द्रियाणि येन सः, संयमकारिणः; यथाशास्त्रं—शास्त्रादेशानुसारं, अध्याप्यः—पाठ्यः।

विशेष—लघुवासः—शब्द के अन्य अर्थ टीकाकारों ने इस प्रकार दिए हैं—स्वच्छ वस्त्र, शान्त वस्त्र, साधारण मूल्य के वस्त्र। अध्ययन काल में भारी एवं मूल्यवान् वस्त्र चित्त की एकाग्रता बाधित करेंगे और शिष्य के शरीर पर गुरु द्वारा ताडन आदि का भी प्रभाव नहीं होगा। शिष्य के नग्न देह होने पर प्रहार से अधिक चोट लगेगी अतः हल्के वस्त्र ही उचित माने गए।

ऐसा प्रमाण उपलब्ध है कि पूर्वाभिमुख स्थित होकर भी अध्ययन किया जा सकता है—'प्राङ्मुखो दक्षिणतः शिष्य उदङ्मुखो वा'। —गौतम धर्मसूत्र, १.२३

ब्रह्माञ्जलि का लक्षण—

ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा।
संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः॥७१॥

अन्वय—ब्रह्मारम्भे अवसाने च गुरोः पादौ सदा ग्राह्यौ, हस्तौ संहत्य अध्येयम्, हि सः ब्रह्माञ्जलिः स्मृतः।

शब्दार्थ—ब्रह्मारम्भे—वेद पाठ के आरम्भ में, संहत्य—जोड़ कर।

हिन्दी अर्थ—वेदाध्ययन के प्रारम्भ तथा अन्त में गुरु के चरणों का सदा स्पर्श करे, दोनों हाथों को जोड़ कर वेदाध्ययन करे, उसे ब्रह्माञ्जलि कहते हैं।

संस्कृत व्याख्या—ब्रह्मारम्भे—ब्रह्मणः आरम्भः तस्मिन्, वेदपाठात् पूर्वं; अवसाने—समाप्तौ, च, गुरोः—आचार्यस्य, पादौ—चरणौ, सदा—नित्यं, ग्राह्यौ—स्पृश्यौ, हस्तौ—करौ, संहृत्य—संश्लिष्य, अध्येयं—पठितव्यं, हि सः—तदेव, ब्रह्माञ्जलिः, संहतहस्तौः, स्मृतः—कथितः।

विशेष—ब्रह्मारम्भे—अध्यापन की इच्छा होने पर, वेद के प्रारम्भिक मन्त्रों का प्रथम उच्चारण प्रारम्भ करने की दृष्टि से गुरु 'अधीष्व' पद का उच्चारण करता है। इसी काल में गुरु के चरणों को ग्रहण करने का निर्देश है। यह क्रिया गुरु के चित्त की प्रसन्नता हेतु सम्पादित की जाती है।

अवसाने—प्रातः काल से आरम्भ करके दिन में निरन्तर अर्थात् किसी व्यवधान के बिना दो प्रपाठकों का अध्ययन पूर्ण करना अवसान है।

हस्तौ संहत्य—हाथ कच्छप के समान संश्लिष्ट (एक के ऊपर एक) रख कर ही अध्ययन करे। चित्त की एकाग्रता के लिए यह हस्त मुद्रा अनिवार्य है।

अध्येयम्—गुरु से अध्यापन के लिए कहना नहीं होता है, समीप बैठना ही अध्ययन की इच्छा का संकेत देना है। स्मृति में कहा गया है—'पादोपग्रहणं गुरोः प्रातरन्वहम्', क्योंकि ग्रन्थ एवं गुरु के प्रति श्रद्धावान् ही ज्ञान प्राप्ति में समर्थ होता है—'श्रद्धावांल्लभते ज्ञानं तत्परः संयतेन्द्रियः'। —श्रीमद्भगवद्गीता, ४.३९

गुरु के प्रति अभिवादन विधि—

व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः।
सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन च दक्षिणः ॥७२॥

अन्वय—व्यत्यस्तपाणिना, गुरोः उपसङ्ग्रहणं कार्यम्। सव्येन सव्यः दक्षिणेन च दक्षिणः (पादः) स्प्रष्टव्यः।

शब्दार्थ—व्यत्यस्तपाणिना—हाथों को परिवर्तित कर, उपसङ्ग्रहणं—चरण-वन्दना।

हिन्दी अर्थ—हाथों को परिवर्तित करके गुरु के चरणों का स्पर्श करे। बाएँ हाथ से गुरु का बायाँ चरण एवं दाहिने हाथ से गुरु के दाएँ चरण को छूना चाहिए।

संस्कृत व्याख्या—व्यत्यस्तपाणिना—व्यत्यस्तौ पाणी यस्य: सः व्यत्यस्तपाणिः, तेन, परिवर्तितहस्तेन, गुरोः—आचार्यस्य, उपसङ्ग्रहणं—चरणवन्दनं, कार्यं-कर्त्तव्यं, सव्येन—वामकरेण, सव्यः—वामचरणः, दक्षिणेन—वामेतरेण हस्तेन, दक्षिणः—दक्षिणपादः, स्प्रष्टव्य—वन्दनीयः।

विशेष—**व्यत्यस्तपाणिना**—दोनों हाथों को गुणा (= ×) की मुद्रा में गुरु के चरणों की ओर एक साथ बढ़ाए। बाएँ हाथ के ऊपर दाहिने हाथ को रखकर उत्तान हाथों से अर्थात् अंगुलियों को ऊपर की ओर कर पूरे हाथ से गुरु के चरणों का स्पर्श तो करे किन्तु चरणों को दबाए नहीं। महर्षि पैठीनसि ने भी इसी प्रकार गुरु की चरण वन्दना का निर्देश किया है—'उत्तानाभ्यां हस्ताभ्यां दक्षिणेन दक्षिणं, सव्यं सव्येन पादावभिवादयेत्'।

अध्ययन के आरम्भ एवं समापन की विधि—

अध्येष्यमाणं तु गुरुर्नित्यकालमतन्द्रितः।
अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति चारमेत् ॥७३॥

अन्वय—अतन्द्रितः (सन्) गुरुः नित्यकालम् अध्येष्यमाणं भो! अधीष्व इति ब्रूयात्, 'विरामः अस्तु' इति च आरमेत्।

शब्दार्थ—अतन्द्रितः—आलस्यरहित, अधीष्व—अध्ययन करो, आरमेत्—निबटाए।

हिन्दी अर्थ—आलस्यरहित आचार्य अध्ययन के इच्छुक शिष्य से सर्वदा (आरम्भ में), 'भो ! अधीष्व' (हे ! पढ़ो) ऐसा कहे तथा 'विरामोऽस्तु' (अध्ययन से विरत होओ) ऐसा कह कर पाठ का समापन करे।

संस्कृत व्याख्या—अतन्द्रितः—अनलसः सन्, गुरुः—आचार्यः, नित्यकालं—प्रतिदिनमध्ययनकाले, अध्येष्यमाणं—पठिष्यमाणं शिष्यं 'भो ! अधीष्व'—'हे शिष्य ! पठ' इति ब्रूयात्—एवं वदेत्, 'विरामः अस्तु—सम्प्रति समापनं भवतु, इति च आरमेत्—एवं समापयेत्।

विशेष—भोः अधीष्व—यह अध्ययन प्रारम्भ करने के लिए मानो निमन्त्रित करना है। विरामोऽस्तु—यह दो प्रपाठकों के अनन्तर अध्ययन समाप्ति का सूचक है।

कुछ टीकाकारों के अनुसार उपर्युक्त वाक्यों का गुरु मुख से आदेश रूप में उच्चारण उचित है किन्तु अन्य के अनुसार इन्हें शिष्य गुरु के प्रति सम्मान प्रकट करने के लिए कहता है।

आदि-अन्त में ओंकारोच्चारण विधान—

ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा।
स्रवत्यनोङ्कृतं पूर्वं पुरस्ताच्च विशीर्यति ॥७४॥

अन्वय—ब्रह्मणः आदौ अन्ते च सर्वदा प्रणवं कुर्यात्। पूर्वम् अनोङ्कृतं स्रवति पुरस्तात् च विशीर्यति।

शब्दार्थ—अनोङ्कृतं—ओ३म् का उच्चारण न करना, स्रवति—नष्ट होता है, विशीर्यति—विस्मृत होता है।

हिन्दी अर्थ—ब्रह्मचारी वेदाध्ययन के आरम्भ तथा समाप्ति के समय सदैव ओ३म् शब्द का उच्चारण करे। वेदारम्भ में 'ओ३म्' शब्द का उच्चारण न करने से वेद का नाश होता है तथा अन्त में 'ओ३म्' का उच्चारण न करने से अधीत विद्या स्थिर नहीं होती है।

संस्कृत व्याख्या—ब्रह्मणः—वेदपाठस्य, आदौ—आरम्भे, अन्ते—समाप्तौ, च, सर्वदा—प्रतिदिनं, प्रणवं—ओ३म् इति पदस्योच्चारणं, कुर्यात्—विदधीत, पूर्वं—आदौ, अनोङ्कृतं—ओङ्काररहितं, स्रवति—शनैः शनैः नश्यति, पुरस्तात्—पश्चात्, च, विशीर्यति—अस्थिरतां विस्मृतिं वा गच्छति।

विशेष—प्रणवम्—ओ३म् उच्चारण के अभाव में उपर्युक्त दोनों क्रियाएं अध्ययन की निष्फलता को सूचित करती हैं। शिक्षण कार्य मौखिक था, स्मरण

पर विशेष बल दिया जाता था अतः अधीत विद्या के स्मरण का पूर्ण प्रयास किया जाता था ।

ओंकार उच्चारण के योग्य ब्रह्मचारी—

प्राक्कूलान्पर्युपासीनः पवित्रैश्चैव पावितः ।
प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति ।।७५।।

अन्वय—प्राक्कूलान् पर्युपासीनः पवित्रैः पावितः एव च त्रिभिः प्राणायामैः पूतः ततः ओङ्कारम् अर्हति ।

शब्दार्थ—प्राक्कूलान्—पूर्व की ओर हैं नोकें जिनकी ऐसी कुशाओं पर, पावितः—पवित्र किया गया ।

हिन्दी अर्थ—पूर्वाभिमुख बिछाए गए कुशासन पर बैठा हुआ, कुशा की पवित्री से पवित्र किया हुआ तथा तीन प्राणायामों से शुद्ध हुआ, ब्रह्मचारी ओ३म् उच्चारण के योग्य होता है ।

संस्कृत व्याख्या—प्राक्कूलान्—प्राक् कूलं येषां ते प्राक्कूलाः तान् पूर्वाग्रभागान् दर्भान्; पर्युपासीनः—अध्यारूढः, पवित्रैः—कुशरचितैः अङ्गुलीयकैः, पावितः—पवित्रीकृतः, एव च, त्रिभिः—त्रिवारैः, प्राणायामैः—स्वासप्रश्वाससंयमयौगिकक्रिया-विशेषैः, पूतः—शुद्धः, ततः—अनन्तरं, ओङ्कारं—प्रणवं, अर्हति—उच्चारणयोग्यः भवति ।

विशेष—पर्युपासीनः—परि व उप उपसर्ग निरर्थक हैं । आसीन पद का सामान्य अर्थ है—एकाग्रता पूर्वक बैठा हुआ । महर्षि पतञ्जलि ने जिस शारीरिक स्थिति से स्थिर सुख मिले, उसे आसन कहा है—'स्थिरसुखमासनम्' ।

—पातञ्जलयोगदर्शन, २.४६

पवित्रैः पावितः—दर्भों से प्राणदेश (हृदय) का स्पर्श उसे पवित्र करना है—'प्राणोपस्पर्शनं दर्भैः प्राक्कूलेष्वासनं च' । —गौतम धर्मसूत्र, १.४९.५०

प्राणायामैः—आसन के सिद्ध हो जाने पर श्वास और प्रश्वास की गति अवरुद्ध करने का नाम प्राणायाम है—'तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः' ।

—पातञ्जललयोगदर्शन, साधनपाद, २.४९

तीन प्राणायाम पन्द्रह मात्रा में पूर्ण होते हैं—'प्राणायामास्त्रयः पञ्चदश-मात्राः' ।

—गौतम धर्मसूत्र, १.४९

प्रणव, व्याहृति एवं शिरस्क गायत्री की तीन आवृत्तियाँ, सम्पूर्ण मिलकर प्राणायाम हैं—

'प्रतिप्रणवसंयुक्तां गायत्रीं शिरसा सह।
त्रिर्जपेदायतप्राणः प्राणायामः स उच्यते ॥'

—याज्ञवल्क्य स्मृति, १.२३

ओंकार तथा व्याहृति की उत्पत्ति—

अकारं चाप्युकारं च मकारं च प्रजापतिः।
वेदत्रयान्निरदुहद् भूर्भुवः स्वरितीति च ॥७६॥

अन्वय—प्रजापतिः अकारं च उकारम् अपि च मकारम् च (इति), भूः भुवः स्वः इति च वेदत्रयात् निरदुहत्।

शब्दार्थ—प्रजापतिः—ब्रह्मा, निरदुहत्—निकाला है।

हिन्दी अर्थ—प्रजापति ब्रह्मा ने क्रमशः अ उ म् इन (तीनों अक्षरों) को तथा भूः, भुवः, स्वः इन (तीनों महाव्याहृतियों) को वेदत्रयी (ऋग्, यजुः, साम) से स्वयं निकाला है।

संस्कृत व्याख्या—प्रजापतिः—प्रकर्षेण जायन्ते इति प्रजाः समस्ताः नित्य-पदार्थाः तेषां, प्रजानां पतिः, विधाता, अकारम्-उकारम्-मकारम् च इति ओङ्कारपदं, भूः—भुवः-स्वः इति च महाव्याहृतित्रयं, वेदत्रयात्—ऋग्यजुःसामरूपात्, निरदुहत्—उद्धृतवान्।

विशेष—ओ३म्—प्लुत के सूचनार्थ मध्य में '३' का अङ्क लिखा जाता है। गुप्त चौथी मात्रा का चिन्तन ब्रह्मज्ञानी करते हैं। समग्र वर्ण अ—कण्ठ्य स्वर और म—ओष्ठ्य व्यञ्जन के मध्य उच्चरित होते हैं अतः इसमें मानो समग्र ब्रह्माण्ड समाहित है। पवित्र एवं मांगलिक होने के कारण यज्ञ, अध्ययन, दान इत्यादि के प्रारम्भ में यह अंकित होता है। तीनों वर्णों में अकार विष्णु का, उकार महेश्वर का एवं मकार ब्रह्मा का बोधक है—

'अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः।
मकारेणोच्यते ब्रह्मा प्रणवेन त्रयो मताः ॥'

अ, उ, म तीनों वर्ण तीनों वेदों के तुल्य सावित्री मन्त्र के तीनों पादों से उद्धृत किए गए हैं।

भूः, भुवः, सुवः (स्वः)—तीन महाव्याहृतियाँ हैं। भूः—इस लोक, अग्नि, ऋक् तथा प्राण की द्योतक है। भुवः—अन्तरिक्ष लोक, वायु, साम एवं अपान की सूचक है। सुवः—द्युलोक, आदित्य यजुः और व्यान की निर्देशक है। इनका ज्ञान प्राप्त करने वाला ब्रह्मज्ञान प्राप्त कर लेता है—'भूर्भुवः सुवरिति वा एतास्तिस्रो व्याहृतयः। भूरिति वा अयं लोकः। भुव इत्यन्तरिक्षम्। सुवरित्यसौ लोकः।

भूरिति वा ऋचः । भुव इति सामानि । सुवरिति यजूँषि । ता यो वेद । स वेद ब्रह्म । भूरिति वै प्राणः । भुव इत्यपानः । सुवरिति व्यानः ।'

—तैत्तिरीयोपनिषद्, शिक्षाध्याय वल्ली, १-३

सावित्री की उत्पत्ति—

त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत् ।
तदित्यृचोऽस्याः सावित्र्याः परमेष्ठी प्रजापतिः ॥७७॥

अन्वय—परमेष्ठी प्रजापतिः त्रिभ्यः एव वेदेभ्यः अस्याः 'तत्' इति ऋचः सावित्र्याः पाद पादम् अदूदुहत् ।

शब्दार्थ—परमेष्ठी—परम स्थान में रहने वाले, तदित्यृचः—'तत्' इस पद से आरम्भ होने वाली ऋचा ।

हिन्दी अर्थ—श्रेष्ठ स्थान में स्थित ब्रह्मा ने ऋग्, यजुः और साम, तीनों वेदों से त्रिपादात्मक गायत्री के तीनों पादों—('तत्सवितुर्वरेण्यं', 'भर्गो देवस्य धीमहि', 'धियो यो नः प्रचोदयात्') को निकाला है ।

संस्कृत व्याख्या—परमेष्ठी—परमे तिष्ठतीति, स्रष्टा, प्रजापतिः—ब्रह्मा, त्रिभ्यः एव वेदेभ्यः—ऋग्यजुःसामलक्षणेभ्यः, अस्या, तदित्यृचः—तत्प्रतीकादिऋचः, सावित्र्याः—सवितृदेवस्तुत्यर्थं गायत्रीछन्दोनिबद्धऋचः, पादं पादं—त्रीन् पादान्, अदूदुहत्—दुदोह ।

विशेष—सावित्र्याः—ऋग्वेद ३.६२.१० में उपलब्ध गायत्री मन्त्र सूर्योपासना हेतु प्रसिद्ध है । यह दान में ग्रहण किए हुए अन्न के दोष, पातक और उपपातक से उपासक को त्राण दिलाती है अतः गायत्री है—'गायन्तं त्रायते इति अथवा गायत्रं गायतेः स्तुतिकर्मणः'—निरुक्त, १.३ ।

सविता के वरेण्य स्वरूप से ऋग्वेद में ज्ञान, देवता की उपासना से यजुर्वेद में क्रिया एवं बुद्धि की प्रेरणा से सामवेद में आनन्द का समावेश स्वीकार किया जाता है । पद्मपुराण में गायत्री को ब्रह्मा की पत्नी कहा गया है । अर्थ इस प्रकार है—हम सविता देवता के वरेण्य स्वरूप की उपासना करते हैं । वह हमारी बुद्धि को प्रेरित करे ।

सावित्री का जप पुण्यप्रद—

एतदक्षरमेतां च जपन्व्याहृतिपूर्बिकाम् ।
संध्ययोर्वेदविद्विप्रो वेदपुण्येन युज्यते ॥७८॥

अन्वय—वेदवित् विप्रः सन्ध्ययोः एतत् अक्षरम् व्याहृतिपूर्बिकाम् एतां च जपन् वेदपुण्येन युज्यते ।

शब्दार्थ—सन्ध्ययोः—सन्ध्योपासना कालों में, जपन्—पुनः पुनः उच्चारण करता हुआ, युज्यते—संचित करता है।

हिन्दी अर्थ—वेदज्ञानी ब्राह्मण प्रातः सायं सन्ध्योपासन काल में इस ओ३म् अक्षर को तथा भूः, भुवः, स्वः इन तीन व्याहृतियों से युक्त गायत्री को जपता हुआ वेदाध्ययन के पुण्य फल को प्राप्त करता है।

संस्कृत व्याख्या—वेदवित्—वेदं वेत्तीति, वेदज्ञः, विप्रः—ब्राह्मणः, सन्ध्ययोः—सायम्प्रातः सन्ध्योपासनकालयोः, एतत् अक्षरं—प्रणवरूपाक्षरं, व्याहृतिपूर्विकां—भूर्भुवः स्वरितिव्याहृतित्रयपूर्विकां, एतां—गायत्रीऋचं, च, जपन्—पुनर्पुनर्पठन्, वेदपुण्येन—वेदस्य वेदाध्ययनस्य पुण्यं तेन, पुण्यफलेन, युज्यते—युक्तो भवति।

विशेष—वेदविद्—अध्ययन प्रारम्भ करने वाले प्रथम उपनीत ब्रह्मचारी का वेदविद् होना सम्भव नहीं। यह पद सम्भवतः गृहस्थ, वानप्रस्थ एवं संन्यास आश्रमों के लिए प्रयुक्त है।

प्रणव, व्याहृति, गायत्री और वेद—इन चारों के परस्पराश्रित सम्बन्ध का विश्लेषण करते हुए कहा गया है कि ऋग्वेद से अग्नि, भूः एवं अकार उत्पन्न हुए, यजुर्वेद से वायु, भुवः एवं उकार उत्पन्न हुए, सामवेद से आदित्य, स्वः एवं मकार उत्पन्न हुए—

'ऋग्वेद एवाग्नेरजायत। यजुर्वेदो वायोः। सामवेद आदित्यात्। तान् वेदान् अभ्यतपत। तेभ्योऽभितप्तेभ्यस्त्रीणि शुक्राण्यजायन्त। भूरित्येव ऋग्वेदादजायत। भुव इति यजुर्वेदात्। स्वरिति सामवेदात्। तानि शुक्राण्यभ्यपतत्। तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायन्त—अकार उकारो मकार इति। तानेकधा समभरत्। तदेतदोमिति।.......एतानि ह वै वेदान्तमन्तः श्लेषणानि। यदेता व्याहृतयः'।

—ऐतरेयब्राह्मण, २५.७

सावित्री का जप पुण्यप्रद—

सहस्रकृत्वस्त्वभ्यस्य बहिरेतत्त्रिकं द्विजः।
महतोऽप्येनसो मासात्त्वचेवाहिर्विमुच्यते ॥७९॥

अन्वय—द्विजः एतत् त्रिकं बहिः सहस्रकृत्वः तु मासात् अभ्यस्य महतः अपि एनसः त्वचा अहिः इव विमुच्यते।

शब्दार्थ—त्रिकं—प्रणव, व्याहृति एवं गायत्री को, महतः—विशालतम, एनसः—पाप से, अहिः—सर्प।

हिन्दी अर्थ—ब्राह्मण, प्रणव, महाव्याहृति एवं गायत्री मन्त्र को (ग्रामादि से)

बाहर (जनशून्य स्थान में) एक सहस्र बार, एक मास पर्यन्त जप कर कांचली से सर्प के समान बड़े पापों से भी छूट जाता है।

संस्कृत व्याख्या—द्विजः—द्विजातिः, एतत् त्रिकं—प्रणवव्याहृतिसावित्रीः, बहिः—ग्रामाद् नगराद् वा बहिः (अरण्यादौ एकान्तस्थले वा) सहस्रकृत्वः—सहस्र-संख्यापर्यन्तं, मासात्—मासपर्यन्तं, अभ्यस्य—पुनरावृत्तिं कृत्वा, महतः—गुरोः, अपि, एनसः—पापकर्मणः, त्वचा—कञ्चुकात्, अहिः—सर्पः इव, विमुच्यते—मुक्तो भवति।

विशेष—यहाँ ब्रह्महत्या आदि अनिष्टदायक पातकों से मुक्ति के लिए प्रायश्चित्त की सरल विधि का कथन है तब दैववश कौन पुरुष जपमात्र से साध्य सरल उपाय को त्याग कर कष्टप्रद उपवास आदि में प्रवृत्त होगा। उत्तर है कि यहाँ गोवध आदि उपपातकों के अनेक प्रायश्चित्त इष्ट नहीं हैं, यहाँ तो प्रेरणा मात्र है। कहा है—जप तथा यज्ञ नियमित रूप से करने वाले का अधःपतन नहीं होता है—'जपतां जुह्वतां चैव विनिपातो न दृश्यते'।

गरुड पुराण में भी कहा गया है कि गायत्री का जप शत बार, सहस्र बार, दस सहस्र बार करने से अनेक रोगों का नाश होता है।

—चतुर्वर्गचिन्तामणि, हेमाद्रि, २.६२-६३

जप के अभाव में दोष—

एतयर्चा विसंयुक्तः काले च क्रियया स्वया।
ब्रह्मक्षत्रियविड्योनिर्गर्हणां याति साधुषु ॥८०॥

अन्वय—एतया ऋचा काले च स्वया क्रियया विसंयुक्तः ब्रह्मक्षत्रियविड्योनिः साधुषु गर्हणां याति।

शब्दार्थ—क्रियया—अग्निहोत्रादि क्रिया, विड्योनिः—वैश्य वंश में उत्पन्न, गर्हणां—निन्दा को।

हिन्दी अर्थ—इस सावित्री ऋचा के जप और उचित समय पर की जाने वाली स्ववर्णाश्रमधर्मानुसार (अग्निहोत्रादि साध्य) क्रियाओं से रहित ब्राह्मण, क्षत्रिय और वैश्य सज्जनों में निन्दा को प्राप्त करता है।

संस्कृत व्याख्या—एतया—पूर्वोक्तया, ऋचा—प्रणवव्याहृतिपूर्विकया गायत्र्या, काले—सन्ध्योपासनवेलायां, स्वया—निजया, क्रियया—अग्निहोत्रादिकर्मणा, विसंयुक्तः—विरहितः, च, ब्रह्मक्षत्रियविड्योनिः—ब्रह्म च क्षत्रियः च विट् च ब्रह्मक्षत्रियविशः, तेषां योनिः—ब्राह्मणक्षत्रियवैश्यवंशोद्भवाः, साधुषु—भद्रजनेषु, गर्हणां—तिरस्कारं, याति—प्राप्नोति।

विशेष—काल—महर्षि व्यास ने समय पर की जाने वाली सन्ध्याओं के पृथक् नाम दिए हैं—पूर्वाह्न में जो सन्ध्या की जाए उसका नाम गायत्री, मध्याह्न में की जाए तो सावित्री तथा सायंकाल में करने पर सरस्वती कही जाती है—

'गायत्री नाम पूर्वाह्णे सावित्री मध्यमे दिने ।
सरस्वती च सायाह्णे, सैव सन्ध्या त्रिषु स्मृता ॥'

संवर्तस्मृति के अनुसार प्रातः सन्ध्या नक्षत्र सहित (रात्रि के अन्तिम प्रहर), सायं सन्ध्या अर्ध-अस्त सूर्य के साथ तथा मध्याह्न सन्ध्या के लिए आठवाँ मुहूर्त उचित काल है—

'प्रातः सन्ध्यां सनक्षत्रमुपासीत यथाविधि ।
सादित्यां पश्चिमां सन्ध्यामर्द्धास्तमितभास्कराम् ॥'
'समसूर्येऽपि मध्याह्ने मुहूर्ते सप्तमोपरि ॥'

गर्हणा—सन्ध्या उपासना चारों वर्णों के लिए उचित है परन्तु ब्राह्मण के लिए अनिवार्य कृत्य है, इसका सम्यक् अनुष्ठान न करने वाला निकृष्टतम श्रेणी का अर्थात् निन्दनीय अब्राह्मण है—

'नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः ॥'

सावित्री महिमा—

ओङ्कारपूर्विकास्तिस्रो महाव्याहृतयोऽव्ययाः ।
त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम् ॥८१॥

अन्वय—ओङ्कारपूर्विकाः अव्ययाः तिस्रः महाव्याहृतयः त्रिपदा सावित्री एव च ब्रह्मणः मुखं विज्ञेयम् ।

शब्दार्थ—अव्ययाः—अक्षय, ब्रह्मणः—ब्रह्म अथवा वेद का ।

हिन्दी अर्थ—ओङ्कारपूर्व वाली, अविनाशी अर्थात् दीर्घकालिक फल वाली, तीन महाव्याहृतियों वाली त्रिपदा गायत्री ही वेद का मुखस्वरूप है ।

संस्कृत व्याख्या—ओङ्कारपूर्विकाः—ओङ्कारः पूर्वं यासां ताः, अव्ययाः—अविनश्वराः, तिस्रः—त्रिसंख्याकाः, महाव्याहृतयः—भूर्भुवः स्वः रूपाः, त्रिपदाः—चरणत्रययुक्ताः, सावित्री—गायत्री, एव च, ब्रह्मणः—परमात्मनः वेदस्य वा, मुखं—आननं द्वारं वा, विज्ञेयं—ज्ञातव्यम् ।

विशेष—आठ मात्राओं से युक्त त्रिपदा गायत्री गाते हुए ब्रह्मा के मुख से निकली है अतः गायत्री है, ब्राह्मण ग्रन्थ भी इसके समर्थक हैं—'गायतो मुखात् उदपतत्' इति च ब्राह्मणम् । —निरुक्त, ७.२

समस्त छन्दों का मुख होने के कारण यह सर्वछन्दात्मक (वेदात्मक) है—'गायत्री छन्दसां मुखम्, गायत्री वाव सर्वाणि छन्दांसि'।

—ताण्ड्यमहाब्राह्मण ६.१.६

सावित्री महिमा—

योऽधीतेऽहन्यहन्येतास्त्रीणि वर्षाण्यतन्द्रितः।
स ब्रह्म परमभ्येति वायुभूतः खमूर्तिमान् ॥८२॥

अन्वय—यः अतन्द्रितः अहनि अहनि त्रीणि वर्षाणि एतान् अधीते सः वायुभूत खमूर्तिमान् परं ब्रह्म अभ्येति।

शब्दार्थ—अतन्द्रितः—निरलस हुआ, अहनि—दिन में, वायुभूतः—सर्व गामी, खमूर्तिमान्—आकाश रूप, परं ब्रह्म—मुक्ति, अभ्येति—प्राप्त कर लेता है।

हिन्दी अर्थ—जो आलस्यरहित होकर प्रतिदिन तीन वर्ष पर्यन्त प्रणव महाव्याहृति सहित गायत्री मन्त्र का जप करता है, वह वायु की भाँति सर्व विचरणशील (अर्थात् सूक्ष्म शरीरी होकर) आकाश स्वरूप होकर परब्रह्म में ली हो जाता है।

संस्कृत व्याख्या—यः—द्विजः, अतन्द्रितः—निरलसः सन्, एकाग्रबुद्ध इत्यर्थः; अहनि अहनि—प्रत्यहं, प्रतिदिवसं; त्रीणि वर्षाणि एतान्—प्रणवव्याहृतिप पूर्वकगायत्रीमन्त्रान्, अधीते—पुनरावृत्तिं करोति, सः, वायुभूतः—वायुरि इच्छाचारी, खमूर्तिमान्—खं एव अस्य मूर्तिरिति, ब्रह्मस्वरूपः, परं ब्रह्म—सच्चिद नन्दस्वरूपं, अभ्येति—लीयते।

विशेष—खमूर्तिमान्—आकाश शरीररहित होता है, अतः यहाँ मूर्ति अर्थ शरीर न होकर सर्वव्यापक स्वभाव गृहीत है।

प्रणवव्याहृतियुक्त गायत्री सम्पूर्ण ब्रह्माण्ड की धर्ता है—'यस्या सर्वमि त्रितम्'।

—गोपथ ब्राह्मण, १.३

अपनी महत्ता से गायत्री परमात्मा सदृश श्रेष्ठ स्वीकार की गई—'गाय छन्दः परमात्मं सरूपम्'।

—महानारायणीय उपनिषद्, ३

सर्वोत्कृष्ट माध्यम—

एकाक्षरं परं ब्रह्म प्राणायामाः परं तपः।
सावित्र्यास्तु परं नास्ति मौनात्सत्यं विशिष्यते ॥८३॥

अन्वय—एकाक्षरं परं ब्रह्म, प्राणायामाः परं तपः, सावित्र्याः तु परं नास्ति मौनात् सत्यं विशिष्यते।

शब्दार्थ—एकाक्षरं—ॐ, मौनात्—शान्त रहने की अपेक्षा, विशिष्यते—
शिष्ट रूप है।

हिन्दी अर्थ—ॐ यह एक अक्षर ही श्रेष्ठ ब्रह्म है, प्राणायाम ही सर्वश्रेष्ठ तप
गायत्री से उत्तम अन्य कोई मन्त्र नहीं है, मौन की अपेक्षा सत्य भाषण
कृष्ट है।

संस्कृत व्याख्या—एकाक्षरं—ॐकाररूपमेकाक्षरं, परं ब्रह्म—ब्रह्मावाप्तिहेतुः,
णायामाः—श्वासप्रश्वासयोर्गतिविच्छेदरूपयौगिकक्रियाविशेषाः, परं तपः—विशिष्टं
पः, साविञ्याः तु, परं—श्रेष्ठं, नास्ति—अन्यत् किञ्चिद् नास्ति, मौनात्—
णोसंयमनात्, सत्यं—अनृतं, विशिष्यते—उत्कृष्टं भवति।

विशेष—एकाक्षर—यम ने नचिकेता को उपदेश देते हुए ॐ अक्षर का महत्व
ताया है—'एतद्ध्येवाक्षरं ब्रह्म, एतद्ध्येवाक्षरं परम्'। —कठोपनिषद्, २.१६

शब्द रूप ब्रह्म में निष्णात पुरुष परब्रह्म का अधिकारी होता है—'शब्दब्रह्मणि
निष्णातः परं ब्रह्माधिगच्छति'।

प्राणायाम—भगवान् श्री कृष्ण ने प्राणायाम को यज्ञ सम उत्कृष्ट माना है—

'अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः॥'

—श्रीमद्भगवद् गीता, ४.२९

मौन—पद के अर्थ हैं—वाणी का संयमन, अनृत वचन का परिहार, वाणी
आदि इन्द्रियों के नियमन द्वारा समाधि को प्राप्त करना।

सत्य—देशकाल के भेद से परे, शाश्वत रूप से स्थित, सर्वलोक हितकारी,
अमृत तत्त्व सत्य है—'नास्ति सत्य समो धर्मः, न सत्याद्विद्यते परम्'।
—महाभारत

नश्वर अनश्वर भेद—

क्षरन्ति सर्वा वैदिक्यो जुहोति यजतिक्रियाः।
अक्षरं दुष्करं ज्ञेयं ब्रह्म चैव प्रजापतिः॥८४॥

अन्वय—सर्वाः वैदिक्यः जुहोतियजतिक्रियाः क्षरन्ति, अक्षरं दुष्करं ज्ञेयं,
ब्रह्म एव च प्रजापतिः।

शब्दार्थ—वैदिक्यः—वैदिक क्रियाएँ, जुहोति—आहुति देना, यजति—यज्ञ
करना।

हिन्दी अर्थ—वेदविहित समस्त हवन तथा यज्ञादि कर्म (फल प्राप्ति के
अनन्तर) विनाशशील हैं, एकमात्र ॐ अक्षर ही अविनाशी, दुर्ज्ञेय, ब्रह्म संज्ञक एवं
प्रजापति है।

संस्कृत व्याख्या—सर्वाः—सकलाः, वैदिक्यः—वेदे भवाः, श्रुतिप्रतिपा… जुहोतियजतिक्रियाः—होमयागादिकर्माणि, क्षरन्ति—विनश्यन्ति, अक्षरं—न क्ष… अक्षरः तं प्रणवम्, अक्षयं, दुष्करं—कठिनं, ज्ञेयं—ज्ञातुं योग्यं, ब्रह्म—ब्रह्मस… एव च, प्रजापतिः—प्रजानाम् अधिपतिः, सृष्टिकर्त्ता ।

विशेष—ॐ—पद एक छोटा-सा अक्षर है किन्तु सम्पूर्ण संसार इ… व्याख्या है, भूत-वर्तमान-भविष्यत्—सब इसी का विस्तार है और जो त्रिका… —है, वह भी ओंकार का ही प्रसार है—

'ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद् भविष्यदिति सर्व… एव । यच्चान्यत्त्रिकालातीतं तदप्योङ्कार एव ।

—माण्डूक्योपनि…

यज्ञ से नश्वर स्वर्ग की प्राप्ति होती है किन्तु ओ३म् के जप से ब्रह्म… तादात्म्य प्रतीति होती है ।

विविध जप श्रेष्ठ—

विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः ।
उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः ॥८५॥

अन्वय—विधियज्ञात् जपयज्ञः दशभिः गुणैः विशिष्टः उपांशुः श… स्यात् मानसः साहस्रः स्मृतः ।

शब्दार्थ—विधियज्ञ—वेदविहित यज्ञ, उपांशुः—होठों ही होठों में… जाने वाला जप, मानसः—चिन्तन रूप ।

हिन्दी अर्थ—दर्शपौर्णमासादि यज्ञों से गायत्री जपयज्ञ दस गुना श्रे… गायत्री जपयज्ञ से उपांशु यज्ञ सौ गुना श्रेष्ठ है तथा उपांशु यज्ञ से मानस यज्ञ… गुना श्रेष्ठ है ।

संस्कृत व्याख्या—विधियज्ञात्—विधिविषयकः यज्ञः विधियज्ञः, त… अमावस्यापूर्णिमादितिथिषु सम्पादितदर्शपौर्णमासादियज्ञात्; जपयज्ञः—ग… पुनरावृत्तिरूपक्रिया, दशभिः—दशगुणाधिकैः, विशिष्टः—उत्कृष्टः, उपां… तन्नामकः यज्ञः, शतगुणः—शतवाराधिकैः श्रेष्ठः, स्यात्—भवेत्, मानसः—मान… यज्ञः, साहस्रः—सहस्रावृत्तैः उत्तमः, स्मृतः—प्रोक्तः ।

विशेष—जप—वाचक, उपांशु और मानस के भेद से तीन प्रकार… होता है—

'त्रिविधो जपयज्ञः स्यात् तस्य भेदान् निबोधत ।
वाचिकश्च ह्युपांशुश्च मानसश्च त्रिधा मतः ।।'

वाचिक के अन्तर्गत दर्शपौर्णमासादि अमावस्या एवं पूर्णिमा तिथियों में न्न होने वाले यज्ञ सम्मिलित हैं।

उपांशु के अन्तर्गत वे जप हैं जो किसी अन्य को सुनाई नहीं देते हैं—'उपगता वो अत्र'। लक्षण इस प्रकार है—

'जिह्वोष्ठौ चालयेत् किञ्चिद्देवतागतमानसः ।
निजश्रवणयोग्यः स्यादुपांशुः (स) जपः स्मृतः ।।'

मानस अर्थात् मन में निरन्तर चलने वाला ब्रह्मचिन्तन—'यत्र जिह्वोष्ठं गपि न चलति, स मानसः।'

यज्ञ सर्वोत्तम—

ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः ।
सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम् ।।८६।।

अन्वय—विधियज्ञसमन्विताः ये चत्वारः पाकयज्ञाः ते सर्वे जपयज्ञस्य षोडशीं ां न अर्हन्ति।

शब्दार्थ—चत्वारः—चार, षोडशीं कलां—सोलहवां भाग (फल प्रदान में न्त तुच्छ)।

हिन्दी अर्थ—दर्शपौर्णमासादि विधियज्ञों सहित सम्पादित बलिवैश्वदेव, , नित्यश्राद्ध, अतिथिभोजन रूप चार पाकयज्ञ, जपयज्ञ के सोलहवें अंश के भी बर नहीं हैं।

संस्कृत व्याख्या—विधियज्ञसमन्विताः—दर्शपौर्णमासादिसहिताः, ये चत्वारः यज्ञाः—बलिवैश्वदेवहोमनित्यश्राद्धातिथिभोजनात्मकाः चतुस्संख्याकयागाः, ते —सकलाः ते, जपयज्ञस्य—गायत्रीमन्त्रार्थभावनरूपः, षोडशीं कलां—षोडशांशं, र्हन्ति—तुल्यो न सन्ति।

विशेष—पाकयज्ञाः—पक्वान्न खीर इत्यादि की आहुति गार्हपत्य अग्नियों में जाती है अतः इन्हें पाकयज्ञ कहते हैं। ये संख्या में पाँच हैं—(१) ब्रह्मयज्ञ,) देवयज्ञ, (३) भूतयज्ञ, (४) मनुष्ययज्ञ, (५) पितृयज्ञ।

'अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथि पूजनम् ।।'

—मनुस्मृति, ३.७०

प्रस्तुत स्थल पर ब्रह्मयज्ञ—वेदाध्ययन को ग्रहण नहीं किया है।

स्नेह परिपूर्ण ब्राह्मण—

जप्येनैव तु संसिध्येद् ब्राह्मणो नात्र संशयः ।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥८७॥

अन्वय—ब्राह्मणः तु जप्येनैव संसिध्येत्, अत्र संशयः न । अन्यत् कुर्यात्, कुर्यात्, मैत्रः ब्राह्मणः उच्यते ।

शब्दार्थ—संसिध्येत्—सिद्धि प्राप्त कर लेता है, संशयः—सन्देह ।

हिन्दी अर्थ—ब्राह्मण जपयज्ञ के माध्यम से ही सिद्धि अर्थात् मोक्षलाभ करता है, इसमें सन्देह नहीं, अन्य कोई वैदिक कर्म करे अथवा न करे, सबके स्नेह भाव रखने से वह ब्राह्मण कहा जाता है

संस्कृत व्याख्या—ब्राह्मणः तु, जप्येन—गायत्रीपुनरावर्तनेन एव, संसिध्ये मुक्तिं भवति, अत्र—अस्मिन्विषये, संशयः—सन्देहः, न—नास्ति, अन्यत्—जप यजतिजुहोत्यादि वैदिककर्म, कुर्यात् न वा कुर्यात्—करोतु न वा करोतु, मैत्रः— भवः, प्राणिदयाशीलः, ब्राह्मणः, उच्यते—कथ्यते ।

विशेष—मैत्र—टीकाकारों के अनुसार मित्र पद के अर्थ इस प्रकार प्राणिजाति को प्रिय, पशु याग न करने वाला, सूर्य देवता से सम्बद्ध गायत्री म उपासक। ब्राह्मण के लिए निर्धारित चार गुणों में से एक है—अवध्यता जि अवशिष्ट तीन गुणों—ब्राह्मण्य (पवित्र पैतृकता), प्रतिरूपचर्या (सदाचरण) लोकपक्ति (वेदाध्ययन द्वारा पूर्ण बनाना) द्वारा सम्पादित कर मानव मात्र का क करता है अतः मैत्र ब्राह्मण कहलाता है—'प्रज्ञा वर्धमाना चतुरो धर्मान् ब्राह्मण निष्पादयति ब्राह्मण्यं प्रतिरूपचर्यां यशो लोकपक्तिं लोकः ।

—शतपथ ब्राह्मण, ११.५

इन्द्रियनिग्रह संयम—

इन्द्रियाणां विचरतां विषयेष्वपहारिषु ।
संयमे यत्नमातिष्ठेद्विद्वान्यन्तेव वाजिनाम् ॥८८॥

अन्वय—विद्वान् अपहारिषु विषयेषु विचरताम् इन्द्रियाणां संयमे, वा यन्ता इव, यत्नम् आतिष्ठेत् ।

शब्दार्थ—अपहारिषु—मनोहर, वाजिनां—घोड़ों को, यन्ता—सारथि

हिन्दी अर्थ—बुद्धिमान् पुरुष चित्त का हरण कर लेने वाली, विष विचरण करती हुई इन्द्रियों का उसी प्रकार निग्रह करे जिस प्रकार सारथि को वश में रखने का प्रयत्न करता है ।

संस्कृत व्याख्या—विद्वान्—विवेकशीलपुरुषः, अपहारिषु—अपहर्तुं येषां ते अपहारिणः, तेषु, चित्ताकर्षकेषु; विषयेषु—रूपरसगन्धस्पर्शघ्राणादिवि

विचरतां—भ्रमतां, वर्तमानानामित्यर्थः, इन्द्रियाणां—ज्ञानमाध्यमिकानां, संयमे—नियमने, वाजिनां—अश्वानां, यन्ता—कुशलशारथिः, इव यत्नं—उपायं, आतिष्ठेत्—कुर्यात् ।

विशेष—भारतीय दर्शन ने मनुष्य को सदा से ही निग्रह की ओर प्रेरित किया है, सर्वत्र विचरणशील मन को संयम की रस्सियों से नियन्त्रित करने का सन्देश दिया है—

'सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव ।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु ।।'

—शुक्लयजुर्वेद, ३४.६

एकादश इन्द्रियाँ—

एकादशेन्द्रियाण्याहुर्यानि पूर्वे मनीषिणः ।
तानि सम्यक्प्रवक्ष्यामि यथावदनुपूर्वशः ।।८९।।

अन्वय—पूर्वे मनीषिणः यानि एकादशेन्द्रियाणि आहुः तानि यथावत् अनुपूर्वशः सम्यक् प्रवक्ष्यामि ।

शब्दार्थ—मनीषिणः—विद्वानों ने, अनुपूर्वशः—अनुक्रम से, सम्यक्—भलीभाँति ।

हिन्दी अर्थ—प्राचीन पण्डितों ने जो ग्यारह इन्द्रियाँ बताई हैं उन्हें यथावत् क्रम से कहता हूँ ।

संस्कृत व्याख्या—पूर्वे—प्राचीनाः, मनीषिणः—पण्डिताः, यानि, एकादशेन्द्रियाणि—ज्ञानेन्द्रियाणि, कर्मेन्द्रियाणि, उभयेन्द्रियं, आहुः—वदन्ति, तानि, यथावत्—सम्यक् रीत्या, नामतः कर्मतश्च इत्यर्थः, अनुपूर्वशः—क्रमानुसारतः, प्रवक्ष्यामि—कथयिष्यामि ।

इन्द्रिय संज्ञा—

श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
पायूपस्थं हस्तपादं वाक्चैव दशमी स्मृता ।।९०।।

अन्वय—श्रोत्रं त्वक् चक्षुषी जिह्वा पञ्चमी नासिका च एव पायूपस्थं हस्तपादं वाक् च दशमी एव स्मृता ।

शब्दार्थ—पायु—गुदा, उपस्थं—जननेन्द्रिय ।

हिन्दी अर्थ—कान, त्वचा, नेत्र, जिह्वा, पाँचवीं इन्द्रिय नाक, गुदा, जननेन्द्रिय, हाथ, पैर और दसवीं इन्द्रिय वाणी कही गई है ।

संस्कृत व्याख्या—एकादशसु—इन्द्रियेषु, श्रोत्रं—कर्णद्वयं, त्वक्—चर्म,

चक्षुषी—नयने, जिह्वा—रसना, पञ्चमी—पञ्चसंख्यापूरणी, नासिका—घ्राणेन्द्रियं, चैव, पायूपस्थं—पायु-गुदा च, उपस्थं—जननेन्द्रियं, च तयोः समाहारः; हस्तपादं—हस्तौ च पादौ च, अनयोः समाहारः, पाणिचरणं; वाक्—वाणी, च, एव, दशमी—दशसंख्यापूरणी, स्मृता—प्रसिद्धा।

विशेष—चक्षुषी—पद अधिष्ठान के भेद से द्विवचन में प्रयुक्त है।

पायूपस्थम् हस्तपादं—द्वन्द्व भाव के प्रभाव से (प्राणि अंग होने के कारण) समाहार—'द्वन्द्वश्चप्राणितूर्यसेनाङ्गानाम्'।

—अष्टाध्यायी, २.४.२

ज्ञानेन्द्रिय कर्मेन्द्रिय विभाग—

बुद्धीन्द्रियाणि पञ्चैषां श्रोत्रादीन्यनुपूर्वशः।
कर्मेन्द्रियाणि पञ्चैषां पाय्वादीनि प्रचक्षते ॥९१॥

अन्वय—एषाम् अनुपूर्वशः श्रोत्रादीनि पञ्च बुद्धीन्द्रियाणि एषां पाय्वादीनि पञ्च कर्मेन्द्रियाणि प्रचक्षते।

शब्दार्थ—बुद्धीन्द्रियाणि—ज्ञानेन्द्रियाँ, प्रचक्षते—कही गई हैं।

हिन्दी अर्थ—इन दस इन्द्रियों में से क्रम से प्रथम पाँच ज्ञानेन्द्रियाँ हैं तथा पायु आदि पाँच कर्मेन्द्रियाँ कही गई हैं।

संस्कृत व्याख्या—एषां—पूर्वकथितानां, अनुपर्वशः—क्रमशः, श्रोत्रादीनि—कर्णप्रभृतीनि, पञ्च—पञ्चसंख्याकानि, बुद्धीन्द्रियाणि—ज्ञानेन्द्रियाणि, तथा, पाय्वादीनि—गुदप्रभृतीनि, कर्मेन्द्रियाणि, प्रचक्षते—विद्वद्भिः कथिताः।

विशेष—कार्य भेद से इनके दो विभाग किए गए—

(१) बुद्धीन्द्रिय—विशेष ज्ञान की जनक।

(२) कर्मेन्द्रिय—उत्सर्ग आदि कर्मों में साधन रूप।

ग्यारहवीं इन्द्रिय मन—

एकादशं मनो ज्ञेयं स्वगुणेनोभयात्मकम्।
यस्मिञ्जिते जितावेतौ भवतः पञ्चकौ गणौ ॥९२॥

अन्वय—स्वगुणेन उभयात्मकम् एकादशं मनः ज्ञेयं। यस्मिन् जिते एतौ पञ्चकौ गणौ जितौ भवतः।

शब्दार्थ—उभयात्मकं—उभय स्वरूप, गणौ—दोनों समूह।

हिन्दी अर्थ—अपने गुणों—ज्ञानात्मक एवं क्रियात्मक—दोनों से ग्यारहवीं इन्द्रिय मन को जानना चाहिए, जिसे जीत लेने पर उपर्युक्त पाँच-पाँच इन्द्रियों (कर्मेन्द्रियों तथा ज्ञानेन्द्रियों) के समूहों पर विजय प्राप्त हो जाता है।

संस्कृत व्याख्या—स्वगुणेन—स्वस्य गुणः स्वगुणः, तेन, आत्मनः संकल्प-विकल्पात्मकेन वैशिष्ट्येन; उभयात्मकं—ज्ञानक्रियास्वरूपात्मकं, एकादशं—एकादश-संख्यापूरणं, मनः—चित्त, ज्ञेयं—ज्ञातव्यं, यस्मिन्—मनसि, जिते—वशीकृते, एतौ—उपरिकथितौ, पञ्चकौ गणौ—ज्ञानक्रियारूपदशेन्द्रियाणां समूहौ, जितौ—वशीकृतौ, भवतः।

विशेष—मनः—शुभ तथा अशुभ संकल्पों वाला मन अन्तर् इन्द्रिय है—'तन्मे मनः शिवसंकल्पमस्तु'।

—शुक्ल यजुर्वेद, ३४.१.६

विवेकशील और संयमीपुरुष अन्तरात्मा से पवित्र होकर ईश्वर के परम पद का अधिकारी होता है—

'यस्तु विज्ञानवान् भवति समनस्कः सदाशुचिः।
स तु तत्पदमाप्नोति यस्माद् भूयो न जायते॥'

—कठोपनिषद्, ३.८

इन्द्रिय संयम से सिद्धि—

इन्द्रियाणां प्रसङ्गेन दोषमृच्छत्यसंशयम्।
संनियम्य तु तान्येव ततः सिद्धिं नियच्छति॥६३॥

अन्वय—इन्द्रियाणां प्रसङ्गेन असंशयं दोषम् ऋच्छति। तानि एव सन्नियम्य तु ततः सिद्धिं नियच्छति।

शब्दार्थ—प्रसङ्गेन—प्रसक्त होने से, ऋच्छति—प्राप्त करता है, नियच्छति—नियन्त्रण में कर लेता है।

हिन्दी अर्थ—इन्द्रियों के विषयों में आसक्ति होने से मनुष्य निःसन्देह दोषगामी होता है किन्तु उन्हीं इन्द्रियों को नियन्त्रित कर लेने से निश्चय ही सिद्धि को प्राप्त करता है।

संस्कृत व्याख्या—इन्द्रियाणां—ज्ञानक्रियागणानामिन्द्रियाणां, प्रसङ्गेन—आसक्त्या, असंशयं—निःसन्देहं, दोषं—कामक्रोधादिविकारं, पुनर्जन्मरूपदुःखं वा; ऋच्छति—प्राप्नोति, तानि—इन्द्रियाणि, एव, सन्नियम्यवशीकृत्य, तु, ततः—पश्चात्, सिद्धिं—मोक्षरूपपुरुषार्थं, नियच्छति—प्राप्नोति।

विशेष—**सिद्धिम्**—अतिमानवीय शक्ति अथवा अहेतुक अद्भुत सफलता अथवा चमत्कार। अष्ट सिद्धियों के नाम इस प्रकार हैं—

'अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा।
ईशित्वञ्च वशित्वञ्च सर्वकामावसायिता॥'

—ब्रह्मवैवर्तपुराण, १.६.१८

भगवान् कृष्ण ने सिद्धि को ब्रह्म के समकक्ष माना है—'सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध में'।

—श्रीमद्भगवद् गीता, १८.५०

विषयों के उपभोग से इच्छाओं की वृद्धि—

न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥६४॥

अन्वय—कामः कामानाम् उपभोगेन जातु न शाम्यति हविषा कृष्णवर्त्मा इव भूय एव अभिवर्धते।

शब्दार्थ—जातु—कदाचित्, हविषा—आहुति से, कृष्णवर्त्मा—अग्नि।

हिन्दी अर्थ—तृष्णा विषयों के उपभोग से कभी शान्त नहीं होती है वरन् घी इत्यादि की आहुति से अग्नि के समान पुनः-पुनः बढ़ती जाती है।

संस्कृत व्याख्या—कामः—मनोरथः, कामानां—विषयाणां, उपभोगेन—आस्वादनेन, जातु—कदाचिदपि, न, शाम्यति—शान्तो भवति, हविषा—घृतान्नादि-प्रदानेन, कृष्णवर्त्मा—अग्निः, इव, भूयः—अधिकतमं एव, अभिवर्धते—सर्वथा वर्धते।

विशेष—एक आवश्यकता दूसरी आवश्यकता को जन्म देती है और इस प्रकार एक अनन्त शृंखला बनती चली जाती है, अतः आवश्यकताओं का यथाशक्ति परित्याग आवश्यक है—

'यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः।
एकस्यापि न पर्याप्तं तदित्यतितृषं त्यजेत् ॥'

—विष्णुपुराण, ४.२.२४

उपभोग की अपेक्षा परित्याग श्रेष्ठ—

यश्चैतान्प्राप्नुयात्सर्वान्यश्चैतान्केवलांस्त्यजेत्।
प्रापणात्सर्वकामानां परित्यागो विशिष्यते ॥६५॥

अन्वय—यः च एतान् सर्वान् प्राप्नुयात्, यः च एतान् (सर्वान्) केवलान् त्यजेत्, (उभयोः) सर्वकामानां प्रापणात् परित्यागः विशिष्यते।

शब्दार्थ—केवलान्—भोगों को, प्रापणात्—उपलब्धि से।

हिन्दी अर्थ—जो मनुष्य इन सम्पूर्ण विषयों के सुखों को प्राप्त कर ले और जो इन समग्र विषय सुखों का त्याग कर दे, उन दोनों में समस्त कामनाओं के उपभोग की अपेक्षा परित्याग करने वाला मनुष्य श्रेष्ठ है।

संस्कृत व्याख्या—यः—कश्चित्पुरुषः, च, एतान्—उपर्युक्तान्, सर्वान्—

इन्द्रियविषयकसकलभोगान्, प्राप्नुयात्—उपभुञ्जीत, यः च, एतान् केवलान्—सर्वाभिलाषान्, त्यजेत्—उपेक्षेत, सर्वकामानां—समग्रविषयाणां, प्रापणात्—उपभोगात्, परित्यागः—पराङ्मुखत्वं, विशिष्यते—श्रेयस्करोऽस्ति।

विशेष—भौतिकता का वरण आरम्भ में सुखदायी किन्तु अन्ततः दुःखापूर्ण है, इसके विपरीत अपवर्ग के प्रति प्रयास आरम्भ में अभ्यास के अभाव में कष्टसाध्य है किन्तु परिणाम आत्यन्तिक सुख है—

अन्यच्छ्रेयोऽन्यदुतैव प्रेयस्ते उभे नानार्थे पुरुषं सिनीतः।
तयोः श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उप्रेयो वृणीते ॥'

—कठोपनिषद्, २.१

इन्द्रिय संयम का उपाय—

न तथैतानि शक्यन्ते सन्नियन्तुमसेवया।
विषयेषुप्रजुष्टानि यथा ज्ञानेन नित्यशः ॥६६॥

अन्वय—विषयेषु प्रजुष्टानि एतानि असेवया सन्नियन्तुं तथा न शक्यन्ते यथा नित्यशः ज्ञानेन।

शब्दार्थ—प्रजुष्टानि—प्रीति रखने वाली, असेवया—निषेध से।

हिन्दी अर्थ—विषय भोगों में आसक्त इन्द्रियों पर सर्वदा ज्ञान से जिस प्रकार नियन्त्रण रखा जा सकता है वैसा विषयों के सेवन न करने से नहीं।

संस्कृत व्याख्या—विषयेषु—ऐन्द्रियरूपरसगन्धस्पर्शशब्देषु, प्रजुष्टानि—प्रेम्णा प्रसक्तानि, एतानि—एकादशेन्द्रियाणि, असेवया—न सेवया, सन्नियन्तुं—वशीकर्तुं, तथा—तथाविधेन न शक्यन्ते, यथा—यथाविधेन, नित्यशः—सर्वदा, ज्ञानेन—नित्यानित्यविवेकेन।

विशेष—कामनादहन की सामर्थ्य से युक्त विवेकबुद्धि का आश्रय लेकर श्रेय के मार्ग पर अग्रसर होना कल्याणकर हो सकता है, यह सन्देश अन्यत्र भी सन्निहित है—

'यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥'

—श्रीमद्भगवद्गीता, ४.३७

इन्द्रियों के द्वारा विषयों को ग्रहण न करने वाले पुरुष की आसक्ति भी परमात्मा के साक्षात्कार का माध्यम बनती है—

'विषया विनिवर्तन्ते निराहारस्य देहिनः।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा विनिवर्तते ॥'

—श्रीमद्भगवद्गीता, २.५९

दुर्भावना से सिद्धि नहीं—

वेदास्त्यागश्च यज्ञाश्च नियमाश्च तपांसि च ।
न विप्रदुष्टभावस्य सिद्धिं गच्छन्ति कर्हिचित् ॥९७॥

अन्वय—विप्रदुष्टभावस्य वेदाः त्यागः च यज्ञाः च नियमाः च तपांसि च कर्हिचित् सिद्धिं न गच्छन्ति ।

शब्दार्थ—विप्रदुष्टभावस्य—दूषित अन्तःकरण वाले व्यक्ति का, सिद्धिं—सफलता को ।

हिन्दी अर्थ—दूषित भावना वाले मनुष्य का वेदाध्ययन, दान, यज्ञानुष्ठान, नियमपालन और तपस्या कभी सफल नहीं होते हैं ।

संस्कृत व्याख्या—विप्रदुष्टभावस्य—विशेषेण प्रदुष्टः भावः यस्य सः, दूषित-मनोवृत्तेः जनस्य; वेदाः—वेदाध्ययनं, त्यागः—दानं, च, यज्ञाः—यागादयः क्रियाः, च, नियमाः—व्रतादयः, च, तपांसि—तपश्चरणानि, च कर्हिचित्—कदाचन, सिद्धिं—सफलतां, न, गच्छन्ति—प्राप्नुवन्ति ।

विशेष—मुक्ति की ओर जाने वाला प्रत्येक मार्ग अलभ्य है यदि व्यक्ति का मन पवित्र नहीं है—

'नाविरतो दुश्चरितान्ना शान्तो ना समाहितः ।
नाशान्त मानसो वापि प्रज्ञानेनैनमाप्नुयात् ॥'

—कठोपनिषद्, २.२४

जितेन्द्रिय परिचय—

श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः ।
न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः ॥९८॥

अन्वय—यः नरः श्रुत्वा स्पृष्ट्वा च भुक्त्वा च घ्रात्वा च न हृष्यति न ग्लायति, स जितेन्द्रियः विज्ञेयः ।

शब्दार्थ—स्पृष्ट्वा—स्पर्श करके, घ्रात्वा—सूंघ करके, हृष्यति—हर्षित होता है, ग्लायति—ग्लानियुक्त होता है ।

हिन्दी अर्थ—जो मनुष्य (प्रशंसा-निन्दा) सुनकर (चिकने-रूक्ष) का स्पर्श कर (सुन्दर-असुन्दर को) देखकर (स्वादिष्ट-स्वादहीन को) खा कर (सुगन्ध-दुर्गन्ध को) सूंघ कर न तो हर्षित होता है और न खिन्न, उसे जितेन्द्रिय जानना चाहिए ।

संस्कृत व्याख्या—यः, नरः—सज्जनः, श्रुत्वा—मधुरकर्णकटुशब्दं वा निशम्य, स्पृष्ट्वा—कोमलकठिनं वा स्पृश्य, च, दृष्ट्वा—सुरूपकुरूपं वा अवलोक्य, च, भुक्त्वा—सुस्वादुनीरसं वा खादित्वा, च, घ्रात्वा—सुरभिदुर्गन्धि वा आघ्राय, च न,

हृष्यति—प्रसीदति, न, ग्लायति—विषीदति, सः, जितेन्द्रियः—जितानि इन्द्रियाणि येन सः, संयमेन्द्रियः, विज्ञेयः—ज्ञातव्यः ।

विशेष—द्वन्द्वों के भीषण आघात में अविचलित भाव से स्थिर खड़े रहना वास्तव में कठिन है, प्रशंसनीय है, मार्ग प्रशस्तकारक है—

'न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसंमूढो ब्रह्मविद् ब्रह्मणि स्थितः ॥'

—श्रीमद्भगवद्गीता, ५.२०

असंयम से प्रज्ञा क्षय—

इन्द्रियाणां तु सर्वेषां यद्येकं क्षरतीन्द्रियम् ।
तेनास्य क्षरति प्रज्ञा दृतेः पादादिवोदकम् ॥९९॥

अन्वय—सर्वेषां तु इन्द्रियाणां यदि एकम् इन्द्रियं क्षरति, तेन अस्य दृतेः पादात् उदकम् इव प्रज्ञा क्षरति ।

शब्दार्थ—क्षरति—स्खलित होती है, दृतेः—चर्मपात्र (मशक), उदकं—जलं, प्रज्ञा—बुद्धि ।

हिन्दी अर्थ—सभी एकादश इन्द्रियों में से यदि एक भी इन्द्रिय विषयासक्त है तो उससे उस मनुष्य की विवेक बुद्धि का नाश उसी प्रकार होता है जिस प्रकार चर्मपात्र के छिद्र से जल बह जाता है ।

संस्कृत व्याख्या—सर्वेषां तु इन्द्रियाणां—एकादशेन्द्रियाणां मध्ये, यदि—चेत्, एकम् इन्द्रियं—नेत्रादिकं, क्षरति—स्खलयति, तेन—च्युतेन्द्रियेण, अस्य—मानवस्य, दृतेः—चर्मपात्रात्, पादात्—छिद्रात्, उदकं—जलं, इव, प्रज्ञा—सदसद्विवेकिनी बुद्धिः, क्षरति—विनश्यति ।

विशेष—मनुष्य की किसी एक विषय में रञ्चमात्र भी आसक्ति शेष रहने पर उसकी बुद्धि परमात्मा के स्वरूप में स्थिर नहीं हो पाती है । प्रमथन स्वभाव वाली इन्द्रियाँ ही आसक्ति का कारण हैं—

'इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ।'

—श्रीमद्भगवद्गीता, २.६०

क्षरति—अन्तरतम का नितान्त शून्यत्व क्षरण है—

'अन्तःसारशून्यतागामित्वसूचकम् ।'

इन्द्रिय संयम पुरुषार्थ का हेतु—

वशे कृत्वेन्द्रियग्रामं संयम्य च मनस्तथा ।
सर्वान्संसाधयेदर्थानक्षिण्वन् योगतस्तनुम् ॥१००॥

अन्वय—इन्द्रियग्रामं वशे कृत्वा मनः संयम्य च तथा योगतः तनुम् अक्षिण्वन् सर्वान् अर्थान् संसाधयेत् ।

शब्दार्थ—ग्रामं—समूह को, योगतः—योगानुसार, अक्षिण्वन्—क्षीण न करते हुए ।

हिन्दी अर्थ—इन्द्रियों के समूह को वश में कर, मन को संयमित कर, योग के माध्यम से शरीर को संरक्षित कर, मनुष्य सब अर्थों (धर्म-अर्थ-काम-मोक्ष, चारों पुरुषार्थों) को सिद्ध करे ।

संस्कृत व्याख्या—इन्द्रियग्रामं—इन्द्रियाणां ग्रामं, इन्द्रियसमूहं; वशे कृत्वा—जित्वा, मनः—चित्तं, संयम्य—वशीकृत्य, च तथा, योगतः—यौगिकविधेः, तनुं—शरीरं, अक्षिण्वन्—संरक्षन्, सर्वान् अर्थान्—धर्मार्थकाममोक्षरूपपुरुषार्थान्, संसाधयेत्—सम्यक् लभ्येत ।

विशेष—**योगतः**—हठयोग की प्रवृत्ति द्वारा इन्द्रियों पर अस्वाभाविक नियन्त्रण सर्वथा अनुचित है; उससे इन्द्रियाँ अवसर पाते ही उच्छृंखल हो जाती हैं, मन का नियन्त्रण ही वास्तविक है—'योगश्चित्तवृत्तिनिरोधः' ।

—पातञ्जलयोगदर्शन, १.२

टीकाकारों ने अन्य अर्थ भी किए हैं—युक्तिपूर्वक, क्रम से प्रवृत्त होना, यथोचित, विशेष सावधानीपूर्वक, उपायपूर्वक, देवता आदि की उपासनापूर्वक—मन्तव्य सब का एक ही है—शरीर को पीड़ा न देते हुए ।

अर्थान् (पुरुषार्थ)—पुरुष द्वारा प्राप्त करने योग्य पदार्थ पुरुषार्थ है । पद्म-पुराण के अनुसार धर्म से अर्थ, अर्थ से काम एवं काम से मोक्ष रूप पुरुषार्थ का क्रमशः उदय होता है—

'धर्मादर्थोऽर्थतः कामः कामाद्धर्मफलोदयः ।
इत्येवं निर्णयं शास्त्रे प्रवदन्ति विपश्चितः ॥'

सन्ध्योपासना काल—

पूर्वां सन्ध्यां जपंस्तिष्ठेत्सावित्रीमर्कदर्शनात् ।
पश्चिमां तु समासीनः सम्यगृक्षविभावनात् ॥१०१॥

अन्वय—पूर्वां सन्ध्यां आ अर्कदर्शनात् सावित्रीं जपन् तिष्ठेत् (आ) ऋक्ष विभावनात् पश्चिमां सम्यक् समासीनः (तिष्ठेत्) ।

शब्दार्थ—आ अर्कदर्शनात्—सूर्योदय पर्यन्त, आ ऋक्षविभावनात्—नक्षत्रों के निकलने तक ।

हिन्दी अर्थ—प्रातःकालीन सन्ध्योपासना में सूर्योदयपर्यन्त खड़े होकर गायत्री

का जप करे तथा सायंकालीन सन्ध्योपासना में तारों के उदय होने तक भली-भाँति बैठ कर गायत्री का जप करे।

संस्कृत व्याख्या—पूर्वां सन्ध्यां—प्रात:सन्ध्योपासनां, आ अर्कदर्शनात्—सूर्योदयपर्यन्तं, सावित्रीं—गायत्रीमन्त्रं, जपन्—अभ्यसन्, तिष्ठेत्—एकासनस्थितिं कुर्यात्, आ ऋक्षविभावनात्—ऋक्षाणां विभावनं तस्मात्, नक्षत्रदर्शनपर्यन्तं, पश्चिमां—सान्ध्यकालिकसन्ध्योपासनां, सम्यक्—सुष्ठु प्रकारेण, समासीन:—उपविष्ट:।

विशेष—सन्ध्या—सविता की उपासना के कारण इसे सावित्र काल कहा गया है। यह वह काल है जब द्युलोक में प्रकाश तथा पृथ्वी पर अन्धकार फैला हो—'दिवि प्रकाशो भुवि चान्धकार: काल: स सावित्र इति प्रदिष्ट:।'

सान्ध्य वेला एक ज्योति के लुप्त होने के अनन्तर दूसरे ज्योतिष्मान् के दर्शन तक की अवधिवाली मानी गई है। इस समय न तो सम्पूर्ण अन्धकार होता है और न परिपूर्ण प्रकाश—'न सर्वं तम: क्षीणं नापि परिपूर्ण: प्रकाश एषा सन्ध्या।'

'उपास्ते सन्धिवेलायां निशाया दिवसस्य च।
तामेव सन्ध्यां तस्मात्तु प्रवदन्ति मनीषिण:॥'

—महर्षि व्यास के अनुसार

दिवस और रात्रि की सन्धि में भक्तिभाव से परिपूर्ण पूजादि क्रिया के कारण यह सन्ध्या है अथवा सम्यक् रूप से ध्यान के कारण यह सन्ध्या है—'सम्यक् ध्यायन्त्यस्यामिति' अथवा दोनों कालों को धारण करती है अत: यह सन्ध्या है—'संदधातीति।'

मध्याह्न भी सन्ध्याकाल है अत: तीनों सन्ध्याकालों में जो उपासना की जाती है वह त्रिकाल सन्ध्या है। महर्षि याज्ञवल्क्य ने सन्ध्या के लक्षण में, तीनों वेदों (ऋक्, यजु:, साम), तीनों देवों (ब्रह्मा, विष्णु, महेश) और समस्त श्रेष्ठत्व का समागम अधिगृहीत कर इसे सन्ध्या नाम दिया है—

'त्रयाणाञ्चैव वेदानां ब्रह्मादीनां समागम:।
सन्धि: सर्वसुराणाञ्च तेन सन्ध्या प्रकीर्तिता॥'

उदित अनुदित आदि होम करने वालों के लिए सन्ध्या उपासना के पश्चात् होम का विधान किया गया है। महर्षि याज्ञवल्क्य के अनुसार सन्ध्याकाल मुहूर्तमात्र स्थाई होता है—

'ह्रासवृद्धौ तु सततं दिवसानां यथाक्रमम्।
संध्या मुहूर्तमात्रं तु ह्रासे वृद्धौ च सा स्मृता॥'

—महर्षि व्यास के अनुसार

चौबीस मिनट की एक घटिका (घड़ी) तथा दो घटिका अर्थात् अड़तालीस मिनट का एक मुहूर्त होता है--संस्कृत हिन्दी कोष, आप्टे। यह अलस्थाई काल थोड़ा विलम्ब करने पर सूक्ष्मता के कारण पता ही नहीं लगता है। —मेधातिथि

तिष्ठेत्—प्रभात में आलस्य परित्याग के लिए खड़ा रहे।

समासीनः—सायंकाल शान्ति की इच्छा से बैठे।

सन्ध्योपासना का फल—

पूर्वां संध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहति।
पश्चिमां तु समासीनो मलं हन्ति दिवाकृतम् ॥१०२॥

अन्वय—पूर्वां सन्ध्यां जपन् तिष्ठेत् नैशम् एनः व्यपोहति। पश्चिमां समासीनः तु दिवाकृतं मलं हन्ति।

शब्दार्थ—नैशं—रात्रिकालीन, व्यपोहति—नष्ट करता है, मलं—अशुभ को।

हिन्दी अर्थ—प्रातः सन्ध्या में खड़े होकर गायत्री जप करने से व्यक्ति रात्रिकालीन पाप को दूर करता है तथा सायंकाल में बैठ कर गायत्री जप करने से व्यक्ति दिन में किए गए अशुभ कर्म को नष्ट करता है।

संस्कृत व्याख्या—पूर्वां सन्ध्यां—प्रातःकालोपासनायां, जपन्—गायत्रीमभ्यसन्, तिष्ठेत्, नैशं—निशायां भवं, निशार्जितं; एनः—पापं, व्यपोहति—नाशयति, पश्चिमां—सायंकालार्चने, समीसीनः—उपविष्टः, दिवाकृतं—दिवससञ्चितं, मलं—पापकर्म, हन्ति—समापयति।

विशेष—सभी टीकाकारों के अनुसार स्थान व आसन गौण है, सान्ध्यकालीन सावित्री जप फलवान् होने के कारण प्रधान है।

महर्षि याज्ञवल्क्य के अनुसार त्रिकालसन्ध्या सार्वकालिक पापों की नाशिका है—

'दिवा वा यदि वा रात्रौ यदज्ञानकृतं भवेत्।
त्रिकालसन्ध्याकरणात्तत्सर्वं विप्रणश्यति ॥'

मनीषियों ने सार्वकालिक पाप को—कायिक, वाचिक एवं मानसिक तीन श्रेणियों में विभक्त किया है। सामान्य रूप से गृहस्थ के गृह में चूल्हा, चक्की, झाड़ू, ओखली और जल रखने के स्थान में हिंसा से तथा अन्यान्य प्रकार से सार्वकालिक पापकर्म होते ही रहते हैं—

'कण्डनी पेषणी चुल्ली उदकुम्भी च मार्जनी।
पञ्च सूना गृहस्थस्य वर्तन्तेऽहरहः सदा ॥'

संध्याहीन बहिष्कार्य—

न तिष्ठति तु यः पूर्वां नोपास्ते यश्च पश्चिमाम् ।
स शूद्रवद्बहिष्कार्यः सर्वस्माद् द्विजकर्मणः ॥१०३॥

अन्वय—यः तु पूर्वां न तिष्ठति, यः च पश्चिमां न उपास्ते, सः शूद्रवत् सर्वस्मात् द्विजकर्मणः बहिष्कार्यः ।

शब्दार्थ—पूर्वां—प्रातःकालीन, पश्चिमां—सायंकालीन ।

हिन्दी अर्थ—जो द्विज प्रातःकालीन तथा सान्ध्यकालीन सन्ध्योपासना नहीं करता है उसे समस्त द्विजकर्मों से शूद्र के समान बहिष्कृत कर देना चाहिए ।

संस्कृत व्याख्या—यः द्विजः, तु-पुनः, पूर्वां—प्रातःसन्ध्यां, न, तिष्ठति-अनुष्ठानं करोति, यः च, पश्चिमां—सायंपूजां, न, उपास्ते—सेवते, सर्वस्मात्—सकलात्, द्विजकर्मणाः—द्विजस्य कर्म, तस्मात्—अतिथिसत्काराध्ययनाध्यापनादि-ब्राह्मणाधिकारात्, शूद्रवत्—चतुर्थवर्णवत्, बहिष्कार्यः—निःसार्यः ।

विशेष—ब्राह्मण्य तीन सन्ध्याओं में पाया जाता है, जो सन्ध्योपासना नहीं करता वह ब्राह्मण नहीं है—गोभिलस्मृति, १-१ । अतः राजा के लिए आवश्यक है कि वह सन्ध्या न करने वाले ब्राह्मणों से शूद्र का काम ले—

'सायं प्रातः सदा सन्ध्यां ये विप्रा नो उपास्ते ।
कामं तान् धार्मिको राजा शूद्रकर्मसु योजयेत् ॥

—बौधायन धर्मसूत्र २-४-२०

सावित्री जपविधान—

अपां समीपे नियतो नैत्यकं विधिमास्थितः ॥
सावित्रीमप्यधीयीत गत्वाऽरण्यं समाहितः ॥१०४॥

अन्वय—अरण्यं गत्वा समाहितः अपां समीपे नैत्यकं विधिम् आस्थितः नियतः सावित्रीम् अपि अधीयीत ।

शब्दार्थ—अपां—जल के, नैत्यकं—दैनिक, आस्थितः—अनुष्ठान को प्रस्तुत ।

हिन्दी अर्थ—वन अर्थात् एकान्त स्थल में जाकर, एकाग्रचित्त से, जल के समीप दैनन्दिन कृत्यों का सम्पादन कर नियमपूर्वक गायत्री का भी अध्ययन (जप) करे ।

संस्कृत व्याख्या—अरण्यं—वनं निर्जनस्थलं वा, गत्वा—उपगम्य, समाहितः—एकाग्रचित्तः, अपां समीपे—जलसन्निकटे, नैत्यकं—नित्ये भवं, दैनिकं; विधि—क्रियाकलापं, आस्थितः—विहितः, नियतः—नियमेन, सावित्रीं—प्रणवमहाव्याहृति-युक्तगायत्रीं अपि, अधीयीत—अभ्यसेत् ।

विशेष—अरण्यम्—अनेक धर्मशास्त्रों ने गाँव के बाहर पवित्र एकान्त स्थल, गौशाला, विष्णुमन्दिर अथवा शिवालय, नदी तट अथवा उसके अभाव में जल पूर्ण कमण्डल इत्यादि के पास सन्ध्या करना क्रम से दस गुना, लाख गुना या असंख्य गुना श्रेष्ठ माना है।

—धर्मशास्त्र का इतिहास, काणे, पृ० २२७

नैत्यकं विधिम्—नित्य कर्म ही नैत्यक विधि है। इन कर्मों को न करने से पुण्य नहीं होता है किन्तु न करने से पाप लगता है, अतः नित्यकर्म अवश्य करणीय है। ये वस्तुतः प्रतिदिन अज्ञान में होने वाले पापों के विनाश हेतु किए जाते हैं। ब्रह्मचारी के पक्ष में यह ब्रह्मयज्ञ वेदाध्ययन की अनध्याय (अवकाशरहित) विधि को बताते हैं।

अनध्याय की अविचार्यता—

वेदोपकरणे चैव स्वाध्याये चैव नैत्यके।
नानुरोधोऽस्त्यनध्याये होममन्त्रेषु चैव हि ॥१०५॥

अन्वय—वेदोपकरणे, च एव, नैत्यके स्वाध्याये च एव, होममन्त्रेषु च एव, अनध्याये अनुरोधः न अस्ति।

शब्दार्थ—वेदोपकरणे—वेदों के उपकारक वेदाङ्गों के अध्ययन में, अनध्याये—अध्ययन का व्यतिक्रम, अनुरोध—आग्रह।

हिन्दी अर्थ—वेदांग अध्ययन, नित्य अनुष्ठेय ब्रह्मयज्ञ रूप स्वाध्याय में तथा अग्निहोत्रादि होममन्त्रों में अनध्याय (अवकाश) का विचार नहीं है।

संस्कृत व्याख्या—वेदोपकरणे—वेदस्य उपकरणं तस्मिन् वेदाङ्गे, चैव, नैत्यिके—नित्ये भवः नैत्यकः, तस्मिन्, दैनिकपाठे, स्वाध्याये—वेदाध्ययने ब्रह्मयज्ञे वा, चैव, होममन्त्रेषु—होमस्य मन्त्राः होममन्त्राः तेषु अग्निहोत्रादि होमार्थं निर्धारित-मन्त्रेषु, अनध्याये—अध्ययनाभावे, अनुरोधः—आग्रहः, नास्ति—न कर्त्तव्यः।

विशेष—वेदोपकरणे वेदांग—'षडङ्गो वेदोऽध्येयो ज्ञेयश्च'—महाभाष्य, प्रथम आह्निक (हत) वेदार्थ के सम्यक् अवबोधन के लिए, स्वरादि के सुचारु अवगमन के लिए, मन्त्रविनियोग के समुचित ज्ञान के लिए, काल के सुष्ठु निर्धारण के लिए वेद के सहायक रूप में षडंग साहित्य की रचना हुई। संख्या में छः हैं—शिक्षा, कल्प, व्याकरण, निरुक्त, छन्द, ज्योतिष—

छन्दः पादौ तु वेदस्य हस्तः कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥

—पाणिनीय शिक्षा, ४१.४२

अनध्याये—सभी आश्रमों में वेदाध्ययन ब्रह्मयज्ञ है, शतपथ ब्राह्मण ११.५.६.९ ने उन अनेक स्थितियों का, यथा—बिजली की चमक, अन्धड़, मेघगर्जन एवं वज्रपात, वर्णन, किया है जिनमें अनध्याय होता है किन्तु (पर्व को छोड़कर) अधीत वेद पाठों की पुनरावृत्ति का क्रम बाधित नहीं होने दिया जाता है। अनध्याय अर्थात् विराम या अवकाश सामान्यतः साठ घटिकाओं अर्थात् पूरे २४ घण्टे का होता है।

वस्तुतः वैदिक अध्ययन अर्थात् मन्त्रों को स्मरण करना मनोयोग पर निर्भर है, अतः मन को चञ्चल कर देने वाले अवसरों में वेदाध्ययन के अनध्याय की चर्चा समुचित है। स्मृति पटल पर अङ्कित ज्ञान को दुहराने तथा होम, जप आदि में उतने मनोयोग की आवश्यकता नहीं, अतः ऐसे अवसरों पर अनध्याय को महत्त्व नहीं दिया गया है। —धर्मशास्त्र का इतिहास, काणे पृष्ठ २६०

अनध्याय का अभाव—

नैत्यके नास्त्यनध्यायो ब्रह्मसत्रं हि तत्स्मृतम्।
ब्रह्माहुतिहुतं पुण्यमनध्यायवषट्कृतम् ॥१०६॥

अन्वय—नैत्यके अनध्यायः न अस्ति, हि तद् ब्रह्मसत्रं स्मृतम्। ब्रह्माहुतिहुतम् अनध्यायवषट्कृतं पुण्यम्।

शब्दार्थ—ब्रह्मसत्र—वेदपाठ रूप यज्ञ, ब्रह्माहुतिहुतं—वेदमन्त्रों द्वारा प्रदत्त आहुति, वषट्कृतं—वषट्पूर्वक मन्त्रोच्चारण।

हिन्दी अर्थ—दैनिक स्वाध्याय में अनध्याय नहीं होता है क्योंकि उसका स्मरण ब्रह्मयज्ञ के रूप में किया गया है। वेदमन्त्रों द्वारा प्रदत्त आहुति तथा अनध्याय में किया गया वषट् उच्चारण पुण्यप्रद है।

संस्कृत व्याख्या—नैत्यके—नित्यानुष्ठेये वेदाध्ययनरूप—ब्रह्मयज्ञे, अनध्यायः अध्ययनविरामः—नास्ति, हि—यतः, तद् ब्रह्मसत्रं सतत प्रवृत्तं सत्रं, वेदपाठरूप यज्ञं; स्मृतं—कथितं, ब्रह्माहुतिहुतं—ब्रह्मैव आहुतिः तया हुतं, ब्रह्मैव आहुतिः तस्यां हुतं वा, वेदाहुतिप्रक्षिप्तं; अनध्याय—वषट्कृतं—अनध्याये वषट्कृतम् इति, अध्ययनावकाशे वषडुच्चारणं, पुण्यं—पुण्यदायकमेवास्ति।

विशेष—ब्रह्मसत्रम्—अविच्छिन्न रहकर निरन्त चलने वाली वेद की स्वाध्याय प्रक्रिया ब्रह्मसत्र कहलाती है।

वषट्—'देवोद्देश्यकहविस्त्यागमन्त्रः इत्यमरः'—'वषट्' शब्द का उच्चारण देवता के लिए आहुति देते समय किया जाता है। घन-गर्जन एवं विद्युत ब्रह्मयज्ञ के वषट्कार कहे जाते हैं। जिस प्रकार 'वषट्' शब्द के उच्चारण के साथ आहुति दी जाती है, उसी प्रकार घन-गर्जन के साथ ब्रह्मयज्ञ के रूप में किसी-न-किसी वैदिक मन्त्र का पाठ करते रहना चाहिए। —धर्मशास्त्र का इतिहास, काणे. पृष्ठ २५८

स्वाध्याय इष्टप्रद—

य: स्वाध्यायमधीतेऽब्दं विधिना नियतः शुचि ।
तस्य नित्यं क्षरत्येषु पयो दधि घृतं मधु ॥१०७॥

अन्वय—यः नियतः शुचिः अब्दं विधिना स्वाध्यायमधीते, तस्य एषः नित्यं पयः दधि घृतं मधु क्षरति ।

शब्दार्थ—अब्दं—वर्षपर्यन्त, एषः—वेद, वेदांगों का स्वाध्याय, पयः—दूध, क्षरति—स्रवित होता है ।

हिन्दी अर्थ—जो पुरुष नियम से पवित्र होकर एक वर्षपर्यन्त विधिपूर्वक वेद का अध्ययन करता है उसके लिए वेदाध्ययन नित्यप्रति दूध, दही, घी व मधु प्रदान करता है ।

संस्कृत व्याख्या—यः—जनः, नियतः—नियमेन जितेन्द्रियः ना, शुचिः—पवित्रबाह्याभ्यन्तरः, अब्दं—एकवर्षं, विधिना—शास्त्रोक्तरीत्या, स्वाध्यायं—वेदाध्ययनं, अधीते—पठति, तस्य—पुरुषस्य, एषः—वेदवेदाङ्गाध्ययनं, नित्यं—सर्वदा, पयः—दुग्धं, दधि—दुग्धविकारं, घृतं—सर्पिः, मधु—मिष्ठपदार्थं, क्षरति—प्रस्रवति ।

विशेष—वेदों को जानने वाला विद्वान् ब्राह्मण यशस्वी होता है फलतः दान रूप में गौ तथा गौ से पयस् आदि प्राप्त करता है । अथवा समग्र वेदों के अध्ययन से चारों पुरुषार्थों को एक वर्ष में प्राप्त करता है क्योंकि पयस् शुद्धि लक्षण से धर्म के समान, दधि पुष्टि लक्षण से अर्थ के समान, घृत स्नेह लक्षण से काम के समान तथा मधु रस रूप लक्षण से मोक्ष के समान है । अथवा स्वाध्याय ही पयस् दधि, घृत, मधु रूप है । अथवा वेदविहित कर्मों से तृप्त हुए देव व पितृ गण दुग्ध, दधि, घृत, मधु के (सदृश पद, धन, हर्ष एवं स्वतन्त्रता में) शुभेच्छा, रूप फल को प्रदान करते हैं—

'मधुना पयसा चैव स देवांस्तर्पयेत् द्विजः ।
पितृन्मधुघृताभ्यां च ऋचोऽधीते हि योऽन्वहम् ॥
ते तृप्तास्तर्पयन्त्येनं सर्वकामफलैः शुभैः ॥

—याज्ञवल्क्य स्मृति २-४१, ४७

प्रजापति ब्रह्मा ने कल्प के आदि में यज्ञसहित प्रजाओं को रचकर उनसे कहा कि तुम लोग इस यज्ञ के द्वारा देवताओं को उन्नत करो और वे तुम्हें उन्नत करें, इस प्रकार परस्पर उन्नति करते हुए परम कल्याण को प्राप्त करो—

'देवान्भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ' ॥'

— श्रीमद्भगवद्गीता ३.११

समावर्तनपर्यन्त होमादि—

अग्नीन्धनं भैक्षचर्यामधःशय्यां गुरोर्हितम् ।
आसमावर्तनात्कुर्यात्कृतोपनयनो द्विजः ॥१०८॥

अन्वय—कृतोपनयनः द्विजः आसमावर्तनात् अग्नीन्धनं, भैक्षचर्याम् अधः शय्यां गुरोः हितं कुर्यात् ।

शब्दार्थ—अग्नीन्धनं—समिद्धोम, अधः शय्यां—भूमिशयन ।

हिन्दी अर्थ—उपनयन संस्कार से संस्कृत द्विज समावर्तन संस्कारपर्यन्त समिधा से अग्नि में आहुति, भिक्षावृत्ति, भूमिशयन तथा गुरु के लिए (जलानयनादि) हितकर कार्य करे ।

संस्कृत व्याख्या—कृतोपनयनः—कृतम् उपनयनं यस्य सः, विहितोपवीत संस्कारः; द्विजः—ब्राह्मणबटुः, आसमावर्तनात्—समावर्तनसंस्कारकालपर्यन्तं, अग्नीन्धनं—अग्नौ इन्धनाहुति समिद्धोमं, भैक्षचर्यां—भिक्षाणां समूहः भैक्षं तस्य चर्यां, तां भिक्षाटनं; अधः शय्यां—भूशयनं, गुरोः—आचार्यस्य, हितं—चरण-प्रक्षालनादि सेवाकार्यं, कुर्यात्—विदधीत ।

विशेष—समावर्तन संस्कार—वेदाध्ययन के उपरान्त गुरु-गृह से लौटते समय का संस्कार स्नान या समावर्तन, कहा जाता है—'तत्र समावर्तनं नाम वेदाध्ययनान्तरं गुरुकुलात् स्वगृहागमनम्—वीरमित्रोदय संस्कारप्रकाश, पृष्ठ ५६४। विद्यासागर में स्नान कर लेने वाले स्नातकों के तीन प्रकार थे—प्रथम—व्रतस्नातक, जो अपना व्रत तो पूर्ण कर चुकते थे किन्तु विद्या अपूर्ण रह जाती थी। द्वितीय—विद्यास्नातक, जो विद्या सम्पूर्ण कर लेते, थे किन्तु ब्रह्मचर्य अपूर्ण रह जाता था। तृतीय—वे सर्वोत्कृष्ट विद्यार्थी—विद्याव्रत स्नातक जो अध्ययन एवं व्रत दोनों को समाप्त कर लेते थे—'त्रयः स्नातका भवन्ति विद्यास्नातको व्रतस्नातको विद्याव्रत-स्नातक इति—पारस्कर गृह्यसूत्र २-५-३३ आश्रम से विदा होते समय गुरु को अपनी सामर्थ्यानुसार भेंट प्रदान करना इस संस्कार का महत्त्वपूर्ण कृत्य था। संस्कार सम्पन्न स्नातक विशेष सम्मान का पात्र था—'महद्वै एतद् भूतं यत् स्नातकः'—आश्वलायन गृह्यसूत्र ३.९.८ ।

भैक्षचर्या—शतपथब्राह्मण ११.३.३.७ के अनुसार स्नान कर्म के उपरान्त भिक्षा नहीं माँगनी चाहिए ।

अधःशय्या—पतञ्जलि महाभाष्य प्रथम आह्निक में उल्लेख है कि शिष्य स्नान कर्म के पश्चात् गुरु की अनुज्ञा से शयन के लिए पलंग का प्रयोग कर सकता है ।

अध्यापन योग्य शिष्य—

आचार्यपुत्रः शुश्रूषुर्ज्ञानदो धार्मिकः शुचिः ।
आप्तः शक्तोऽर्थदः साधुः स्वोऽध्याप्या दश धर्मतः ॥१०६॥

अन्वय—आचार्यपुत्रः, शुश्रूषुः, ज्ञानदः, धार्मिकः, शुचिः, आप्तः, शक्तः, अर्थदः साधुः, स्वः (एते) दश धर्मतः अध्याप्याः ।

शब्दार्थ—शुश्रूषुः—सेवक, आप्तः—विश्वस्त, शक्तः—समर्थ, अर्थदः—धनप्रदाता ।

हिन्दी अर्थ—आचार्यपुत्र, परिचारक, ज्ञानदाता, धर्मात्मा, पवित्र, विश्वस्त, विद्या-ग्रहण में समर्थ, धनप्रदाता, सत्पुरुष एवं बान्धव—धर्मशास्त्र की दृष्टि से ये दस पढ़ाने योग्य हैं ।

संस्कृत व्याख्या—आचार्यपुत्रः—आचार्यस्य पुत्रः, गुरु—सुतः, शुश्रूषुः—सेवकः, ज्ञानदः—ज्ञानं ददातीति, ज्ञानदायकः, धार्मिकः—धर्मतत्परः, शुचिः—पवित्रात्मा, आप्तः—विश्वस्तः, शक्तः—पाठग्रहणे समर्थः, अर्थदः—धनप्रदाता, साधुः—सत्पुरुषः, स्वः—स्वजनः, एते दश, धर्मतः—धर्मशास्त्रदृष्ट्या, अध्याप्याः—पाठनीयाः ।

विशेष—धर्मतः—इन दसों प्रकार के शिष्यों के मध्य अध्यापन कार्य करते समय गुरु का उद्देश्य धर्म हो न कि अर्थ संग्रह ।

अध्याप्याः—सभी प्रकार के दानों से ब्रह्मदान विशेष फल का हेतु है—'सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते' ।

—मनुस्मृति, ४.२३३

कृतज्ञ, गुरु से घृणा न करने वाला, स्वस्थ तथा व्यर्थ का छिद्रान्वेषण न करने वाला । इन गुणों का समावेश भी शिष्य में होना चाहिए ।

—याज्ञवल्क्य स्मृति, १.२८

प्रश्न के बिना उपदेश निषेध—

नापृष्टः कस्यचिद् ब्रूयान्न चान्यायेन पृच्छतः ।
जानन्नपि हि मेधावी जडवल्लोक आचरेत् ॥११०॥

अन्वय—जानन्नपि हि मेधावी अपृष्टः अन्यायेन च पृच्छतः कस्यचित् न ब्रूयात्, लोके जडवत् आचरेत् ।

शब्दार्थ—अपृष्टः—न पूछे जाने पर, अन्यायेन—अत्याचारपूर्वक, जडवत्—निश्चेष्ट ।

हिन्दी अर्थ—ज्ञानतत्त्व को जानता हुआ भी विद्वान् पुरुष बिना पूछे किसी से न कहे, अन्याय से (श्रद्धा-भक्ति का त्याग कर) पूछने पर उत्तर न दे, (ऐसी दशा में) संसार में जड़ के समान आचरण करे ।

संस्कृत व्याख्या—जानन्नपि—ज्ञानवानपि, हि, मेधावी—बुद्धिमान्पुरुषः, अपृष्टः—न पृष्टः, जिज्ञासाभावे, अन्यायेन—असभ्याचरणेन, च, पृच्छतः—प्रश्नं कुर्वतः, कस्यचित्—कमपि पुरुषं प्रति, न, ब्रूयात्—भाषयेत्, लोके—संसारे, जडवत्—मूकं मूर्खसदृशं वा, आचरेत्—व्यवहरेत् ।

विशेष—अपरिचित शिष्य से अशुद्ध अल्पाक्षर अथवा विकृत पाठ सुन कर भी उसके पूछे बिना उसे न टोके किन्तु अपने शिष्य को न पूछने पर भी बताए । डरा धमका कर पूछने वाले शिष्य को न बताए, विनम्र स्वर में प्रार्थना करने वाले शिष्य को अवश्य बताए । सम्भवतः यह केवल शास्त्रीय चर्चा है अन्यथा व्यवहार में तो नियम है कि धर्मज्ञातापुरुष चाहे वह राजा द्वारा नियुक्त हो अथवा अनियुक्त, को अवश्य बताए ।

निषेध न मानने का परिणाम—

अधर्मेण च यः प्राह यश्चाधर्मेण पृच्छति ।
तयोरन्यतरः प्रैति विद्वेषं वाधिगच्छति ॥१११॥

अन्वय—यः च अधर्मेण प्राह, यः च अधर्मेण पृच्छति, तयोः अन्यतरः प्रैति विद्वेषं वा अधिगच्छति ।

शब्दार्थ—अन्यतरः—एक, प्रैति—मृत्यु को प्राप्त करता है, विद्वेषं—शत्रुता को ।

हिन्दी अर्थ—अधर्म से पूछने पर जो कहता है अथवा जो अधर्म से पूछता है उन दोनों में से एक की मृत्यु हो जाती है अथवा परस्पर विरोध हो जाता है ।

संस्कृत व्याख्या—यः—मानवः, च, अधर्मेण—धर्मोलङ्घितेन, प्राह—वदति, यः—मानवः, च, अधर्मेण—धर्मातिक्रमणेन, पृच्छति—जिज्ञासां करोति, तयोः—द्वयोः, अन्यतरः—एकः उल्लङ्घनकर्ता, प्रैति—मृतसदृशः भवति, तेन सह, विद्वेषं—मात्सर्यभावनां, वा, अधिगच्छति—वर्द्धयति ।

विशेष—प्रैति—वेदपुण्य रूप फल से च्युत होता है—राघवानन्द ।

विद्यादान के अनधिकारी—

धर्मार्थौ यत्र न स्यातां शुश्रूषा वाऽपि तद्विधा ।
तत्र विद्या न वक्तव्या शुभं बीजमिवोषरे ॥११२॥

अन्वय—यत्र धर्मार्थौ न स्यातां, तद्विधा शुश्रूषा अपि वा, तत्र ऊषरे शुभं बीजम् इव विद्या न वक्तव्या ।

शब्दार्थ—धर्मार्थौ—धर्म और अर्थ, तद्विधा—समुचित, ऊषरे—अनुपजाऊ भूमि में ।

हिन्दी अर्थ—जिस शिष्य में धर्म तथा अर्थ का अभाव है अथवा शिक्षानुसार सेवावृत्ति का भी अभाव है ऐसे पात्र में अनुर्वर भूमि में उत्कृष्ट बीज (वपन) के समान विद्यादान न करे।

संस्कृत व्याख्या—यत्र—यस्मिन् शिष्ये, धर्मार्थौ—धर्मश्च अर्थश्च तौ, न, स्यातां—भवेतां, तद्विधा—अध्ययनानुरूपा, शुश्रूषा—परिचरितुमिच्छा अपि वा नास्ति, तत्र—तस्मिन् शिष्ये, ऊषरे—अनुर्वरभूमौ, शुभं—उत्कृष्टं, बीजं—यवादिकं, इव, विद्या—शास्त्रज्ञानं, न, वक्तव्या—उपदेष्टव्या।

विशेष—धर्म, अर्थ तथा गुरु सेवा, विद्या अर्थात् अर्थावबोध में विनिमय स्वरूप हैं। विद्यादान के प्रतिदान में जीविका हेतु धनग्रहण वेतन कहलाता है।

—मेधातिथि

तथापि गुरु को पदार्थ प्राप्ति का लेशमात्र भी लोभ नहीं होना चाहिए—

'न पूर्वं गुरवे किञ्चिदुपकुर्वीत धर्मवित्'। —मनुस्मृति, २.२४५

अपात्र शिष्य को विद्यादान निषेध—

विद्ययैव समं कामं मर्तव्यं ब्रह्मवादिना।
आपद्यपि हि घोरायां न त्वेनामिरिणे वपेत् ॥११३॥

अन्वय—ब्रह्मवादिना विद्यया समं कामं मर्त्तव्यं हि घोरायाम् अपि आपदि एनाम् इरिणे तु न वपेत्।

शब्दार्थ—कामं—भले ही, घोरायां—भयंकर, एनां—विद्या को, इरिणे—ऊषर भूमि में।

हिन्दी अर्थ—वेदज्ञ विद्वान् विद्या के साथ भले ही मर जाए किन्तु भयंकर आपत्ति में भी अनुर्वर भूमि में न बोए गए बीज के समान अपात्र शिष्य को विद्यादान न करे।

संस्कृत व्याख्या—ब्रह्मवादिना—ब्रह्मवदतीति ब्रह्मवादी तेन, वेदाध्यापकेन; विद्यया—ज्ञानेन, समं—सह, कामं—यथोचितं, मर्त्तव्यं—प्राणत्यागः कर्त्तव्यं, हि—यतः, घोरायां—कृच्छ्रायां, आपदि—विपदि, एनां—विद्यां, इरिणे—ऊषरे भूमौ, तु न, वपेत्—प्रतिपादयेत्।

विशेष—आपदि—आपत्ति काल अर्थात् शिष्यों के नितान्त अभाव में अथवा धन के नितान्त अभाव में अथवा दुर्भिक्ष आदि उपद्रवों में भी अयोग्य अथवा जिज्ञासा-हीन विद्यार्थी के प्रति विद्यादान न करे।

छान्दोग्य ब्राह्मण का वाक्य इसी मन्तव्य को अभिव्यक्त करता है—'विद्यया सार्धं म्रियेत, न विद्यामूषरे वपेत्'।

विद्वान् पुरुष सामान्य परिस्थितियों में अपने ज्ञान को शिष्यों के मध्य अवश्य वितरित करे—ब्यूहलर। प्रसिद्ध है—

'अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति ।
व्ययतो वृद्धिमायाति क्षयमायाति संचयात् ।।'

विद्या की प्रार्थना—

विद्या ब्राह्मणमेत्याह शेवधिष्टेऽस्मि रक्ष माम् ।
असूयकाय मां मा दास्तथा स्यां वीर्यवत्तमा ।।११४।।

अन्वय—विद्या ब्राह्मणम् एत्य आह—(अहं) ते शेवधिः अस्मि, मां रक्ष, मां असूयकाय मा अदाः, तथा वीर्यवत्तमा स्याम् ।

शब्दार्थ—एत्य—समीप आकर, शेवधिः—कोष, असूयकाय—ईर्ष्याभाव परिपूर्ण, अदाः—प्रदान करना ।

हिन्दी अर्थ—विद्या ब्राह्मण के समीप आकर बोली—मैं तुम्हारी निधि हूँ, मेरी रक्षा करना, मुझे निन्दक के लिए दान न करना, उस प्रकार मैं अत्यन्त वीर्यवती रहूँगी ।

संस्कृत व्याख्या—विद्या—विद्याधिष्ठात्री देवी सरस्वती, ब्राह्मणं—अध्यापकं, एत्य—आगत्य, आह—अवदत्, अहं, ते—तव, शेवधिः—निधिः, अस्मि, मां—विद्यां, रक्ष—रक्षां कुरु, मां, असूयकाय—असूयां करोतीति असूयकः, तस्मै, निन्दकाय गुणेषु दोषारोपणकारकाय वा; मा अदाः—न देहि, तथा—तेन प्रकारेण, वीर्यवत्तमा—बलवत्तमा, स्यां—भवेयम् ।

विशेष—शब्दवैभिन्य से यही प्रार्थना छान्दोग्य ब्राह्मण में उपलब्ध है—'विद्या ह वै ब्राह्मणमाजगाम, तवाहमस्मि, त्वं मां पालय, अनर्हते मानिने चैव माऽदाः, गोपाय मां, श्रेयसी तथाहमस्मि' इति । तैत्तिरीय उपनिषद् भी लगभग इसी रूप में अधिकारी के गुणों को प्रस्तुत करता है—

एतद् गुह्यतमं नापुत्राय नाशिष्याय कीर्तयेदनन्यभक्ताय सर्वगुणसम्पन्नाय दद्यात्' ।

विद्या की प्रार्थना—

यमेव तु शुचिं विद्यान्नियतं ब्रह्मचारिणम् ।
तस्मै मां ब्रूहि विप्राय निधिपायाप्रमादिने ।।११५।।

अन्वय—यम एव तु शुचिं नियतं ब्रह्मचारिणं विद्यात्, तस्मै निधिपाय अप्रमादिने विप्राय मां ब्रूहि ।

शब्दार्थ—शुचि—देह तथा मन से पवित्र, ब्रह्मचारी—कामवासना शून्य, निधिपाय—कोषप्रहरी, कुशाग्र स्मरण शक्ति सम्पन्न, अप्रमादिने—सावधान के लिए अभ्यासशील ।

हिन्दी अर्थ—जिसे तुम पवित्र संयतेन्द्रिय अथवा नियमपालक (जितेन्द्रिय) ब्रह्मचारी समझो, उस विद्यारूपिणी निधि के रक्षक, अप्रमादी ब्राह्मण के लिए मेरा उपदेश करना।

संस्कृत व्याख्या—यं—विप्रं, एव तु, शुचि—पवित्रबाह्याभ्यन्तरं, नियतब्रह्मचारिणं—नियतं ब्रह्मचरितुं शीलमस्येति नियतब्रह्मचारी, तं—जितेन्द्रियं, नियमेन वा ब्रह्मचर्यरक्षकं; विद्याः—अवेहि, तस्मै—पूर्वोक्ताय, निधिपाय—निधि पातीति निधिपः, विद्या—कोषरक्षकाय, अप्रमादिने—दत्तचित्ताय, विप्राय—द्विजाय, मां—विद्यां, ब्रूहि—उपदेशय।

विशेष—उपनिषद् में श्लोक का समान रूप इस प्रकार है—

'यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम्।
यस्ते न द्रुह्येत्कतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन्॥'

—मुक्तिकोपनिषद्, १.५१

उपर्युक्त दोनों मन्त्र निरुक्त २.४ में 'चार विद्यासूक्तों' के नाम से वर्णित हैं। अल्प परिवर्तन के साथ वशिष्ठ धर्मसूत्र, २.१४-१७ में भी उपलब्ध हैं। ब्लूमफील्ड ने 'वैदिक कानकोरडेन्स' नामक कोष में उपर्युक्त श्लोकों का स्रोत सामवेद के संहितोपनिषद् ब्राह्मण को माना है।

वेदाध्ययन में अनुज्ञा आवश्यक—

ब्रह्म यस्त्वननुज्ञातमधीयानादवाप्नुयात्।
स ब्रह्मस्तेयसंयुक्तो नरकं प्रतिपद्यते॥११६॥

अन्वय—यः तु अधीयानात् अननुज्ञातं ब्रह्म अवाप्नुयात्, ब्रह्मस्तेयसंयुक्तः स नरकं प्रतिपद्यते।

शब्दार्थ—अधीयानात्—वेदाभ्यास करते हुए, अवाप्नुयात्—प्राप्त कर ले, ब्रह्मस्तेय—वेद की चोरी।

हिन्दी अर्थ—जो ब्रह्मचारी स्व-अभ्यासार्थ वेदाध्ययन करते हुए अथवा अध्यापन काल में अध्यापक की अनुमति के बिना ही वेद को ग्रहण कर लेता है, वेद की चोरी का दोषी वह नरक अर्थात् महान् कष्ट का भागी होता है।

संस्कृत व्याख्या—यः—माणवकः, तु, अधीयानात्—अधीयते अस्मादित्यधीयानः, तस्मात्, स्व-अभ्यासार्थं अध्ययनं कुर्वतः गुरोः, कश्चिद् शिष्यम् अध्यापयतः वा गुरोः; अननुज्ञातं—न अनुज्ञातं विना अनुमतिं, ब्रह्म—वेदं, अवाप्नुयात्—पठेत्, ब्रह्मस्तेयसंयुक्तः—ब्रह्मणः स्तेयः, तेन संयुक्तः, वेदचौर्यसमन्वितः; सः—द्विजातिः, नरकं—अधोगतिं, प्रतिपद्यते—प्राप्नोति।

विशेष—अधीयानात्—आख्यातोपयोगे—अष्टाध्यायी, १.४.२९ । उपाध्याय से नियमपूर्वक विद्या स्वीकार करने के अर्थ में पञ्चमी विभक्ति है। अथवा ल्यब्लोपे कर्मण्यधिकरणे च-वार्त्तिक । अन्य को पढ़ाते हुए वेद को सुनकर—इस अर्थ में ल्यप् प्रत्यय के लोप में कर्म में पञ्चमी विभक्ति है।

प्राचीन भारतीय शिक्षा पद्धति का आधार था—शिक्षक । अध्ययन में उसकी अनुमति की प्रधानता से उसका पद स्वतः उच्च एवं महान् हो गया था। महाभारत, अनुशासन पर्व, ३६.१५ में उल्लेख है कि (बिना गुरु के) घर पर वेद पढ़ने वाला निन्दास्पद है।

प्रथम अभिनादन गुरु को—

लौकिकं वैदिकं वापि तथाध्यात्मिकमेव च ।
आददीत यतो ज्ञानं तं पूर्वमभिवादयेत् ॥११७॥

अन्वय—यतः लौकिकं, वैदिकं वाऽपि तथा आध्यात्मिकम् एव च ज्ञानम् आददीत, तं पूर्वम् अभिवादयेत् ।

शब्दार्थ—लौकिक—व्यावहारिक, वैदिकं—शास्त्रीय, आध्यात्मिक—ईश्वर सम्बन्धी, अभिवादयेत्—प्रथम सम्भाषण करे।

हिन्दी अर्थ—जिस आचार्य से सांसारिक (संगीत, चित्रकला, वाणिज्य आदि) अथवा वैदिक (वेद, वेदाङ्ग, स्मृति आदि) तथा आध्यात्मिक (आत्म विद्या) ज्ञान प्राप्त करे, उस आचार्य को सर्वप्रथम प्रणाम करे।

संस्कृत व्याख्या—यतः—यस्मात् शिक्षकात्, लौकिकं—लोके भवं, अर्थशास्त्रादिविषयकाभ्युदयिकज्ञानं, वैदिकं—यागादिविषयकवेदविज्ञानं, वा अपि तथा, आध्यात्मिकं—आत्मनि इति अध्यात्मं, तत्र भवं, आत्मपरमात्मविषयकब्रह्मज्ञानं, आददीत—गृह्णीत, तं—आचार्यं, पूर्वं—प्रथमं, अभिवादयेत्—प्रणमेत् ।

विशेष—अभिवादन विधि—नमस्कार की मुद्रा में झुकने के साथ ही 'अभिवादयेऽहम्' आदि कह कर सम्मान प्रकट करना अभिवादन है। ब्राह्मण को अपनी दाहिनी बाहु कान के सीध में फैला कर, क्षत्रिय को छाती तक, वैश्य को कमर तक, शूद्र को पैर तक, जुड़े हुए दोनों हाथ फैला कर अभिवादन करना चाहिए।

—आपस्तम्ब धर्मसूत्र, १.२.५.१६-१७

'जन्मप्रभृति यत्किञ्चिच्चेतसा धर्ममाचरेत् ।
तत्सर्वं विफलं ज्ञेयमेकहस्ताभिवादनात् ॥८॥

(मानव) जन्म से लेकर, चित्त से अर्थात् लगनपूर्वक जो कुछ भी यज्ञानुष्ठान करता है, एक हाथ से अभिवादन करने से वह सब निष्फल हो जाता है।

संयम असंयम तुलना—

सावित्रीमात्रसारोऽपि वरं विप्रः सुयन्त्रितः ।
नायन्त्रितस्त्रिवेदोऽपि सर्वाशी सर्वविक्रयी ॥११८॥

अन्वय—सावित्रीमात्रसारः अपि सुयन्त्रितः विप्रः वरम्, अयन्त्रितः सर्वाशी सर्वविक्रयी त्रिवेदः अपि न (वरम्) ।

शब्दार्थ—सावित्रीमात्रसारः—गायत्री मन्त्र को जानने वाला, सर्वाशी—सब कुछ खाने वाला, अयन्त्रित—संयम रहित ।

हिन्दी अर्थ—गायत्री मात्र का ज्ञाता, सदाचारी ब्राह्मण श्रेष्ठ है किन्तु आचारविहीन, सर्वस्व भक्षण करने वाला, सर्वस्व विक्रय करने वाला, तीनों वेदों का ज्ञाता ब्राह्मण श्रेष्ठ नहीं है ।

संस्कृत व्याख्या—सावित्रीमात्रसारः—सावित्री एव सावित्रीमात्रः, स सारः यस्य सः, गायत्रीमात्रानुष्ठानसमर्थः; अपि, सुयन्त्रितः—शास्त्रादिष्टनियमपरिपालकः, विप्रः—द्विजः, वरं—श्रेष्ठः, अयन्त्रितः—आचारहीनः, सर्वाशी—सर्वान् अश्नातीति, सर्वपदार्थभोजी, निषिद्धभोजनपरः इत्यर्थः; सर्वविक्रयी—सर्वान् विक्रेतुं शीलमस्येति, वर्जितपदार्थविक्रेता; त्रिवेदः—वेदत्रयवेत्ताऽपि; न—न वरम् ।

विशेष—वरम्—'विप्रः वरः' पाठ होना चाहिए था, वरं क्यों कर प्रयुक्त हुआ ? सम्भवतः 'वरमेतत्' अर्थात् श्रेष्ठता प्रतिपादन के निमित्त से अथवा नियमित-लि. वर शब्द के नपुंसकलिंग होने से ऐसा प्रयोग हुआ है । —मेधातिथि

ब्राह्मण के ऊपर उपर्युक्त नियन्त्रणों का उद्देश्य था उन्हें स्वार्थबुद्धि, अकरुण व्यवहार एवं धन संचय से दूर रख कर सरल जीवन का अभ्यस्त बनाना, जिससे प्राचीनतया भारतीय संस्कृति का अध्ययन, रक्षण एवं परिवर्धन सुचारु रूप से हो सके ।

—महर्षि मनु के अनुसार

ब्राह्मण की जीवित मृत्यु के चार कारण हैं—वेदों का अभ्यास न करना, सदाचार का त्याग, आलस्य एवं अभक्ष्य का भक्षण—

'अनभ्यासेन वेदानामाचारस्य च वर्जनात् ।
आलस्यादन्नदोषाच्च मृत्युर्विप्राञ्जिघांसति ॥'

—मनुस्मृति, ५.४

श्रेष्ठजनों के प्रति आचरण—

शय्यासनेऽध्याचरिते श्रेयसा न समाविशेत् ।
शय्यासनस्थश्चैवेनं प्रत्युत्थायाभिवादयेत् ॥११९॥

अन्वय—श्रेयसा अध्याचरिते शय्यासने न समाविशेत्, शय्यासनस्थः एव च एनं प्रत्युत्थाय अभिवादयेत् ।

शब्दार्थ—श्रेयसा—श्रेष्ठ जन द्वारा, अध्याचरिते—अध्यारूढ़ होने पर, एनं—ज्येष्ठ को ।

हिन्दी अर्थ—श्रेष्ठजनों द्वारा प्रयुक्त शय्या तथा आसन पर न बैठे, यदि शय्या तथा आसन पर स्वयं बैठा हो तो ज्येष्ठ पुरुषों को उठ कर प्रणाम करे ।

संस्कृत व्याख्या—श्रेयसा—ज्ञानाधिकेन पूज्यजनेन, अध्याचरिते अधिष्ठिते, शय्यासने—शय्यां च आसनं च शय्यासनं, तस्मिन्, पर्यङ्कासने; न, समाविशेत्—उपविशेत्, शय्यासनस्थः—शय्या च आसनं च शय्यासनं, तत्र तिष्ठतीति, शय्यासनस्थितः; एनं—गुरुजनं, प्रत्युत्थाय—सविनयं शिष्टाचारं प्रदर्शयन् अग्रेगत्वा, अभिवादयेत्—प्रणमनं कुर्यात् ।

विशेष—पुरुष विशेष के स्वागत में अभिमुख्य रूप में वार्तालाप—अभिवादन तथा अपने आसन को छोड़ कर उठना—प्रत्युत्थान है, यह अभिवादन के पूर्व विहित है । शय्यासने—शय्या च आसनं च, तयोः समाहारः 'जातिरप्राणिनाम्' ।

—(अष्टा० २/४/६) से द्वन्द्व-एकवद्भाव

वृद्ध प्रणाम के हेतु—

ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति ।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यते ॥१२०॥

अन्वय—स्थविरे आयति यूनः प्राणाः ऊर्ध्वं हि उत्क्रामन्ति, प्रत्युत्थानाभिवादाभ्यां तान् पुनः प्रतिपद्यते ।

शब्दार्थ—स्थविरे—वृद्ध जनों के, आयति—आने पर, उत्क्रामन्ति—उठते हैं, प्रतिपद्यते—प्रतिष्ठित करता है ।

हिन्दी अर्थ—वृद्धजनों के आने पर युवाजनों के प्राण उत्क्रमण करते हैं, अभ्युत्थान तथा अभिवादन के द्वारा वह उन्हें पुनः ठीक कर लेता है ।

संस्कृत व्याख्या—स्थविरे—आयुर्ज्ञानवृद्धे, आयति—समागते सति, यूनः—युवजनस्य अल्पवयसः वा, प्राणाः—असवः, ऊर्ध्वं—उपरि, हि, उत्क्रामन्ति—गच्छन्ति, प्रत्युत्थानाभिवादाभ्यां—प्रत्युत्थानं च अभिवादनं च प्रत्युत्थानाभिवादने, ताभ्यां, स्वागतप्रणामाभ्यां; तान्—प्राणान्, पुनः—भूयः, प्रतिपद्यते—यथास्थानं करोति ।

विशेष—प्रस्तुत विधान शिष्य को भयभीत कर सम्मान शिक्षा देने के लिए है । अनाचारपूर्ण व्यवहार से व्यक्ति की आयु क्षीण होती है, इस क्षीणता को दूर करने के उपाय हैं—प्रत्युत्थान तथा अभिवादन ।

वृद्ध प्रणाम से लाभ—

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ॥१२१॥

अन्वय—नित्यम् अभिवादनशीलस्य वृद्धोपसेविनः तस्य आयुः विद्या यशः बलं चत्वारि वर्धन्ते।

शब्दार्थ—वृद्धोपसेविनः—वृद्धजनों की सेवा, वर्धन्ते—बढ़ते हैं।

हिन्दी अर्थ—प्रतिदिन वृद्धजनों का अभिवादन एवं सेवा करने वाले मनुष्य की आयु, विद्या, यश और बल चारों की वृद्धि होती है।

संस्कृत व्याख्या—नित्यं—प्रतिदिनं, अभिवादनशीलस्य—अभिवादनं शीलं यस्य सः तस्य, प्रणामपरस्य; वृद्धोपसेविनः—वृद्धान् उपसेवितुं शीलं यस्य सः तस्य, ज्येष्ठशुश्रूषापरायणस्य; तस्य—पुरुषस्य, आयुः—वयः, विद्या—ज्ञानं, यशः—कीर्तिः, बलं—शक्तिः, चत्वारि, वर्धन्ते—एधन्ते।

विशेष—सम्मान में किया गया अभिवादन तीन प्रकार का है—

नित्य—रात्रि के अन्तिम प्रहर में गुरु को प्रतिदिन किया जाने वाला प्रणाम।

नैमित्तिक—विशिष्ट अवसरों यथा यागादि पर करने योग्य प्रणाम।

काम्य—किसी विशिष्ट अभिलाषा पूर्ति हेतु किया जाने वाला प्रणाम। चिरायुत्व की आशा से अथवा कल्याण के विस्तार के लिए अल्पायु द्वारा इसी प्रकार का प्रयोग समीचीन है।

—धर्मशास्त्र का इतिहास, पी० वी० काणे, पृष्ठ २३७

अभिवादन विधि—

अभिवादात्परं विप्रो ज्यायांसमभिवादयन्।
असौ नामाहमस्मीति स्वं नाम परिकीर्तयेत् ॥१२२॥

अन्वय—ज्यायांसम् अभिवादयन् विप्रः अभिवादात्परम् अहम् असौ नामा अस्मि इति स्वं नाम परिकीर्तयेत्।

शब्दार्थ—ज्यायांसं—वृद्धजनों को, स्वं—अपना, परिकीर्तयेत्—प्रस्तुत करे।

हिन्दी अर्थ—वृद्धजनों को प्रणाम करता हुआ ब्राह्मण (आदि तीनों वर्ण) अभिवादन के पश्चात् 'अमुक नाम वाला मैं हूँ', इस प्रकार अपने नाम का कथन करे।

संस्कृत व्याख्या—ज्यायांसं—स्वस्मात् ज्येष्ठं, अभिवादयन्—प्रणमन्, विप्रः—ब्राह्मणादिः, अभिवादात्परं—प्रणामानन्तरं, 'असौ नामाः अहम् अस्मि'

(अभिवादयेऽमुक नामाहम् अस्मि) इति—एवंप्रकारेण, स्वं नाम—आत्माभिधानं, परिकीर्तयेत्—उच्चारयेत् ।

विशेष—प्रत्यभिवादन में नामोच्चारण के नियम (मनुस्मृति २.१२५) की सुविधा के लिए विभिन्न धर्मसूत्रों ने अभिवादन में स्वनाम कथन की व्यवस्था दी है—

'स्वनाम प्रोच्याहमभिवादय इत्यभिवदेत्' ।

—गौतम धर्मसूत्र, ६.१

'असावहं भो इत्यात्मनो नामादिशेत्' ।

—शांखायन

स्वनाम एवं गोत्रोल्लेखपूर्वक किया गया यह अभिवादन उपासङ्ग्रहण कहलाता है, इसमें कानों को छू कर प्रणम्य के चरणों को शिर नमनपूर्वक छूने का विधान है ।

—धर्मशास्त्र का इतिहास, पी० वी० काणे, पृष्ठ २३७

अभिवादन विधि के अनभिज्ञों की अभिवादन विधि—

नामधेयस्य ये केचिदभिवादं न जानते ।
तान्प्राज्ञोऽहमिति ब्रूयात्स्त्रियः सर्वास्तथैव च ॥१२३॥

अन्वय—ये केचित् नामधेयस्य अभिवादं न जानते, तान् तथा एव सर्वाः स्त्रियः च प्राज्ञः अहम् इति ब्रूयात् ।

शब्दार्थ—नामधेयस्य—नामोच्चारणपूर्वक, अभिवादं—अभिवादन विधि को ।

हिन्दी अर्थ—जो (संस्कृत ज्ञानहीन) व्यक्ति नामोच्चारणपूर्वक अभिवादन विधि को नहीं जानते हैं, उनको तथा सभी स्त्रियों को विद्वान् पुरुष 'मैं नमस्कार करता हूँ' इस प्रकार कहे ।

संस्कृत व्याख्या—ये केचित्—ये केचन अविद्वांसः, नामधेयस्य—नामोच्चारण-सहितस्य; अभिवादं—प्रणामविधिं, न, जानते—जानन्ति, तान्—अल्पज्ञान्, तथैव—पूर्ववर्णितरीत्या, सर्वाः—निखिलाः, स्त्रियः—नार्यः, च, प्राज्ञः—सुधीजनः, अहम्—'अभिवादयेऽहम्', इति—एवं, ब्रूयात्—कथयेत् ।

विशेष—संस्कृत के ज्ञान से रहित ज्येष्ठ पुरुष, स्त्री एवं (विदुषी) गुरुपत्नी का संस्कृत, लौकिक अथवा अपभ्रंश (जो भाषा उन्हें ग्राह्य हो) में अभिवादन करे ।

भोः शब्द का महत्त्व—

भोः शब्दं कीर्तयेदन्ते स्वस्य नाम्नोऽभिवादने ।
नाम्नां स्वरूपभावोहि भोभाव ऋषिभिः स्मृतः ॥१२४॥

अन्वय—अभिवादने स्वस्य नाम्नः अन्ते 'भोः' शब्दं कीर्तयेत् हि ऋषिभिः भोभावः नाम्नां स्वरूपभावः स्मृतः ।

शब्दार्थ—नाम्नः—नाम के, भोभावः—भो की सत्ता, नाम्नां—नामों का, स्वरूपभावः—स्वरूपात्मक ।

हिन्दी अर्थ—अभिवादन में अपने नाम के अन्त में 'भोः' इस शब्द का उच्चारण करे क्योंकि ऋषियों ने 'भो' की सत्ता को नामों का स्वरूपभाव कहा है अर्थात् इसमें समग्र नाम समाहित हैं ।

संस्कृत व्याख्या—अभिवादने—प्रणामवाक्ये, स्वस्य—आत्मनः, नाम्नः—अभिधानस्य, अन्त—अवसाने, भोः इति शब्दं—'अभिवादये अमुकनामाहमस्मि भोः', कीर्तयेत्—उच्चारयेत्, अभिवाद्यसम्बोधनार्थं, हि—यतः, ऋषिभिः—मन्त्रद्रष्टारैः, भोभावः—भो अस्य यः भावः, भोः पदस्याभिप्रायः; नाम्नां—अभिवाद्यनाम्नां, स्वरूपभावः—अस्तित्वरूपः, स्मृतः—कथितः ।

विशेष—भोः—'भोः' पद के उच्चारण से अभिवाद्य के नाम की निवृत्ति हो जाती है ।

—मेधातिथि

'भोः' की सत्ता को मनु आदि ऋषियों ने अभिवाद्य के नाम के स्वरूप में स्मरण किया है ।

—कुल्लूक भट्ट

'भोः' के कथन से प्रत्यभिवादयिता अभिवादक के नामाक्षरों को ग्रहण कर लेता है ।

—गंगानाथ झा

प्रत्यभिवादन विधि—

आयुष्मान्भव सौम्येति वाच्यो विप्रोऽभिवादने ।
अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्वाक्षरः प्लुतः ॥१२५॥

अन्वय—अभिवादने 'सौम्य आयुष्मान् भव' इति विप्रः वाच्यः । अस्य नाम्नः अन्ते च पूर्वाक्षरः अकारः प्लुतः वाच्यः ।

शब्दार्थ—अभिवादने—अभिवादन के अनन्तर, अस्य—प्रणामकर्त्ता के, पूर्ववर्ती अक्षर ।

हिन्दी अर्थ—अभिवादन पाने पर, हे सौम्य ! 'आयुष्मान् हो', ब्राह्मण इस प्रकार कहे और प्रणामकर्त्ता के नाम अन्तिमाक्षर अकार का तथा (अन्तिम अक्षर के व्यञ्जन होने पर), पूर्ववर्ती स्वर का उच्चारण प्लुत करे ।

संस्कृत व्याख्या—अभिवादने—प्रणामानन्तरे, 'आयुष्मान् भव सौम्य', इति—एवं, विप्रः—ब्राह्मणः, वाच्यः—वक्तव्यः, अस्य—अभिवादकस्य, नाम्नः—अभिधानस्य, अन्ते—अवसाने, च, पूर्वाक्षरः—पूर्वं नामगतम् अक्षरं संश्लिष्टं यस्य

सः, अकारः—अकारादिः स्वरः, प्लुतः—'आयुष्मान् भव सौम्य देवदत्त३' इति, वाच्यः—कथनीयः, नाम्नाम् अकारान्त—त्वनियमाभावात् ।

विशेष—अभिवादन करने के पश्चात् जिसका अभिवादन किया गया है उसके द्वारा जो आशीर्वचन कहा जाता है, वही अभिवादन है । उदाहरण—'अभिवादये....' इस अभिवादन वाक्य के पश्चात् अभिवाद्यमान का आशीर्वचन 'आयुष्मान् भव सौम्य देवदत्त३' अथवा 'सोमशर्म३न्' प्रत्यभिवादन वाक्य है । यहाँ वाक्य के अन्तिम पद 'देवदत्त' की टि 'अकार' की प्लुत संज्ञा होती है ।

प्लुत तीन मात्राओं वाले स्वर का नाम है । व्यञ्जनान्त शब्द के अन्तिम स्वर को प्लुत हो जाता है । वह प्लुत स्वर उदात्त होता है ।

'प्रत्यभिवादेऽशूद्रे' (अष्टाध्यायी ८/२/८३)—शूद्र वर्ण को छोड़कर प्रत्यभिवाद वाक्य के पद की टि को प्लुत होता है ।

'विप्रः' पद क्षत्रिय तथा वैश्य का भी द्योतक है किन्तु 'राजन्यविशां वा'—महर्षि कात्यायन के इस वचन के आधार पर क्षत्रिय तथा वैश्य के पक्ष में प्लुत नहीं होता है । उस स्थिति में अभिवादक के नाम में प्लुत का विधान वैकल्पिक है । पूर्व कथित पाणिनि सूत्र में 'अशूद्र' शब्द का प्रयोग है, अतः शूद्र के प्रति प्लुतरहित नामपद के उच्चारण का नियम है । 'स्त्रियामपि निषेधः'—कात्यायन के इस वचन के आधार पर स्त्री नाम मे भी प्लुत का निषेध है । 'नामगोत्रे गुरोः समानतो'—गुरु के नाम और गोत्र का निर्देश सम्मानपूर्वक करने का आदेश है ।

—गौतम धर्मसूत्र, २.२३

प्रत्यभिवादन न जानने वाले का अभिवादन निषेध—

यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम् ।
नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः ।।१२६।।

अन्वय—यः विप्रः अभिवादस्य प्रत्यभिवादनं न वेत्ति स विदुषा न अभिवाद्यः, यथा शूद्रः तथा एव सः ।

शब्दार्थ—वेत्ति—जानता है, विदुषा—विद्वानों के द्वारा, अभिवाद्यः—अभिवादन के योग्य ।

हिन्दी अर्थ—जो ब्राह्मण प्रणाम के पश्चात् प्रत्यभिवादन नहीं जानता है, विद्वान् पुरुष उसका अभिवादन न करे, (प्रत्यभिवादन शून्य) वह ब्राह्मण शूद्र के सदृश है ।

संस्कृत व्याख्या—यः विप्रः—ब्राह्मणः, अभिवादस्य—प्रणामरूप स्वागतविधेः, प्रत्यभिवादनं—प्रतिप्रणामं, आशीर्वचनमित्यर्थः, न, वेत्ति—जानाति, सः—अनभिज्ञः

ब्राह्मणः, विदुषा—मनोषिभिः, न, अभिवाद्य:—नमस्करणा [illegible], [illegible] शूद्रः—समादरणीयः न, तथैव सोऽपि ।

विशेष—ब्राह्मणों के लिए यह नियम था कि वे क्षत्रिय [illegible] का अभिवादन न करें भले ही वे विद्वान् एवं श्रद्धास्पद हों, केवल 'स्वस्ति' का उच्चारण पर्याप्त है । अभिवादन समान जातियों में ही होता है । यदि ब्राह्मण जातीय, क्षत्रिय, वैश्य या शूद्र का अभिवादन करे तो उसे प्रायश्चित्त स्वरूप एक, दो और तीन दिन का व्रत रखना पड़ता था । —धर्मशास्त्र का इतिहास, काणे, पृष्ठ २३८

अभिवादक के अनुरूप प्रत्यभिवादन विधि (पूर्व वर्णित) का ज्ञान आवश्यक था, उचित प्रत्युत्तर न देने वाले ब्राह्मण को सम्मान नहीं मिलता था । यह समग्र विस्तार परस्पर सौहार्दपूर्ण वातावरण बनाए रखने के लिए था ।

वर्णानुसार कुशलता प्रश्न—

ब्राह्मणं कुशलं पृच्छेत्क्षत्रबन्धुमनामयम् ।
वैश्यं क्षेम समागम्य शूद्रमारोग्यमेव च ॥१२७॥

अन्वय—ब्राह्मणं समागम्य कुशलं पृच्छेत्, क्षत्रबन्धुम् अनामयं (पृच्छेत्), वैश्यं क्षेमं (पृच्छेत्) शूद्रं च आरोग्यम् एव (पृच्छेत्) ।

शब्दार्थ—समागम्य—मिलकर, अनामय—नीरोगता, क्षेमं—कल्याण ।

हिन्दी अर्थ—ब्राह्मण से मिलने पर उससे कुशल पूछे, क्षत्रिय से स्वास्थ्य, वैश्य से कल्याण तथा शूद्र से नीरोगता के सम्बन्ध में पूछे ।

संस्कृत व्याख्या—ब्राह्मणं—विप्रं, समागम्य—संप्राप्य, कुशलं—कुशलविषयकं, क्षत्रबन्धु—क्षत्रियं, अनामयं—स्वास्थ्यविषयकं, वैश्यं—वणिजं, क्षेमं—कल्याणं, शूद्रं—चतुर्थवर्णं, च, आरोग्यं—अरोगस्य भावः, रोगराहित्यं, पृच्छेत्—प्रश्नं कुर्यात् ।

विशेष—चारों स्वस्ति वाचक शब्दों की व्युत्पत्ति इस प्रकार है—

कुशलं—'कुश् द्युतौ वृषादित्वात् कलन् अथवा कुं पापं तस्मात् शलति गच्छति पृथक्त्वं प्राप्नोतीत्यर्थः' ।

आमयं—'आमं तापं रुग्णावस्थां वा यात्येनेन इति आमयः, आमयस्य अभावः अनामयम्' ।

संस्कृत व्याख्या—द्विजोतमः—द्विजेषु ब्राह्मणेषु उत्तमः श्रेष्ठः, ब्राह्मणश्रेष्ठः, तपः—इन्द्रियसंयमादिसाधनां, तपस्यन्—समाचरन्, वेदम् एव, सदा—नित्यं, अभ्यस्येत्—आवर्तयेत्, हि—यतः, इह—अस्मिन् लोके, वेदाभ्यासः—वेदानाम् अभ्यासः, संहितास्वाध्यायः, विप्रस्य—द्विजस्य, परं—प्रकृष्टं, तपः—साधना, उच्यते—कथ्यते।

विशेष—तपः—कामनाओं का परित्याग करके शरीर और मन को दृढ़तापूर्वक सन्तुलित कर समाधि की अवस्था में स्थिर रखना तप है। इसके द्वारा मनुष्य में असाधारण क्षमता एवं विलक्षण ब्रह्म तेज उद्भूत होता है। वेद में कहा गया—तप ही स्वाध्याय है—'तपो हि स्वाध्याय इति श्रूयते।'

इति ब्राह्मणम्।…………अथापि वाजसनेयिब्राह्मणम्।

स्वाध्यायान्मा प्रमदः। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्।
—तैत्तिरीय उपनिषद, शिक्षाध्याय वल्ली, ११.१

ब्रह्मयज्ञो ह वा एष यत्स्वाध्यायः। —आपस्तम्ब धर्मसूत्र, १.४.१२.१-३
स्वाध्यायोऽध्येतव्यः। —शतपथ ब्राह्मण, ११.५.७

अधीयत इत्यध्यायः वेदः। स्वस्याध्यायः स्वाध्यायः स्वपरम्परागता शाखेत्यर्थः। —वीरमित्रोदय संस्कार प्रकाश, पृ० ५०४

वेदाभ्यास प्रशंसा—

आ हैव स नखाग्रेभ्यः परमं तप्यते तपः ।
यः स्रग्व्यपि द्विजोऽधीते स्वाध्यायं शक्तितोऽन्वहम् ॥१६७॥

अन्वय—यः द्विजः स्रग्वी अपि शक्तितः अन्वहं स्वाध्यायम् अधीते, स आनखाग्रेभ्यः एव ह परमं तपः तप्यते ।

शब्दार्थ—स्रग्वी—पुष्पमाला को धारण करता हुआ, शक्तितः—सामर्थ्यानुसार ।

हिन्दी अर्थ—जो ब्राह्मण पुष्पमाला को धारण करता हुआ भी प्रतिदिन शक्ति के अनुसार वेदों का स्वाध्याय करता है वह नाखून के अग्रभाग तक परम तप का अनुष्ठान करता ही है ।

संस्कृत व्याख्या—यः—द्विजः, स्रग्वी—कुसुममालाधारी, अपि—ब्रह्मचर्याचरणे मालाप्रयोगः निषिद्ध तथापि; शक्तितः—सामर्थ्यानुसारेण, अन्वहं—प्रतिदिनं, स्वाध्यायं—वेदस्यपठनं पाठनञ्च, अधीते—अभ्यासं कुरुते, सः—ब्राह्मणकुमारः, आनखाग्रेभ्यः—शिखायाः चरणनखपर्यन्तं, सर्वदेहव्यापकमित्यर्थः; एव ह—निःसन्देहं, परमंसर्वोत्कृष्टं, तपः—शरीरकार्श्यादि, तप्यते—अनुष्ठीयते ।

विशेष—स्रग्वी—ब्रह्मचर्य के अन्तर्गत पुष्पमाला धारण करना निषिद्ध है अतः अभिप्राय है कि जो ब्रह्मचर्य का नियमपूर्वक पालन नहीं कर रहा है ।

आनखाग्रेभ्यः—निर्जीव नाखून भी तपस्यामय । —मेधातिथि

सम्पूर्ण देह तपोमय । —कुल्लूक भट्ट

वेदाभ्यास अनिवार्य—

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥१६८॥

अन्वय—यः द्विजः वेदम् अनधीत्य अन्यत्र श्रमं कुरुते, सः जीवन् एव सान्वयः शूद्रत्वम् आशु गच्छति ।

शब्दार्थ—अनधीत्य—अध्ययन न करके, जीवन्—जीवित रहता हुआ, सान्वयः—वंश सहित ।

हिन्दी अर्थ—जो ब्राह्मण वेदाध्ययन के अतिरिक्त अन्य शास्त्रों में परिश्रम करता है वह जीवित रहता हुआ ही वंश सहित शीघ्र ही शूद्रत्व को प्राप्त करता है ।

संस्कृत व्याख्या—यः—द्विजः—ब्राह्मणः, वेदं—मन्त्रब्राह्मणात्मकं ग्रन्थं, अनधीत्य—अध्ययनमकृत्वा, अन्यत्र—वेदातिरिक्तशास्त्रविषयेषु श्रमं—यत्नातिशयं,

कुरुते—विदधते, सः, जीवन—प्राणान् धारयन्, एव, सान्वयः—अन्वयेन कुलेन सहितः, पुत्रपौत्रादिसहितः, शूद्रत्वं—अवरवर्णत्वं, गच्छति—प्राप्नोति ।

विशेष—शूद्रत्वम्—स्मृतियों के कथनानुसार सर्वप्रथम वेद का अध्ययन न करके अन्य कार्यों में अथवा सांख्य न्याय आदि अन्य शास्त्रों में परिश्रम करने से ब्राह्मण निन्दनीय हो जाता है। जो ब्राह्मण श्रोत्रिय (वेदज्ञानी) नहीं हैं, जो वेदाध्ययन नहीं करता है और जो अग्निहोत्र नहीं करता है वह शूद्रधर्मी हो जाता है—

'अश्रोत्रिया अननुवाक्या अनग्नयो शूद्रसधर्माणो भवन्ति ।'

—वशिष्ठ धर्मसूत्र, ३.१.२

जिस ब्राह्मण के घर में वेदाध्ययन एवं वेदी का त्याग हो गया हो, वह तीन पीढ़ियों में दुर्ब्राह्मण हो जाता है। —बौधायन गृह्यसूत्र, १.१०.५.६

ब्राह्मण के तीन जन्म—

मातुरग्रेऽधिजननं द्वितीय मौञ्जबन्धने ।
तृतीयं यज्ञदीक्षायां द्विजस्य श्रुतिचोदनात् ॥१६९॥

अन्वय—श्रुतिचोदनात् द्विजस्य अग्रे अधिजननं मातुः द्वितीयं मौञ्जी बन्धने, तृतीयं यज्ञदीक्षायाम् ।

शब्दार्थ—श्रुतिचोदनात्—वेद की प्रेरणानुसार, अधिजननं—जन्म, यज्ञदीक्षायां—यज्ञ में दीक्षा ।

हिन्दी अर्थ—वेद के वचनानुसार ब्राह्मण का प्रथम जन्म माता से, द्वितीय जन्म यज्ञोपवीत से तथा तृतीय जन्म यज्ञों की दीक्षा से होता है ।

संस्कृत व्याख्या—श्रुतिचोदनात्—श्रुत्याः चोदनं तस्मात्, वेदादेशात्, द्विजस्य—ब्राह्मणस्य, अग्रे—प्रथमं, अधिजननं—उत्पत्तिः, मातुः—जनन्याः कुक्षेः, द्वितीयं—अपरं मौञ्जीबन्धने—मौञ्ज्याः बन्धनं, तस्मिन्, यज्ञोपवीतसंस्कारे, तृतीयं; अधिजननं यज्ञदीक्षायां—यज्ञस्य दीक्षा, तस्यां, ज्योतिष्टोमादियागानां दीक्षाग्रहणकाले, भवति ।

विशेष—तृतीयम् (अधिजननं)—तृतीय जन्म का कथन द्वितीय जन्म को ही अधिक सम्पुष्ट करता है क्योंकि (मौञ्जी बन्धन रूप) द्वितीय जन्म से सम्पन्न ब्रह्मचारी ही (यज्ञदीक्षा रूप) तृतीय जन्म का अधिकारी होता है। निज अर्थात् तीसरा जन्म केवल यज्ञ की दीक्षा लेने वाले ब्राह्मण का होता है। —हॉपकिन्ज

द्वितीय ब्रह्मजन्म के माता-पिता—

तत्र यद्ब्रह्मजन्मास्य मौञ्जीबन्धनचिह्नितम् ।
तत्रास्य माता सावित्री पिता त्वाचार्य उच्यते ॥१७०॥

अन्वय—तत्र अस्य मौञ्जीबन्धनचिह्नितं यद् ब्रह्मजन्म, तत्र सावित्री अस्य माता, आचार्यः तु पिता उच्यते।

शब्दार्थ—मौञ्जीबन्धनचिह्नितं—मेखला बन्धन के चिन्ह से युक्त, ब्रह्मजन्म—वेदज्ञान से जन्म।

हिन्दी अर्थ—पूर्वोक्त तीन जन्मों में द्विज का यज्ञोपवीत से चिह्नित जो द्वितीय ब्रह्मजन्म है उसमें सावित्री इसकी माता और आचार्य पिता है।

संस्कृत व्याख्या—तत्र—उपर्युक्तेषु त्रिषु जन्मसु, अस्य—ब्राह्मणबालकस्य, मौञ्जीबन्धनचिह्नितं—मौञ्ज्याः बन्धनं, तेन चिह्नितं, यज्ञोपवीतचिह्नाङ्कितं; यद्, ब्रह्मजन्म—ब्रह्मणे जन्म, वेद—प्राप्त्यर्थं जन्म, तत्र—तस्मिन् द्वितीयजन्मनि, सावित्री गायत्री, अस्य—अन्तेवासिनः, माता—जननी, आचार्यः—सकलपरहस्यवेदशिक्षकः, तु, पिता—जनकः, उच्यते—अभिधीयते।

विशेष—आचार्य बालक का पितृस्थानीय एवं सावित्री मातृस्थानीय माने जाते थे। शास्त्र इस विषय में स्पष्ट मत व्यक्त करता है—शिष्य पर अपना दाहिना हाथ रखने से आचार्य उसका गर्भी हो जाता है। तृतीय रात्रि में वह सावित्री सहित ब्रह्मचारी के रूप में जन्म ग्रहण करता है। —शतपथ ब्राह्मण, ११-५-४-१२।

इसीलिए गायत्री और ब्राह्मण को समान कहा गया—'गायत्री हि ब्राह्मणः।'
—शतपथ ब्राह्मण, ६.३.१.४१

आचार्य का पितृत्व—

वेदप्रदानादाचार्यं पितरं परिचक्षते।
न ह्यस्मिन्युज्यते कर्म किञ्चिदामौञ्जिबन्धनात् ॥१७१॥

अन्वय—वेदप्रदानात् आचार्यं पितरं परिचक्षते, हि अस्मिन् आमौञ्जिबन्धनात् किञ्चित् कर्म न युज्यते।

शब्दार्थ—वेदप्रदानात्—वेदाध्यापन के कारण, परिचक्षते—कहते हैं, युज्यते—सम्बद्ध होता है।

हिन्दी अर्थ—वेद का उपदेश करने के कारण आचार्य को पिता कहते हैं क्योंकि ब्राह्मण बालक को यज्ञोपवीत संस्कार के पूर्व किसी श्रौत अथवा स्मार्त्त कर्म के सम्पादन का अधिकार नहीं है।

संस्कृत व्याख्या—वेदप्रदानात्—वेदस्यप्रदानं, तस्मात्, वेदाध्यापनात्; आचार्य—शिक्षकं, पितरं—जनकं, परिचक्षते—कथयन्ति, हि—यतः, अस्मिन्—माणवके, आमौञ्जिबन्धनात्—मौञ्ज्याः बन्धनं मौञ्जीबन्धन, तदभिव्याप्य आमौञ्जीबन्धनं, तस्मात्, प्रागुपनयनात् किञ्चित् कर्म—श्रौतस्मार्तयागादिकं, न युज्यते—न सम्बध्यते।

विशेष—अनुत्पन्न एवं अनुपनीत को समान मानकर बालक का यज्ञोपवीत संस्कार द्वितीय जन्म और आचार्य को व्यावहारिक पिता कहा गया। यज्ञोपवीत संस्कार के अन्तर्गत आयोजनाएँ भी लगभग इसी उद्देश्य को दृष्टिगत करके निर्धारित की गईं। संस्कार सम्पन्न होने के पूर्व उपनयन के लिए गर्भाकार मण्डप का निर्माण किया जाता था। रात्रि को बालक के शरीर पर हल्दी का लेप किया जाता था और उसे सम्पूर्ण रात्रि मुट्ठी बाँध कर मौन रहना होता था। पीत लेप गर्भ के वातावरण का दृश्य उपस्थित करता था तथा मौन व बंधी मुट्ठी अवाक् भ्रूण का सूचक था। वास्तव में इस रूप में बालक को ज्ञानमय द्वितीय जन्म के लिए मानो आचार्य द्वारा गर्भ में धारण किया जाता था।

अनुपनीत का वेदमन्त्रोच्चारण में अनधिकार—

नाभिव्याहारयेद्ब्रह्मस्वधानिनयनादृते ।
शूद्रेण हि समस्तावद्यावद्वेदे न जायते ।।१७२।।

अन्वय—स्वधानिनयनाद् ऋते ब्रह्म न अभिव्याहारयेत्, हि यावत् वेदे न जायते, तावत् शूद्रेण समः अस्ति।

शब्दार्थ—स्वधानिनयनात्—श्राद्ध निष्पादन (पितृ कर्म के मन्त्रों) के अतिरिक्त, अभिव्याहारयेत्—उच्चारण करे।

हिन्दी अर्थ—(यज्ञोपवीत संस्कार के अभाव में) स्वधानिष्पादन अर्थात् श्राद्धकर्म के मन्त्रों के अतिरिक्त अन्य कर्म में वेदमन्त्र का उच्चारण न करे क्योंकि जब तक वेद में अधिकार (यज्ञोपवीत संस्कार) नहीं होता तब तक वह शूद्र के समान है।

संस्कृत व्याख्या—(आमौञ्जीबन्धनात् इत्यनुवर्तते) स्वधानिनयनात्—स्वधा श्राद्धं निनीयते निष्पाद्यते येन मन्त्रजातेन, तस्मात् श्राद्धानुष्ठानमन्त्रात्; ऋते—अतिरिक्तं, ब्रह्म—वेदं, प्रागुपनयनं, न अभिव्याहारयेत्—न उच्चारयेत्, मृतपितृको श्राद्धादौ मन्त्रमुच्चारयेत्—तद्व्यतिरिक्तं वेदं नोदाहरेत्। हि—यस्मात्, यावत्—यावत्कालं, वेदे—वेदग्रहणाधिकारे, न, जायते—उत्पद्यते, तावत्—तावत्कालपर्यन्तं, सः द्विज, शूद्रेण—निकृष्टवर्णेन, समः—तुल्यः अस्ति।

विशेष—न अभिव्याहारयेत्—श्राद्ध कर्म अन्य द्वारा करना असम्भव होने से अनुपनीत भी कर सकता है। शब्द में प्रेरणार्थक णिच् प्रत्यय के प्रयोग से ज्ञात होता है कि पिता के द्वारा बालक को वेदाक्षरों का उच्चारण नहीं करवाना चाहिए।

उपनीत का वेदाधिकार—

कृतोपनयनस्यास्य व्रतादेशनमिष्यते ।
ब्रह्मणो ग्रहणं चैव क्रमेण विधिपूर्वकम् ।।१७३।।

अन्वय—कृतोपनयनस्य अस्य व्रतादेशनं क्रमेण विधिपूर्वकं ब्रह्मणः ग्रहणं च एव इष्यते ।

शब्दार्थ—व्रतादेशनं—व्रतों का आदेश, इष्यते—इष्ट है ।

हिन्दी अर्थ—ब्रह्मचारी को यज्ञोपवीत संस्कार सम्पन्न होने के पश्चात् ही (भूमिशयन, समिधाहरण, सन्ध्योपासना आदि रूप) व्रतों का क्रमशः (आचमन, पूर्वाभिमुख, ब्रह्माञ्जलि एवं प्राणायामपूर्वक) आचरण एवं विधिवत् (मन्त्रब्राह्मणात्मक) वेद का अध्ययन अभीष्ट है ।

संस्कृत व्याख्या—कृतोपनयनस्य—कृतं उपनयनं यस्य, तस्य, उपनीतस्य; अस्य—द्विजकुमारस्य, व्रतादेशन—व्रतस्य आदेशन, समिधाहरण भूमिशयनसन्ध्योपासनदिवाजागरणादिकं कर्म; क्रमेण—आचान्तं, उदङ्मुख, ब्रह्माञ्जलिकृतं परिपालन, विधिपूर्वकं—मन्त्रब्राह्मणक्रमेण, ब्रह्मणः—वेदस्य, ग्रहणं—अध्ययन, च एव इष्यते—अपेक्ष्यते ।

विशेष—व्रतादेशन—अनेक अर्थों में गृहीत है—मधु, मांस परित्याग के नियम, चान्द्रायण प्राजापत्य आदि प्रायश्चित्त व्रत नियम, समिदाधान, निद्रात्याग, गोदान आदि संकल्प ।

ब्रह्मचर्य चिह्नों का व्रत में विधात्—

यद्यस्य विहितं चर्म यत्सूत्रं या च मेखला ।
यो दण्डो वसनं तत्तदस्य व्रतेष्वपि ॥१७४॥

अन्वय—यस्य यत् चर्म यत् सूत्रं, या च मेखला, यः दण्डः, यत् च वसनं विहितं तत् अस्य व्रतेषु अपि (ज्ञेयम्) ।

शब्दार्थ—सूत्र—यज्ञोपवीत (जनेऊ) विहितं निर्धारित है ।

हिन्दी अर्थ—ब्रह्मचारी का जो धर्म, जो सूत्र, जो मेखला, जो दण्ड और जो वस्त्र निर्धारित है, वह उसे व्रतों में भी ग्रहण करना चाहिए ।

संस्कृत व्याख्या—यस्य—ब्राह्मणकुमारस्य, यत्, चर्म—अजिनं, यत्, सूत्रं—यज्ञोपवीतं, च, मेखला—रशना, यः, दण्डः—यष्टिका, यत्च, वस्त्र, विहितं—निर्धारितं, तत् तत्, अस्य—द्विजबालकस्य, व्रतेषु—नियमसाधनेषु, अपि, ज्ञेयम् ।

विशेष—व्रतेषु—अनेक गृह्यसूत्रों में सोलह संस्कारों के अन्तर्गत चारवेदव्रत नामक संस्कार हैं—महानाम्नी व्रत, महाव्रत, उपनिषद् व्रत एवं गोदान व्रत ।

प्रथमं स्यान्महानाम्नी द्वितीयं स्यान्महाव्रतम् ।
तृतीयं स्यादुपनिषद् गोदानाख्यन्ततः परम् ॥

—**आश्वलायन गृह्यसूत्र**

महर्षि मनु का अभिप्राय: है कि इन चारों व्रतों में प्रत्येक व्रत के प्रारम्भ में ब्रह्मचारी को नवीन मृगचर्म, यज्ञोपवीत, मेखला आदि धारण करनी चाहिए।

गुरुकुल में नियम पालन—

सेवेतेमांस्तु नियमान्ब्रह्मचारी गुरौ वसन्।
सन्नियम्येन्द्रियग्रामं तपोवृद्ध्यर्थमात्मन: ॥१७५॥

अन्वय—(ब्रह्मचारी) गुरौ वसन् आत्मन: तपोवृद्ध्यर्थम् इन्द्रियग्रामं सन्नियम्य इमान् नियमान् तु सेवेत।

शब्दार्थ—तपोवृद्ध्यर्थं—तपस्या की वृद्धि के लिए, सन्नियम्य—वश में करके।

हिन्दी अर्थ—ब्रह्मचारी गुरुकुल में निवास करता हुआ अपनी तपस्या की वृद्धि के लिए इन्द्रिय समूह को सम्यक् रूप से नियन्त्रित करके (आगे कहे गए) इन नियमों का पालन करे।

संस्कृत व्याख्या—ब्रह्मचारी—वटु:, गुरौ—गुरुकुले गुरुसान्निध्ये वा, वसन्—वासं कुर्वन्, आत्मन:—स्वस्य, तपोवृद्ध्यर्थं—तपस: वृद्ध्यर्थं, तपस्सम्वर्धनाय: इन्द्रियग्रामं—इन्द्रियाणां ग्रामं, तं, इन्द्रिय—समूहं; संयम्य—नियन्त्रितं कृत्वा, इमान् वक्ष्यमाणान्, नियमान्—आदेशवाक्यान्, सेवेत—परिपालयेत्।

ब्रह्मचारी के नित्य कर्म—

नित्यं स्नात्वा शुचि: कुर्याद्देवर्षिपितृतर्पणम्।
देवताभ्यर्चनं चैव समिदाधानमेव च ॥१७६॥

अन्वय—(ब्रह्मचारी) नित्यं स्नात्वा शुचि: देवर्षिपितृतर्पणं देवताभ्यर्चनं समिदाधानं च कुर्यात्।

शब्दार्थ—स्नात्वा—स्नान करके, देवताभ्यर्चनं—देवताओं का पूजन।

हिन्दी अर्थ—ब्रह्मचारी नित्य स्नान करके (आचमन आदि से) पवित्र होकर देवों, ऋषियों तथा पितरों का तर्पण, देवताओं का पूजन एवं समिधाओं का आधान (होम) करे।

संस्कृत व्याख्या—नित्यं—प्रतिदिनं, स्नात्वा—स्नानं कृत्वा, शुचि:—पवित्रो स्वच्छो वा भूत्वा, देवर्षिपितृतर्पणं—देवाश्च ऋषयश्च पितरश्च इति देवर्षिपितर:, तेभ्य: तर्पणं, तत्, उदकदानं, देवताभ्यर्चनं—देवतानाम् अभ्यर्चनं, इष्टदेवप्रतिमापूजनं समाप्य, समिदाधानं—समिदाम्, आधानं—यज्ञाग्नौ सायम्प्रातश्च समिद्धोमं, च, कुर्यात्—सम्पादयेत्।

विशेष—स्नात्वा—देह और मन दोनों की शुद्धि के लिए स्नान अनिवार्य है। विद्यार्थी को स्नान के लिए गर्म जल का प्रयोग नहीं करना चाहिए, यदि अंग

अधिक गन्दे हों तो उन्हें गुरु से छिपा कर मर्म जल से धो लेना चाहिए। विद्यार्थी को क्रीडापूर्वक स्नान न करके पानी में डण्डे के समान स्नान करना चाहिए—'नाप्सु श्लाघमानः स्नायात्'—बौधायन स्मृति। 'अप्सु दण्डवन्मज्जनम्'—विष्णु स्मृति।

देवर्षिपितृतर्पणम्—बालक जन्म लेता है तो तीन वर्गों के व्यक्तियों का ऋणी होता है—ब्रह्मचर्य में ऋषियों के प्रति, यज्ञ में देवों के प्रति तथा सन्तति में पितरों के प्रति। जो पुत्रवान् होता है, जो यजमान होता है और जो ब्रह्मचारी होता है वह अनृणी हो जाता है—'जायमानो ह वै ब्राह्मणस्त्रिभिर्ऋणवांजायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः।

—तैत्तिरीय संहिता, ६.३.१०.५

ब्रह्मचारी के निषिद्ध कर्म—

वर्जयेन्मधु मांसं च गन्धं माल्यं रसान्स्त्रियः।
शुक्तानि यानि सर्वाणि प्राणिनां चैव हिंसनम् ॥१७७॥

अन्वय—(ब्रह्मचारी) मधु मांसं गन्धं माल्यं रसान् स्त्रियः च यानि सर्वाणि शुक्तानि, प्राणिनां हिंसनं एव वर्जयेत्।

शब्दार्थ—मधु—मदिरा, रसान्—षड्रस, शुक्तानि—विकृत (अम्लत्व को प्राप्त) पदार्थ।

हिन्दी अर्थ—ब्रह्मचारी मदिरा, मांस, सुगन्धित द्रव्य (चन्दन, कर्पूर, कस्तूर, इत्र, तैल आदि), पुष्पमाला षड्रस (मधुर, अम्ल, कटु, कषाय, तिक्त, लवण), नारी, विकृत पदार्थ (दही, अचार, सिरका आदि) तथा प्राणिहिंसा का परित्याग कर दे।

संस्कृत व्याख्या—मधु—मद्यपानं, मांसं—पिशिताशनं, गन्धं—सुगन्धित-द्रव्यप्रयोगं (चन्दनकर्पूरतैलादिकं, माल्यं—कुसुममालाधारणं, रसान्—षड्रसभक्षणं मधुराम्लकटुकषायातिक्तलवणादिकं, स्त्रियः—रमण्युपभोगं, च, यानि सर्वाणि, शुक्तानि—कालवशेन विकृत्याम्लीभूतानि वस्तूनि, प्राणिनां—जीवानां, हिंसनं—क्लेशनं, चैव, वर्जयेत्—परित्यजेत्।

विशेष—शुक्त—परिभाषा—

शुक्त वे पदार्थ हैं जो काल के अन्तराल से खट्टे हो जाते हैं, यथा दही आदि अथवा स्वाद में विकृत होने लगते हैं, यथा बासी भोजन आदि। सभी टीकाकार दोनों ही प्रकार के भोजन का स्वास्थ्य की दृष्टि से निषेध करते हैं। शुक्त पद का एक अर्थ है—रूक्ष—रूखी अथवा कठोर वाणी, अप्रिय एवं कठोर वचन भी ब्रह्मचारी के लिए निषिद्ध है।

—गौतम स्मृति, २.२६

ब्रह्मचारी के लिए श्लोक में पठित सभी वस्तुओं के उपयोग योग्य, सरस एवं रुचि कर अंश का निषेध है, दर्शन आदि का नहीं क्योंकि वह तो, स्वाभाविक है।

'कन्दमूलफलादीनि सस्नेहलवणानि च ।
यत्तद्द्रव्येऽधिसूयन्ते तच्छुक्तमभिधीयते' ॥

गुण—

'शुक्तं तीक्ष्णोष्णलवणं पित्तकृत् कटुकं लघु ।
रूक्षं कृम्यज्वरानाहशोथार्शोविषकुष्ठनुत्' ॥

ब्रह्मचारी के निषिद्ध कर्म—

अभ्यङ्गमञ्जनं चाक्ष्णोरुपानच्छत्रधारणम् ।
कामं क्रोधं च लोभं च नर्तनं गीतवादनम् ॥१७८॥

अन्वय—(ब्रह्मचारी) अभ्यङ्गम्, अक्ष्णोः अञ्जनं च उपानत् छत्र धारणं कामं क्रोधं च, लोभं, नर्तनं, गीतवादनं च (वर्जयेत्) ।

शब्दार्थ—अभ्यङ्गं—शरीरमर्दन, अक्ष्णोः—आँखों में, उपानत्—चरण-पादुका ।

हिन्दी अर्थ—ब्रह्मचारी सर्वांग तैलमर्दन, आँखों में आँजन, जूते, छाता, काम, क्रोध, लोभ, नृत्य, गीत और वादन इनका परित्याग कर दे ।

संस्कृत व्याख्या—अभ्यङ्गं—अभ्यज्यतेऽनेनेति, तैलोद्वर्तनादिना शरीरानुलेपनं; अक्ष्णोः—नेत्रयोः, अञ्जनं—कज्जलं, उपानत् छत्रधारणं—उपानत् च छत्रं च तयोः धारणं, पादुकातपत्रग्रहणं; कामं—विषयभोगसुखं, क्रोधं—कोपं, च लोभं—परद्रव्याभिलाषं, नर्तनं—हावभावपूर्वकाङ्गविक्षेपणं, गीतवादनं—गीतं च वादनं च अनयोः समाहारः, गायनं वाद्यसञ्चालनं; च, वर्जयेत् ।

विशेष—उपानत्, छत्र—ऋतुओं की प्रखरता को सहने की क्षमता उद्भूत हो अतः इनके उपयोग का निषेध किया गया ।

ब्रह्मचारी के निषिद्ध कर्म—

द्यूतं च जनवादं च परिवादं तथानृतम् ।
स्त्रीणां च प्रेक्षणालम्भमुपघातं परस्य च ॥१७९॥

अन्वय—(ब्रह्मचारी) द्यूतं जनवादं च, परिवादं तथा अनृतं च, स्त्रीणां प्रेक्षणालम्भं च, परस्य उपघातं च (वर्जयेत्) ।

शब्दार्थ—जनवादं—लोगों से बातचीत, कलह आदि, अनृतं—असत्य, आलम्भं—आलिङ्गन, उपघातं—हानि ।

हिन्दी अर्थ—ब्रह्मचारी जुआ, लोगों के साथ विवाद, निन्दा, असत्यभाषण स्त्रियों का दर्शन एवं आलिङ्गन तथा दूसरों को हानि पहुँचाना छोड़ दे ।

संस्कृत व्याख्या—द्यूतं—अक्षक्रीडां, जनवादं—जनैः सह विवादं वाक्कलहं; च, परिवादं—परदोषकथनं, तथा, अनृतं—असत्यं, च, स्त्रीणां—नारीणां, प्रेक्षणालम्भं—प्रेक्षणं च आलम्भं च अनयोः समाहारः, सानुरागं दर्शनस्पर्शनं, परस्य—अन्यजनस्य, उपघातं—कार्यहानिम् अपकारं वा च, वर्जयेत् ।

विशेष—विद्यार्थी को असत्य भाषण नहीं करना चाहिए, प्रतिदिन स्नान करना चाहिए, सूर्य की ओर नहीं देखना चाहिए तथा मधु सेवन, मांस, इत्र, पुष्पसेवन, दिनशयन, तेलमर्दन, अंजन, यान-यात्रा, उपानह, छाता, प्रेम व्यवहार, क्रोध, लालच, मोह, व्यर्थविवाद, वाद्ययन्त्र वादन, गर्म जल में आनन्ददायक स्नान, सावधानी से दाँत स्वच्छ करना, मन को उल्लास पूर्ण स्थिति, नाच-गान, दूसरों की भर्त्सना, भयावह स्नान, नारियों को घूरना या युवानारियों को छूना, जुआ, क्षुद्र पुरुष की सेवा, पशु हनन, अश्लील वार्तालाप, आसव सेवन आदि से दूर रहना चाहिए ।

—गौतम धर्मसूत्र, २.१३-२५

वीर्यपात का निषेध—

एकः शयीत सर्वत्र न रेतः स्कन्दयेत्क्वचित् ।
कामाद्धि स्कन्दयन्रेतो हिनस्ति व्रतमात्मनः ॥१८०॥

अन्वय—सर्वत्र एकः शयीत, क्वचित् रेतः न स्कन्दयेत्, हि कामात् रेतः स्कन्दयन् आत्मनः व्रतं हिनस्ति ।

शब्दार्थ—एकः—अकेला, शयीत—सोए, रेतः—वीर्य, स्कन्दयेत्—स्खलित करे, हिनस्ति—नाश करता है ।

हिन्दी अर्थ—ब्रह्मचारी सर्वत्र अकेला सोए, कभी वीर्यपात न करे क्योंकि स्वेच्छा से वीर्यस्खलन करने पर वह अपने व्रत से च्युत होता है ।

संस्कृत व्याख्या—सर्वत्र—सर्वेषु कालेषु स्थानेषु वा एकः—एकाकी, शयीत—निद्रां लभेत्, क्वचित्—कुत्रापि, रेतः—शुक्रं, न स्कन्दयेत्—न स्खलयेत्, हि—यतः, कामात्—स्वेच्छया, रेतः—वीर्यं, स्कन्दयन्—पातयन्, आत्मनः—स्वस्य, व्रतं—ब्रह्मचर्यं, हिनस्ति—नाशयति ।

विशेष—विद्यार्थी को सम्प्रयोग से नितान्त दूर रहना चाहिए, स्त्रियों से सभी बात करे जब अत्यावश्यक हो ।

—आपस्तम्ब धर्मसूत्र १.१.२.२६

स्वप्नदोष की प्रायश्चित्त विधि—

स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः ।
स्नात्वार्कमर्चयित्वा त्रिः पुनर्मामित्यृचं जपेत् ॥१८१॥

अन्वय—ब्रह्मचारी द्विजः अकामतः स्वप्ने शुक्रं सिक्त्वा, स्नात्वा, अर्कम् अर्चयित्वा 'पुनःमाम्' इति ऋचं त्रिः जपेत्।

शब्दार्थ—अकामतः—अनिच्छा से, शुक्रं—वीर्य को, सिक्त्वा—स्खलित कर, ऋचं—मन्त्र को।

हिन्दी अर्थ—ब्रह्मचारी ब्राह्मण, बिना इच्छा के स्वप्न में वीर्य स्खलित होने पर, स्नान कर, सूर्य का पूजन कर, 'पुनर्मामैत्विन्द्रियम्' इस ऋचा का तीन बार पाठ करे।

संस्कृत व्याख्या—ब्रह्मचारी द्विजः—ब्राह्मणकुमारः, अकामतः—अनिच्छया, स्वप्ने—स्वप्नदर्शने, शुक्रं—वीर्यं, सिक्त्वा—स्खलित्वा, स्नात्वा—स्नानं कृत्वा, अर्कं—सूर्यं, अर्चयित्वा—पुष्पोदकधूपादिभिः सम्पूज्य, 'पुनर्माम्' इति, ऋचं—ऋङ्मन्त्रं, त्रिः—वारत्रयं, जपेत्—पठेत्।

विशेष—विद्यार्थी को कठोरतापूर्वक ब्रह्मचर्य का पालन करना चाहिए किन्तु यदि प्राकृतिक रूप से व्रतभंग हो तो प्रायश्चित्त स्वरूप स्नान, सूर्य पूजन एवं निम्न मन्त्र पाठ से शरीर-मन-प्राण की शुद्धि का विधान है—

> पुनर्मामैत्विन्द्रियं पुनरात्मा द्रविणं ब्राह्मणं च।
> पुनरग्नयो धिष्ठाया यथास्थाम कल्पयातामिहैव॥'
>
> —अथर्ववेद, ७.६७.१

ब्रह्मचारी के कर्त्तव्य—

> **उदकुम्भं सुमनसो गोशकृन्मृत्तिकाकुशान्।**
> **आहरेद्यावदर्थानि भैक्षं चाहरहश्चरेत्॥१८२॥**

अन्वय—(ब्रह्मचारी) उदकुम्भं, सुमनसः, गोशकृत्-मृत्तिका-कुशाम्, यावद्-अर्थानि आहरेत्, अहरहः भैक्षं च चरेत्।

शब्दार्थ—उदकुम्भं—जलपूर्ण घट, गोशकृत्—गोबर, यावदर्थानि—प्रयोजनानुरूप।

हिन्दी अर्थ—ब्रह्मचारी जल से भरा घड़ा, पुष्प, गोबर, मिट्टी तथा कुश (गुरु के) प्रयोजनानुरूप लाये और प्रतिदिन भिक्षाचरण भी करे।

संस्कृत व्याख्या—ब्रह्मचारी, उदकुम्भं—उदकस्य कुम्भं, सजलकलशं; सुमनसः—पुष्पाणि, गोशकृतमृत्तिकाकुशान्—गोशकृतश्च मृत्तिकाश्च कुशाश्च तान्, गोमयमृत्पिंडदर्भान्; यावदर्थानि—यावन्ति अर्थानि, यथावश्यकानि, आहरेत्—आनयेत्, अहरहः—प्रतिदिवसं, भैक्षं—भिक्षाटनं, च, चरेत्—अर्जयेत्।

विशेष—ये उपर्युक्त सभी कर्म उपलक्षण मात्र हैं, अन्य गृहोपयोगी कर्म भी करे किन्तु उच्छिष्ट साफ करना आदि कर्म न करे। —मेधातिथि

भिक्षार्थ गृह चयन—

वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्मसु ।
ब्रह्मचार्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम् ॥१८३॥

अन्वय—ब्रह्मचारी वेदयज्ञैः अहीनानां, स्वकर्मसु प्रशस्तानां, गृहेभ्यः अन्वहं प्रयतः भैक्षम् आहरेत् ।

शब्दार्थ—अहीनानां—जो वञ्चित न हो, प्रशस्तानां—अपनी वृत्ति में सन्तुष्ट पुरुषों के, प्रयतः—नियमपूर्वक, संयमपूर्वक ।

हिन्दी अर्थ—ब्रह्मचारी वेदाभ्यास एवं पञ्चमहायज्ञों के अनुष्ठान में तत्पर तथा स्ववर्णाश्रम धर्म के सम्पादन में सन्तुष्ट, लोगों के घरों से प्रतिदिन नियमपूर्वक भिक्षा माँग कर लाये ।

संस्कृत व्याख्या—ब्रह्मचारी—वटुः, वेदयज्ञैः—वेदाश्च यज्ञाश्च, तैः, वेदाध्ययनबलिवैश्वदेवातिथिभोजनादिभिः, अहीनानां—तत्पराणां, स्वकर्मसु—स्वस्य कर्माणि, तेषु, स्ववर्णाश्रम—विहितकर्त्तव्यानुष्ठानेषु; प्रशस्तानां—सन्तुष्टानां प्रकर्षेण तत्पराणां वा, गृहेभ्यः—भवनेभ्यः, अन्वहं—प्रतिदिनं, प्रयतः—नियमतः, जितेन्द्रियः वा, भैक्षं—भिक्षासमूहं, आहरेत्—आनयेत् ।

विशेष—उपर्युक्त पुरुष शुद्ध जीविका वाले हैं, पाप वृत्ति वाले नहीं, अतः भोजन ग्रहण में दोष नहीं है । गृहस्थ को प्रतिदिन वैश्वदेव के यज्ञ एवं भूतों की बलि के पश्चात् 'स्वस्ति' शब्द एवं जल के साथ भिक्षा देनी चाहिए ।

—गौतम, ५.१६

यतियों एवं ब्रह्मचारियों को भिक्षा आदर एवं स्वागत के साथ देनी चाहिए ।

—मनु, ३.९४

भिक्षा के अयोग्य स्थान—

गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु ।
अलाभे त्वन्यगेहानां पूर्वं पूर्वं विवर्जयेत् ॥१८४॥

अन्वय—(ब्रह्मचारी) गुरोः कुले न भिक्षेत, ज्ञातिकुलबन्धुषु न (भिक्षेत्), अन्यगेहानाम् अलाभेतुपूर्वं पूर्वं विवर्जयेत् ।

शब्दार्थ—गेहानां—घरों का, अलाभ—उपलब्ध न हो ।

हिन्दी अर्थ—ब्रह्मचारी आचार्य के कुल में भिक्षा न माँगे, समान जाति, वंश तथा बन्धु-बान्धवों से भिक्षा न माँगे । भिक्षायोग्य अन्य गृह न मिलने पर पूर्व-पूर्व का परित्याग कर दे ।

संस्कृत व्याख्या—ब्रह्मचारी, गुरोः—आचार्यस्य, कुले—सपिण्डे, न, भिक्षेत—याचेत, ज्ञातिकुलबन्धुषु—ज्ञातयश्च कुलानि च बन्धवश्च तेषु, सगोत्र—वंशसहोदरादिषु, न, भिक्षेत्, अन्यगेहानां—अन्यानि च तानि गेहानि तेषां, परगृहाणां; अलाभे—अप्राप्तौ, तु, पूर्वं पूर्वं—प्रथमं प्रथमं, विवर्जयेत्—परित्यजेत्, प्रथमं बन्धून् तत्राप्राप्ते वंशान् तत्राप्राप्ते ज्ञातीन् तत्राप्यप्राप्ते गुरून् याचेत इत्यभिप्रायः।

विशेष—अभिप्राय यह है कि ब्रह्मचारी योग्य गृह के अभाव में बान्धवगृह में, बान्धवगृह के अभाव में, कुल में, कुलाभाव में, जाति में तथा जाति के अभाव में, अन्त में गुरुकुल में भिक्षाटन करे।

सम्पूर्ण ग्राम भिक्षा के योग्य—

सर्वं वाऽपि चरेद् ग्रामं पूर्वोक्तानामसम्भवे।
नियम्य प्रयतो वाचमभिशस्तांस्तु वर्जयेत् ॥१८५॥

अन्वय—(ब्रह्मचारी) पूर्वोक्तानां असम्भवे प्रयतः वाचं नियम्य सर्वं ग्रामं अपि वा (भिक्षार्थं) चरेत्, अभिशस्तान् तु वर्जयेत्।

शब्दार्थ—पूर्वोक्तानां—पहले कहे हुओं के, नियम्य—संयमित करके, अभिशस्तान्—महापातकग्रस्त पुरुषों को।

हिन्दी अर्थ—ब्रह्मचारी पूर्वोक्त योग्य गृहों के अभाव में संयमपूर्वक वाणी का नियमन कर अर्थात् मौन धारण कर सम्पूर्ण ग्राम में भिक्षाटन करे किन्तु महापातकियों के गृहों को छोड़ दे।

संस्कृत व्याख्या—ब्रह्मचारी, पूर्वोक्तानां—वेदयज्ञैः अहीनानां, असम्भवे—अभावे, प्रयतः—संयमतः, वाच—वाणीं, नियम्य—अवरुध्य, सर्वं—निखिलं, ग्रामं—वासस्थानं, भिक्षार्थं, चरेत्—विहरेत्, अभिशस्तान्—महापातकादिनिन्दितान्, वर्जयेत्—परित्यजेत्।

विशेष—अभिशस्त—महापातकों की गणना निम्न श्लोक में द्रष्टव्य है—

'ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ॥'

—मनुस्मृति, ११.५४

ब्रह्महत्या करना, निषिद्ध मद्य का पान, ब्राह्मण के सुवर्ण की चोरी, गुरु की पत्नी के साथ समागम और इन चारों में से एक के साथ भी एक वर्ष तक संसर्ग—ये पाँच महापातक हैं।

ब्रह्मचारी अपपात्रों (चाण्डाल आदि) एवं अभिशस्तों (महापातकों, अपराधियों) को छोड़ कर किसी से भी भोजन माँग सकता है।

—आपस्तम्ब धर्मसूत्र, १.१.३.२५

शूद्रों से भोजन माँगना निषिद्ध है। —याज्ञवल्क्य स्मृति, १.२९

आपत्तकाल में भी शूद्र के यहाँ का पका भोजन सर्वथा अग्राह्य है।

—पराशर माधव, १.२

वाचं नियम्य—केवल भिक्षा वाक्य का उच्चारण करे, अन्य वार्तालाप निषिद्ध है। —मेधातिथि

अभिशस्तान्—'सार्ववर्णिकं भैक्ष्यचरणमभिशस्तपतितवर्जम्।'

—गौतम स्मृति, २.३५

समिधा चयन एवं दान—

दूरादाहृत्य समिधः सन्निदध्याद्विहायसि।
सायम्प्रातश्च जुहुयात्ताभिरग्निमतन्द्रितः ॥१८६॥

अन्वय—(ब्रह्मचारी) दूरात् समिधः आहृत्य विहायसि सन्निदध्यात् अतन्द्रितः ताभिः सायं प्रातश्च अग्नि जुहुयात्।

शब्दार्थ—विहायसि—खुले आकाश में अथवा ऊँचे स्थान पर, अतन्द्रितः—आलस्यहीन, जुहुयात्—आहुति दे।

हिन्दी अर्थ—ब्रह्मचारी दूर से समिधाएँ लाकर आकाश अर्थात् खुले व ऊँचे स्थान पर रखे, आलस्यरहित होकर उन समिधाओं से सायंकाल व प्रातः अग्नि में हवन करे।

संस्कृत व्याख्या—ब्रह्मचारी, दूरात्—दूरदेशस्थवृक्षात्, समिधः—काष्ठानि, आहृत्य—आनीय, विहायसि—आकाशे आकाशस्थपटलादौ मञ्चादौ वा, सन्निदध्यात्—संस्थापयेत्, अतन्द्रितः—अप्रमादः सन्, ताभिः—अरणीभिः, सायं प्रातश्च—उभयोः सन्ध्याकालयोः, अग्नि जुहुयात्—अग्निहोत्रं कुर्यात्।

विशेष—**दूरात्**—आश्रम के चारों ओर हरीतिमा विद्यमान रहे अतएव आश्रम से दूर स्थित अरण्यादि के वृक्षों से समिधा लाने का आदेश है। अरण्यादि पर व्यक्ति विशेष का स्वामित्व भी नहीं होता है।

विहायसि—भूमि पर रखने से भूमि मलिन होगी, समिधा चरण-स्पर्श आदि दोषों से दूषित होगी तथा गीली लकड़ी भली-भाँति सूख जाए। अतः समिधा ऊँचे मञ्च पर रखे अथवा रस्सी में बाँध कर टाँग दे।

समिधः—प्राचीन भारत में अग्निहोत्र के अनुष्ठान के लिए समिधाहरण विद्यार्थी का आवश्यक कर्त्तव्य था। समिधा मुख्यतः पलाश की, पलाश के अभाव में खदिर, शमी, रोहितक, अश्वत्थ, अर्क, वेतस, न्यग्रोध, प्लक्ष, उदुम्बर, बिल्व, चन्दन, शाल, देवदार आदि वृक्षों की हो सकती है। —ब्रह्मपुराण

समिधा का व्यास अंगूठे के बराबर होना चाहिए, यह बिना छीली हुई व बिना कीड़ा लगी हुई होनी चाहिए, इसके टुकड़े नहीं होने चाहिए, पत्तियाँ नहीं होनी चाहिए व पर्याप्त मजबूत होनी चाहिए। इसकी लम्बाई एक प्रादेश (अंगूठे से लेकर तर्जनी तक) होनी चाहिए।

—त्रिकाण्डमण्डन, २.८२-८४

नियम भंग में अवकीर्णी व्रत—

अकृत्वा भैक्षचरणमसमिध्य च पावकम्।
अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत् ॥१८७॥

अन्वय—(ब्रह्मचारी) अनातुरः (सन्) सप्तरात्रं भैक्षचरणम् अकृत्वा, पावकम् असमिध्य च अवकीर्णिव्रतं चरेत्।

शब्दार्थ—अनातुरः—रोगरहित, असमिध्य—समिधाएँ न देकर, अवकीर्णिव्रतं—नियम भंग पाप का प्रायश्चित्त।

हिन्दी अर्थ—ब्रह्मचारी नीरोग रहकर सात रात्रियों तक भिक्षार्जन न करके, अग्नि को समिधाओं से न जला करके, प्रायश्चित्त रूप में अवकीर्णि व्रत करे।

संस्कृत व्याख्या—ब्रह्मचारी, अनातुरः—न आतुरः, अरोगः स्वस्थः वा; सन्, सप्तरात्रं—सप्तनां रात्रीणां समाहारः, सप्तरात्रिपर्यन्तं; भैक्षचरणं—भिक्षाणां समूहः भैक्षं, तस्य चरणं, भिक्षाहारं; अकृत्वा—असम्पादयित्वा, पावकं—अग्निं, असमिध्य—समिद्भिः होत्रमकृत्वा, च, अवकीर्णिव्रतं—ब्रह्मचर्यव्रतलोपप्रायश्चित्तं, चरेत्—कुर्यात्।

विशेष—आश्रम की सुव्यवस्था के लिए भिक्षाचरण व समिधाहरण अपरिहार्य थे किन्तु रोगी होने की अवस्था में इन कर्त्तव्यों के पालन में प्रमाद क्षम्य था। स्वस्थ ब्रह्मचारी द्वारा अधिकतम सात दिन का व्यवधान होने पर प्रायश्चित्त हेतु अवकीर्णिव्रत (अग्नि में आज्याहुति) का विधान था।

अवकीर्णिव्रतम्—अवकीर्णमनेन इति, येन नियमभंगः कृतः सः अवकीर्णि।

'अवकीर्णि क्षतव्रत इति अमरः।'

'अवकीर्णी भवेद्गत्वा ब्रह्मचारी तु योषितम्।
गर्दभं पशुमालभ्य नैर्ऋतं स विशुध्यति ॥'

—याज्ञवल्क्य स्मृति, ३.२८०

प्रायश्चित्त विधि—

'अवकीर्णी तु काणेन गर्दभेन चतुष्पथे।
पाकयज्ञविधानेन यजेत निर्ऋतिं निशि ॥
हुत्वाग्नौ विधिवद्धोमानन्तश्च समित्यृचा।
वातेन्द्रगुरुवह्नीनां जुहुयात्सर्पिषाहुतीः ॥'

—मनुस्मृति, ११.११८-११९

भिक्षान्न पर निर्भरता पुण्यप्रद—

भैक्षेण वर्तयेन्नित्यं नैकान्नादी भवेद्व्रती ।
भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता ।।१८८।।

अन्वय—व्रती भैक्षेण नित्यं वर्तयेत्, एकान्नादी न भवेत्, व्रतिनः भैक्षेण वृत्तिः उपवाससमा स्मृता ।

शब्दार्थ—भैक्षेण—भिक्षा में प्राप्त, एकन्नादी—एक व्यक्ति का अन्न खाने वाला ।

हिन्दी अर्थ—ब्रह्मचारी भिक्षा में प्राप्त आहार से नित्य प्रति निर्वाह करे, किसी एक अन्न का अथवा एक व्यक्ति के अन्न का भोजन न करे। ब्रह्मचारी की भिक्षान्न वृत्ति उपवास के समान फलदायी कही गई है ।

संस्कृत व्याख्या—व्रती—व्रतमस्यास्तीति, ब्रह्मचारी; भैक्षेण—भिक्षाणां समूहः तेन, भिक्षाहारेण; नित्यं—प्रत्यहं; वर्तयेत्—स्वजीवननिर्वाहं कुर्यात्, एकान्नादी—एकस्य अन्नम् एकान्नम्, एकान्नम् अत्तीति, एकगृहप्रदत्ताहार्यभोजी; न, भवेत्—स्यात्, व्रतिना—ब्रह्मचारिणः, भैक्षेण—भिक्षालब्धान्नेन, वृत्तिः—जीविका, उपवाससमा—उपवासेन समा, उपवासतुल्यफलप्रदा; स्मृता—प्रसिद्धा ।

विशेष—भैक्षेण - कुछ विद्वानों के अनुसार भिक्षान्न सिद्ध अर्थात् पका हुआ होना चाहिए जबकि कुछ शुद्धता के लिए स्वपाकी होने पर बल देते हैं । ब्रह्मचारी को थोड़ा-थोड़ा कई गृहों से भोजन माँगना चाहिए । मिताक्षरा ने एक ग्रास (कौर) की भिक्षा की चर्चा की है, एक ग्रास मोर के अण्डे के बराबर होता है—

'भिक्षा च ग्रास ग्राससम्मिता ।
ग्रासस्च मयूराण्डपरिमाणः ।।'

—याज्ञवल्क्य, १.१०८

न भैक्ष्यं परपाकः स्यान्न च भैक्ष्यं प्रतिग्रहः ।
सोमपानसमं भैक्ष्यं तस्माद् भैक्षेण वर्तयेत् ।।९।।
भैक्षस्यागमशुद्धस्य प्रोक्षितस्य हुतस्य च ।
यांस्तस्य ग्रसते ग्रासांस्ते तस्य क्रतुभिः समाः ।।१०।।

दूसरे के द्वारा पकाया गया तथा प्रतिग्रह (दान) भिक्षान्न नहीं माना जाता, भिक्षान्न सोमपान के समान है अतः ब्रह्मचारी भिक्षावृत्ति करे ।

आगम (उपार्जन) से शुद्ध, प्रोक्षित (जल छिड़के हुए) तथा हवन किए हुए भिक्षान्न के जिन ग्रासों को ब्रह्मचारी खाता है, वे ग्रास यज्ञों के समान (पवित्र) हैं ।

यथेष्ट भोजन विधान—

व्रतवद्देवदैवत्ये पित्र्ये कर्मण्यथर्षिवत् ।
काममभ्यर्थितोऽश्नीयाद्व्रतमस्य न लुप्यते ।।१८९।।

अन्वय—अथ (ब्रह्मचारी) देवदैवत्ये अभ्यर्थितः व्रतवत्, पित्र्ये कर्मणि (अभ्यर्थितः) ऋषिवत् कामम् अश्नीयात् । अस्य व्रतं न लुप्यते ।

शब्दार्थ—देवदैवत्ये—देवता को लक्ष्य करके, पित्र्ये—पितृ सम्बन्धी, कामं—इच्छानुसार ।

हिन्दी अर्थ—और ब्रह्मचारी देवतानिमित्तक कर्म में (यजमान द्वारा) निमन्त्रित होने पर ब्रह्मचर्य नियमानुरूप एवं पितृकार्य (श्राद्ध) में निमन्त्रित होने पर ऋषियों के सदृश (मधुमांसादि वर्जित) यथेष्ट भोजन करे, इस प्रकार ब्रह्मचर्य व्रत का लोप नहीं होता है ।

संस्कृत व्याख्या—अथ, देवदैवत्ये—देवः देवता, अस्येति देवदैवत्यं, तस्मिन् कर्मणि, देवतामुद्दिश्य आयोजिते ब्राह्मणभोजे; अभ्यर्थितः—यजमानेन प्रार्थितः, व्रतवत्—ब्रह्मचर्यनियमानुसारं सात्विकभोजनं, पित्र्ये कर्मणि—पितुः भवं पित्र्यं, तस्मिन्, श्राद्धादौ, अभ्यर्थितः, ऋषिवत्—ऋषिणा तुल्यं निरामिषभोजनं, कामं—यथेप्सितं, अश्नीयात्—भुञ्जीत, अस्य—ब्रह्मचारिणः, व्रतं—ब्रह्मचर्याश्रमं, न, लुप्यते—विलुप्तो भवति ।

विशेष—ब्रह्मचारी एक गृह प्रदत्त अन्न का अवलम्बन न ले किन्तु आदित्य आदि देव पूजन या पितरों के श्राद्धकाल में निमन्त्रित होने पर किसी एक व्यक्ति के यहाँ भर पेट भोजन कर सकता है—

'ब्रह्मचर्ये स्थितो नैकमन्नमद्यादनापदि ।
ब्राह्मणः काममश्नीयाच्छ्राद्धे व्रतमपीडयन् ।।'

—याज्ञवल्क्य स्मृति, १.३४

भोजन का अधिकारी केवल ब्राह्मण—

ब्राह्मणस्यैव कर्मैतदुपदिष्टं मनीषिभिः ।
राजन्यवैश्ययोस्त्वेवं नैतत्कर्म विधीयते ।।१९०।।

अन्वय—मनीषिभिः एतत् कर्म ब्राह्मणस्य एव उपदिष्टं, राजन्यवैश्ययोः तु एतत् कर्म एवं न विधीयते ।

शब्दार्थ—मनीषिभिः—विद्वानों के द्वारा, एतत्—ब्रह्मभोज ।

हिन्दी अर्थ—मनीषियों ने इस (देवपूजन व श्राद्धकाल में आयोजित ब्रह्मभोज) कर्म का केवल ब्राह्मण के लिए उपदेश किया है; क्षत्रिय एवं वैश्य ब्रह्मचारियों के लिए इस कर्म का इस प्रकार से विधान नहीं है ।

संस्कृत व्याख्या—मनीषिभिः—विद्वद्भिः, एतत् कर्म—देवदैवत्ये वा भोजनं; ब्राह्मणस्य—अग्रजन्मनः, एव, उपदिष्टं—विहितं, राजन्यवैश्ययोः—राजन्यश्च वैश्यश्च राजन्यवैश्यौ, तयोः, क्षत्रियवणिजोः; तु, एतत् कर्म—भोजनग्रहणरूपकार्यं, एवं, न, विधीयते—उपदिश्यते ।

विशेष—ब्राह्मण सदा से अति सम्मान के पात्र माने गए, उन्हें पृथ्वी का प्रत्यक्ष देवता कहा गया । व्रतों में, तपों में, यज्ञकर्मों में जो भी दोष हों वे सब ब्राह्मणों के सम्मान से, प्रतिदान में प्राप्त आशीर्वाद से नष्ट हो जाते हैं—

'व्रतश्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्मणि ।
सर्वं भवति निश्छिद्रं ब्राह्मणैरुपवादितम् ॥'

—पराशर माधव, ६.५२

अतः ब्राह्मणों की सन्तुष्टि एवं प्रसन्नता आवश्यक मानकर केवल ब्राह्मणों के लिए कर्मान्त में सामर्थ्यानुसार एक या अधिक ब्राह्मण को भोजन के लिए आमन्त्रित करने का विधान धर्मशास्त्रों में है ।

अध्ययन एवं आचार्य हित में तत्परता—

चोदितो गुरुणा नित्यमप्रचोदित एव वा ।
कुर्यादध्ययने यत्नमाचार्यस्य हितेषु च ॥१९१॥

अन्वय—(ब्रह्मचारी) गुरुणा चोदितः अप्रचोदितः एव वा अध्ययने, आचार्यस्य हितेषु च नित्यं यत्नं कुर्यात् ।

शब्दार्थ—चोदितः—प्रेरित, हितेषु—कल्याण कार्यों में ।

हिन्दी अर्थ—(ब्रह्मचारी) गुरु के प्रेरित करने पर अथवा प्रेरित न करने पर भी अध्ययन और आचार्य के लिए कल्याणकर कार्य में सर्वदा प्रयत्नशील रहे ।

संस्कृत व्याख्या—गुरुणा—आचार्येण, चोदितः—प्रेरितः, अप्रचोदितः—अप्रेरितः एव वा, स्वयमेव, अध्ययने—पठने, आचार्यस्य—शिक्षकस्य, हितेषु—कल्याणकार्येषु, च, नित्यं—निरन्तरं, यत्नं—उद्योगं, कुर्यात्—विदध्यात् ।

गुरु के प्रति श्रद्धा भाव—

शरीरं चैव वाचं च बुद्धीन्द्रियमनांसि च ।
नियम्य प्राञ्जलिस्तिष्ठेद्वीक्षमाणो गुरोर्मुखम् ॥१९२॥

अन्वय—(ब्रह्मचारी) शरीरं च वाचं च बुद्धीन्द्रियमनांसि च नियम्य एव प्राञ्जलिः गुरोः मुखं वीक्षमाणः तिष्ठेत् ।

शब्दार्थ—प्राञ्जलिः—हाथ जोड़कर, वीक्षमाणः—देखता हुआ ।

हिन्दी अर्थ—ब्रह्मचारी शरीर, वाणी, बुद्धि, इन्द्रिय तथा मन को वश में करके हाथ जोड़कर गुरु के मुख की ओर देखता हुआ खड़ा रहे।

संस्कृत व्याख्या—ब्रह्मचारी, शरीरं—देहं, वाचं—वाणीं, बुद्धीन्द्रियमनांसि—बुद्धिश्च इन्द्रियाणि च मनश्च, तानि, नियम्य—संयम्य, एवा, प्राञ्जलिः—कृताञ्जलिः, गुरोः—आचार्यस्य, मुखं—आननं प्रति, वीक्षमाणः—अवलोकमानः, तिष्ठेत्—संस्थितो भवेत्, नोपविशेदित्यर्थः।

विशेष—शास्त्रों के अनुसार संयमन की प्रक्रिया में मन प्रधान है क्योंकि 'मनश्चञ्चलमस्थिरम्।' —श्रीमद्भगवद्गीता, ६.२६.

शिष्टाचार पालन—

नित्यमुद्धृतपाणिः स्यात्साध्वाचारः सुसंयतः।
आस्यतामिति चोक्तः सन्नासीताभिमुखं गुरोः ॥१९३॥

अन्वय—(ब्रह्मचारी) नित्यम् उद्धृतपाणिः साध्वाचारः सुसंयतः स्यात् (गुरुणा) आस्यताम् इति उक्तः सन् गुरोः अभिमुखम् आसीत।

शब्दार्थ—उद्धृतपाणिः—हाथ निकाले हुए, साध्वाचारः—शिष्टाचार, आस्यतां—बैठो।

हिन्दी अर्थ—ब्रह्मचारी सर्वदा (उत्तरीयादि से बाहर) हाथ निकाले हुए, शिष्टाचार से युक्त और सम्यक् अनुशासित रहे, गुरु के द्वारा 'बैठो' कहने पर गुरु के सम्मुख बैठ जाए।

संस्कृत व्याख्या—ब्रह्मचारी, नित्यं—सर्वदा, उद्धृतपाणिः—उद्धृतः पाणिः येन सः, निर्गतदक्षिणबाहुः; साध्वाचारः—साधुः आचारः यस्य सः, शोभनव्यवहारः; सुसंयतः—सम्यगनुशासितः वस्त्रावृतशरीरः वा, स्यात्—भवेत्, गुरुणा, आस्यतां—उपविश्यतां, इति उक्तः सन्—एवं आदिष्टः सन्, गुरोः—आचार्यस्य, अभिमुखं—मुखस्य संमुखं, आसीत—उपविशेत्।

गुरु की अपेक्षा स्तर निम्नता—

हीनान्नवस्त्रवेषः स्यात्सर्वदा गुरुसन्निधौ।
उत्तिष्ठेत्प्रथमं चास्य चरमं चैव संविशेत् ॥१९४॥

अन्वय—(ब्रह्मचारी) गुरुसन्निधौ सर्वदा हीनान्नवस्त्रवेषः स्यात्। अस्य प्रथमं उत्तिष्ठेत् च, चरमं च एव संविशेत्।

शब्दार्थ—गुरुसन्निधौ—गुरु के सामीप्य में, हीनान्नवस्त्रवेष—गुरु की अपेक्षा न्यून अन्न, वस्त्र और वेश वाला।

हिन्दी अर्थ—ब्रह्मचारी गुरु के समीप सदैव (गुरु की अपेक्षा) अन्न, वस्त्र व वेश को हीन रखे, उनके पहले सोकर उठे, उनके सोने के बाद सोए।

संस्कृत व्याख्या—ब्रह्मचारी, गुरुसन्निधौ—गुरोः सन्निधिः, तस्मिन्, गुरुसामीप्ये, सर्वदा—सदैव, तदपेक्षया, हीनान्नवस्त्रवेषः—हीनम् अन्नानि वस्त्राणि वेषाः यस्य सः, निकृष्टभोजनाच्छादनप्रसाधनः; स्यात्—भवेत्, अस्य—गुरोः, उत्थानात्, प्रथमं—रात्रिशेषे, उत्तिष्ठेत्—शय्यां त्यजेत्, च, चरमं—दिनान्ते, गुरौ सुप्ते इत्यर्थः, च एव संविशेत्—शयीत्।

आज्ञापालन का प्रकार—

प्रतिश्रवणसम्भाषे शयानो न समाचरेत्।
नासीनो च भुञ्जानो न तिष्ठन्न पराङ्मुखः ॥१६५॥

अन्वय—(ब्रह्मचारी) शयानः न, आसीनः न, भुञ्जानः न, तिष्ठन् न, पराङ्मुखः च न प्रतिश्रवणसम्भाषे समाचरेत्।

शब्दार्थ—पराङ्मुखः—विमुख होकर, प्रतिश्रवणसम्भाषे—आज्ञा स्वीकार करना तथा वार्तालाप करना।

हिन्दी अर्थ—ब्रह्मचारी सोते हुए, आसन पर बैठे हुए, भोजन करते हुए, खड़े हुए अथवा मुख फेरे हुए गुरु की आज्ञा स्वीकार अथवा बातचीत न करें।

संस्कृत व्याख्या—शयानः—सुप्तः, न, आसीनः—आसनोपविष्टः न, भुञ्जानः—भोजनं चर्वणन्, न, तिष्ठन्—स्थितः, न, पराङ्मुखः—विमुखः, च, न, प्रतिश्रवणसम्भाषे—प्रतिश्रवणं च सम्भाषां च, गुर्वादेशाङ्गकिरणवार्तालापे, न, समाचरेत्—कुर्यात्।

आज्ञापालन का प्रकार—

आसीनस्य स्थितः कुर्यादभिगच्छंस्तु तिष्ठतः।
प्रत्युद्गम्य त्वाव्रजतः पश्चाद्धावंस्तु धावतः ॥१६६॥

अन्वय—(ब्रह्मचारी) आसीनस्य स्थितः, तिष्ठतः तु अभिगच्छन्, आव्रजतः तु प्रत्युद्गम्य धावतः तु पश्चाद् धावन् (प्रतिश्रवणसम्भाषे) कुर्यात्।

शब्दार्थ—अभिगच्छन्—सम्मुख जाकर, आव्रजतः—आते हुए का, प्रत्युद्गम्य—स्वागत में स्वयं आगे बढ़ कर।

हिन्दी अर्थ—ब्रह्मचारी आसन पर बैठे हुए गुरु के सम्मुख खड़े होकर, खड़े हुए गुरु के सम्मुख जाकर, आते हुए गुरु के स्वागत में आगे बढ़ कर और दौड़ते हुए गुरु के पीछे दौड़ कर आज्ञा का प्रतिश्रवण एवं सम्भाषण करे।

संस्कृत व्याख्या—आसीनस्य—आस्ते उपविष्टस्य, आज्ञां ददतः आचार्यस्य; स्थितः—तिष्ठन्, तिष्ठतः—दूरे स्थितस्य, आदिशतः गुरोः तु, अभिगच्छन्—संमुखं कतिचिद् पदानि व्रजन्, आव्रजतः—आगच्छतः, गुरोः तु, प्रत्युद्गम्य—स्वागताय अग्रे गत्वा, धावतः—त्वरितचलतः, आदिशतः गुरोः तु, पश्चात् धावन्—गुरोः अनुधावन्, प्रतिश्रवण—सम्भाषे, कुर्यात्—समाचरेत् ।

आज्ञापालन का प्रकार—

पराङ्मुखस्याभिमुखो दूरस्थस्यैत्य चान्तिकम् ।
प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः ।।१९७।।

अन्वय—(ब्रह्मचारी) पराङ्मुखस्य अभिमुखः, दूरस्थस्य च अन्तिकम् एत्य, शयानस्य निदेशे तु तिष्ठतः (गुरोः) प्रणम्य एव च (प्रतिश्रवणसम्भाषे) कुर्यात् ।

शब्दार्थ—अन्तिकम्—समीप, एत्य—जाकर, निदेशे—सन्निकट ।

हिन्दी अर्थ—ब्रह्मचारी आचार्य के पराङ्मुख (पीठ फेरे) रहने पर उनके सामने खड़े होकर, दूर होने पर समीप जाकर, सोए रहने पर अथवा निकट स्थित रहने पर (गुरु को) प्रणाम करके ही (उनकी आज्ञा का) प्रतिश्रवण एवं सम्भाषण करे ।

संस्कृत व्याख्या—पराङ्मुखस्य—पराक् मुखं यस्य स परावर्तितमुखस्य, आदिशतः गुरोः, अभिमुखः—समक्षं स्थितः, दूरस्थस्य—दूरे तिष्ठतीति दूरस्थः तस्य, दूरङ्गतस्य, च, अन्तिकं—समीपं, एत्य—गत्वा, शयानस्य—सुप्तस्य, निदेशे—सन्निकटे, तिष्ठतः—उपविष्टस्य, गुरोः, प्रणम्य—नमस्कारं कृत्वा, एव, च, प्रतिश्रवणसम्भाषे, कुर्यात् ।

विशेष—निदेशे—भाष्यकार ब्युहलर के अनुसार, 'निदेशे' शब्द का अर्थ है—नीचे स्थान पर—'in a lower place'.

आसन एवं आसीन होने की संयत मुद्रा—

नीचं शय्यासनं चास्य सर्वदा गुरुसन्निधौ ।
गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत् ।।१९८।।

अन्वय—गुरुसन्निधौ अस्य शय्यासनं च सर्वदा नीचं (भवेत्), गुरोः चक्षुर्विषये तु यथेष्टासनः न भवेत् ।

शब्दार्थ—नीचं—नीचा, चक्षुर्विषये—आँखों के सामने, यथेष्टासनः—पैर फैलाकर या आराम से ।

हिन्दी अर्थ—गुरु के सान्निध्य में ब्रह्मचारी का शय्या और आसन (गुरु की अपेक्षा) सर्वदा नीचा रहे, गुरु के नेत्रों के सम्मुख आसन पर अस्त-व्यस्त न बैठे ।

संस्कृत व्याख्या—गुरुसन्निधौ—गुरोः सन्निधिः तस्मिन् गुरुसमीपे, अस्य—ब्रह्मचारिणः, शय्यासनं—शय्या च आसनं च तयोः समाहारः, पर्यङ्कोपवेशनादिकं, सर्वदा—सदा, नीचं—अधोभागे, भवेत्—स्यात्, गुरोः—आचार्यस्य, चक्षुर्विषये—चक्षुषः विषयं, तस्मिन्, दृष्टिसम्मुखे; तु, यथेष्टासनः—यथेष्टम् आसनं यस्य सः, सुखासीनः न, भवेत्—स्यात् । न तत्र यथेष्टं चेष्टां चरणप्रसारादिकां कुर्यात् ।

विशेष—लगभग सभी धर्मसूत्र इस तथ्य से सहमत हैं कि शिष्य को आजीवन गुरु के साथ जाना चाहिए, गुरु को स्नान में सहायता देनी चाहिए, शरीर को दबाना चाहिए, उच्छिष्ट खाना चाहिए। गुरु को प्रसन्न करने वाले कार्य करना चाहिए, बुलाने पर पढ़ना चाहिए, पैरों को आगे निकाल कर सम्मुख नहीं बैठना चाहिए, जोर से गला नहीं स्वच्छ करना चाहिए। हँसना, जँभाई लेना, अंगुली चटखाना जैसे कार्य सम्मुख उचित नहीं है। आवाज देने पर तुरन्त उपस्थित होना चाहिए, गुरु से नीचे आसन पर बैठना चाहिए। गुरु के सोने के उपरान्त सोना और जगने के पहले जगना चाहिए। —गौतम धर्मसूत्र, २.२०-२१, ३०-३२

गुरु नामग्रहण व अनुकरण अनुचित—

नोदाहरेदस्य नाम परोक्षमपि केवलम् ।
न चैवास्यानुकुर्वीत गतिभाषितचेष्टितम् ।।१९९।।

अन्वय—(ब्रह्मचारी) अस्य परोक्षम् अपि केवलं नाम न उदाहरेत् । अस्य गतिभाषितचेष्टितं न च एव अनुकुर्वीत ।

शब्दार्थ—परोक्षं—अनुपस्थिति में, गतिभाषितचेष्टितं—गमन, भाषण, चेष्टा, अनुकुर्वीत—नकल करे ।

हिन्दी अर्थ—ब्रह्मचारी आचार्य के परोक्ष में भी केवल नाम का उच्चारण न करे। उनके गमन, भाषण एवं चेष्टा आदि की (उपहास में) नकल न करे।

संस्कृत व्याख्या—अस्य—आचार्यस्य, परोक्षं—अप्रत्यक्षं, अपि, केवलं नाम—अभिधानमात्रं, आचार्यादिपूजावचनोपपदशून्यं नाम, न, उदाहरेत्—उच्चारयेत्, अस्य—गुरोः, गतिभाषितचेष्टितं—गतिश्च, भाषितं च चेष्टितं च, गमनभाषणक्रियादिरूपव्यापारं, न च एव, अनुकुर्वीत—उपहासार्थं अनुकरणं न कुर्यात् ।

विशेष—श्री, भट्ट या आचार्य की उपाधि लगाए बिना गुरु की अनुपस्थिति में उनका केवल नाम नहीं लेना चाहिए। न उनकी क्रियाओं की भद्दी नकल अथवा उपहास करना चाहिए।

—धर्मशास्त्र का इतिहास, काणे, पृष्ठ २३६

'परोक्षं सत्कृपापूर्वं प्रत्यक्षं न कथंचन।
दुष्टानुचारी च गुरोरिह वाऽमुत्र चेत्यधः ॥११॥'

परोक्ष में यदि गुरु का नामग्रहण आवश्यक हो तो सम्मानसूचक विशेषण आदि पद संयुक्त करना चाहिए, प्रत्यक्ष में कदापि नाम उच्चारण न करे। इसके विपरीत अशिष्टाचरण करने वाला इस लोक अथवा परलोक में दुर्गति को प्राप्त होता है।

गुरु निन्दा श्रवण निषेध—

गुरोर्यत्र परीवादो निन्दा वापि प्रवर्तते।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥२००॥

अन्वय—(ब्रह्मचारी) यत्र गुरोः परीवादः निन्दा अपि वा प्रवर्तते, तत्र कर्णौ पिधातव्यौ, ततः अन्यतः वा गन्तव्यम्।

शब्दार्थ—परीवादः—विद्यमान दोषों का कथन, निन्दा—अविद्यमान दोषों का कथन।

हिन्दी अर्थ—ब्रह्मचारी, जहाँ गुरु का परीवाद (विद्यमान दोषों की चर्चा) अथवा निन्दा (अविद्यमान दोषों की चर्चा) की जा रही हो, वहाँ दोनों कान बन्द कर ले अथवा वहाँ से (हटकर) अन्यत्र चला जाय।

संस्कृत व्याख्या—यत्र—यस्मिन् स्थाने, गुरोः—आचार्यस्य, परीवादः—विद्यमानदोषस्याभिधानम्, मिथ्यादोषाक्षेपः; निन्दा—अविद्यमानदोषाभिधानम्, गुणेषुदोषदृष्टिः; अपि, वा, प्रवर्तते—क्रियते, तत्र—तस्मिन् स्थाने, स्थितेन शिष्येण, कर्णौ—श्रवणौ, पिधातव्यौ—अङ्गुल्यादिना तिरोधातव्यौ, ततः—तस्मात् देशात्, अन्यतः—देशान्तरं, वा, गन्तव्यं—अपसरणीयम्।

गुरु निन्दा का परिणाम—

परीवादात्खरो भवति श्वा वै भवति निन्दकः।
परिभोक्ता कृमिर्भवति कीटो भवति मत्सरी ॥२०१॥

अन्वय—(ब्रह्मचारी) परीवादात् खरः भवति, निन्दकः वै श्वा भवति परिभोक्ता कृमिः भवति, मत्सरी कीटः भवति।

शब्दार्थ—खरः—गदहा, श्वा—कुत्ता, कृमिः—सूक्ष्म कीड़ा, कीटः—स्थूल कीड़ा।

हिन्दी अर्थ—ब्रह्मचारी गुरु के प्रति, दोषारोपण से गदहा होता है, निन्दा से कुत्ता होता है, (सम्पत्ति का) उपभोग करने से सूक्ष्म कीड़ा होता है, ईर्ष्या करने से स्थूल कीट होता है।

संस्कृत व्याख्या—परीवादात्—सत्य दोषारोपात्, खरः—गर्दभः भवति, निन्दकः—गुणेषु दोषाविष्कारकः, वै, श्वा—कुक्कुरः, भवति, परिभोक्ता—संमृद्ध्योपजीवी, कृमिः—सूक्ष्मकीटः भवति, मत्सरी—ईर्ष्याकरः, कीटः—स्थूलकीटः, भवति ।

विशेष—परीवादात्—शिष्य को गुरु के विरोधी वचन नहीं सुनने चाहिए, यदि वह यह कार्य करता है तो आगे के जन्मों में पशु एवं कीड़े-मकोड़े के रूप में जन्म लेगा ।

—विष्णुधर्मसूत्र, २८.२६

परिभोक्ता—यहाँ 'समृद्धि का उपभोग करने वाला' अर्थ न होकर गुरु निन्दा का प्रसंग होने से 'निन्दा रस का उपभोक्ता' अर्थ ग्रहण करना चाहिए ।

गुरु की अर्चन विधि—

दूरस्थो नार्चयेदेनं न क्रुद्धो नान्तिके स्त्रियाः ।
यानासनस्थश्चैवैनमवरुह्याभिवादयेत् ॥२०२॥

अन्वय—(ब्रह्मचारी) दूरस्थः, क्रुद्धः, न, स्त्रियाः अन्तिके वा एनं न अर्चयेत्, यानासनस्थः, एव च एनम् अवरुह्य अभिवादयेत् ।

शब्दार्थ—अन्तिके—समीप में, एनं—गुरु को, अवरुह्य—उतर कर ।

हिन्दी अर्थ—ब्रह्मचारी दूर रहकर, क्रुद्ध होकर अथवा स्त्री के समीप होने पर गुरु की पूजा न करे, वाहन और आसन पर बैठा हुआ शिष्य गुरु को उतर कर अभिवादन करे ।

संस्कृत व्याख्या—ब्रह्मचारी, दूरस्थः—दूरे तिष्ठतीति, दूरदेशस्थितः; क्रुद्धः—कुपितः, स्त्रियाः—कामिन्याः, अन्तिके—समीपे, वा, एनं—आचार्यं, न, अर्चयेत्—पूजयेत्, यानासनस्थः—यानं च आसनं च, यानासने, तयोः तिष्ठतीति, वाहनारूढः आसनोपविष्टः; च एव, एनं—आचार्यं, अवरुह्य—अवतीर्य, अभिवादयेत्—प्रणामं कुर्यात् ।

गुरु के साथ बैठना निषिद्ध—

प्रतिवातेऽनुवाते च नासीत गुरुणा सह ।
असंश्रवे चैव गुरोर्न किञ्चिदपि कीर्तयेत् ॥२०३॥

अन्वय—(ब्रह्मचारी) प्रतिवाते अनुवाते च गुरुणा सह न आसीत । गुरोः असंश्रवे च एव किञ्चित् अपि न कीर्तयेत् ।

शब्दार्थ—प्रतिवाते—वायु की प्रतिकूल दिशा में, अनुवाते—वायु की अनुकूल दिशा में, असंश्रवे—न सुनाई पड़े ।

हिन्दी अर्थ—ब्रह्मचारी प्रतिकूल वात (अर्थात् गुरु की ओर से आने वाली वायु) तथा अनुकूल वात (अर्थात् शिष्य की ओर से आने वाली वायु) में गुरु के साथ न बैठे, गुरु को सुनाई न पड़े, इस प्रकार कुछ भी न कहे।

संस्कृत व्याख्या—ब्रह्मचारी, प्रतिवाते, वातस्य प्रतिकूलं, तस्मिन्, प्रतिकूल-पवने, गुरुदेशात् शिष्यदेशमागते; अनुवाते—वातस्य पश्चात्, तस्मिन्, अनुकूल पवने, शिष्यदेशात् गुरुदेशमागते; च, गुरुणा—आचार्येण, सह—सार्क, न, आसीत—उपविशेत्, गुरोः—आचार्यस्य, असंश्रवे—अविद्यमानः संश्रवः यत्र, तस्मिन्, श्रवणायोग्यस्थाने; च एव, किञ्चित् अपि, न, कीर्तयेत्—कथयेत्।

विशेष—प्रतिवात—जब रथ गुरु के घर से शिष्य के घर की ओर जा रहा हो।

अनुवात—जब रथ शिष्य के घर से गुरु के घर की ओर जा रहा हो।
ऐसी स्थिति में शिष्य गुरु के साथ एकासन पर न बैठे अपितु तिर्यक्वात अथवा पीछे की ओर होकर बैठे।

असंश्रवे—न सुनाई पड़े, ऐसी धीमी आवाज में गुरु तथा किसी अन्य के विषय में भी वार्तालाप होना चाहिए।

गुरु के साथ बैठने योग्य स्थान—

गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च।
आसीत गुरुणा सार्धं शिलाफलकनौषु च ॥२०४॥

अन्वय—(ब्रह्मचारी) गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च शिलाफलकनौषु च गुरुणा सार्धम् आसीत।

शब्दार्थ—उष्ट्र—ऊँट, प्रस्तरेषु—दरी आदि बिछौनों पर, कटेषु—चटाई पर, नौषु—नौकाओं पर।

हिन्दी अर्थ—ब्रह्मचारी बैलगाड़ी, घोड़ागाड़ी, ऊँटगाड़ी, महलों की छतों पर, बिछौनों पर, चटाई पर, पत्थरों पर, काठ की चौकी पर और नाव में गुरु के साथ बैठ सकता है।

संस्कृत व्याख्या—ब्रह्मचारी, गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु—गावश्च अश्वाश्चेति उष्ट्राश्च तेषां यानं, प्रासादाश्च प्रस्तराश्च तेषु, बलीवर्द याने च अश्वयाने च उष्ट्रयाने च प्रासादस्य उपरि च विष्टरेषु च, कटेषु—तृणनिर्मितासनेषु, च, शिलाफलकनौषु—शिला च फलकं च नौश्च तेषु, शिलायां पर्यङ्कायां तरण्यां, च, गुरुणा—स्वाचार्येण, सार्धं—सह, आसीत—उपविशेत्।

गुरु के समान सम्मान्य जन—

गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत् ।
न चानिसृष्टो गुरुणा स्वान्गुरूनभिवादयेत् ॥२०५॥

अन्वय—(ब्रह्मचारी) गुरोः गुरौ सन्निहिते गुरुवद् वृत्तिम् आचरेत् । गुरुणा अनिसृष्टः च स्वान् गुरून् न अभिवादयेत् ।

शब्दार्थ—सन्निहिते—समीप होने पर, अनिसृष्टः—आज्ञा के बिना ।

हिन्दी अर्थ—ब्रह्मचारी गुरु के गुरु के समुपस्थित होने पर उनके साथ गुरु के समान (सम्मानपूर्ण) आचरण करे, गुरु के निर्देश के बिना अपने गुरुजनों (माता पिता आदि) को अभिवादन न करे ।

संस्कृत व्याख्या—ब्रह्मचारी, गुरोः—स्वाचार्यस्य, गुरौ—आचार्ये, सन्निहिते—समुपस्थिते, गुरुवत्—आचार्यतुल्यं, वृत्तिं—सम्मानपूर्णव्यवहारं, आचरेत्—कुर्यात्, गुरुणा—आचार्येण, अनिसृष्टः—अनिर्दिष्टः, च, स्वान्—निजान्, गुरून्—मातृपितृपितृव्यादीन्, न, अभिवादयेत्—प्रणमेत् ।

गुरु के समान सम्मान्य जन—

विद्यागुरुष्वेतदेव नित्या वृत्तिः स्वयोनिषु ।
प्रतिषेधत्सु चाधर्माद्धितं चोपदिशत्स्वपि ॥२०६॥

अन्वय—(ब्रह्मचारी) विद्यागुरुषु, स्वयोनिषु, अधर्मात् च प्रतिषेधत्सु, हितं च उपदिशत्सु अपि एतत् एव नित्या वृत्तिः (वर्तितव्या) ।

शब्दार्थ—स्वयोनिषु—स्वबन्धुओं में, प्रतिषेधत्सु—निषेध करने वालों में, उपदिशत्सु—उपदेश देने वालों में ।

हिन्दी अर्थ—ब्रह्मचारी विद्या दान देने वाले उपाध्यायादि गुरुओं के प्रति, चाचा, मामा आदि स्वकुल बन्धुओं के प्रति, अधर्म का निषेध करने वालों के प्रति तथा कल्याण का उपदेश करने वालों के प्रति भी ऐसा ही (गुरुवत्) व्यवहार सर्वदा करे ।

संस्कृत व्याख्या—ब्रह्मचारी, विद्यागुरुषु—विद्यायाः गुरवः तेषु, शिक्षादातृषु उपाध्यायेषु, स्वयोनिषु—पितृव्यादिषु स्ववंशीयेषु, अधर्मान्—पापकृत्याचारान्, च, प्रतिषेधत्सु—निवारकेषु, हितं—कल्याणकरं, उपदिशत्सु—उपदेशकेषु, अपि, एतत् एव—पूर्वोक्तेव आचार्यवत्, नित्यावृत्तिः—शाश्वद्व्यवहारः, वर्तितव्या ।

विशेष—'आकेशग्रहणान्मित्रमकार्येभ्यो निवर्तयेद'—मित्र को केश से पकड़ कर बुरे कार्यों से हटाना चाहिए ।

गुरु के समान सम्मान्यजन—

श्रेयस्सु गुरुवद्वृत्तिं नित्यमेव समाचरेत् ।
गुरुपुत्रेषु चार्येषु गुरोश्चैव स्वबन्धुषु ॥२०७॥

अन्वय—(ब्रह्मचारी) श्रेयःसु, आर्येषु गुरुपुत्रेषु च, गुरोः स्वबन्धुषु एव च गुरुवत् नित्यम् एव वृत्तिम् समाचरेत् ।

शब्दार्थ—श्रेयःसु—उत्कृष्ट जनों में, आर्येषु गुरुपुत्रेषु—सजातीयगुरुपुत्रों में ।

हिन्दी अर्थ—ब्रह्मचारी श्रेष्ठजनों में, शिष्टगुरुपुत्रों में और गुरु के आत्मीय जनों में गुरु के समान ही सदा व्यवहार करे ।

संस्कृत व्याख्या—ब्रह्मचारी, श्रेयःसु—विद्यातपःसमृद्धेषु, आर्येषु—इति गुरुपुत्रविशेषणं, समानजातिषु; गुरुपुत्रेषु—गुरोः पुत्राः तेषु, आचार्यापत्येषु, गुरोः—आचार्यस्य, स्वबन्धुषु—निजपरिवारजनेषु, च, गुरुवत्—आचार्यसदृशं, नित्यं वृत्ति—शाश्वद्व्यवहारं, समाचरेत्—कुर्यात् ।

विशेष—आर्येषु गुरुपुत्रेषु—भाष्यकार ब्यूहलर के अनुसार आचार्य की सवर्णा पत्नी अर्थात् ब्राह्मणी मात्र से उत्पन्न पुत्र—'towards sons of his teacher, born by wives of equal caste'. यहाँ गुरुपुत्र शिष्य से अधिक आयु वाला अपेक्षित है ।

गुरु के समान सम्मान्य जन—

बालः समानजन्मा वा शिष्यो वा यज्ञकर्मणि ।
अध्यापयन्गुरुसुतो गुरुवन्मानमर्हति ॥२०८॥

अन्वय—बालः समानजन्मा वा, शिष्यः गुरुसुतः अध्यापयन् वा यज्ञकर्मणि गुरुवत् मानम् अर्हति ।

शब्दार्थ—समानजन्मा—समवयस्क, अध्यापयन्—शिक्षण कार्य करता हुआ ।

हिन्दी अर्थ—"गुरुपुत्र अल्पवयस्क हो अथवा समवयस्क, शिष्य हो अथवा अध्यापन करता हो अथवा यज्ञकर्म में प्रवृत्त हो, गुरु के समान सम्मान के योग्य है ।

संस्कृत व्याख्या—बालः—अल्पायुः, समानजन्मा—समानं जन्म यस्य सः, समवयस्कः, वा, शिष्यः—स्वछात्रः, वा, गुरुसुतः—गुरोः सुतः, गुरुपुत्रः, अध्यापयन्—शिक्षयन्, यज्ञकर्मणि—यागानुष्ठाने, ऋत्विग् अनृत्विग् वा, गुरुवत्—आचार्यसमं, मानं—आदरं, अर्हति—योग्यः अस्ति ।

विशेष—गुरु की अनुपस्थिति में अध्यापन कार्य करने वाला गुरुपुत्र सम्मान का अधिकारी है।

गुरुपुत्र शुश्रूषा का निषेध—

उत्सादनं च गात्राणां स्नापनोच्छिष्टभोजने।
न कुर्याद्गुरुपुत्रस्य पादयोश्चावनेजनम् ॥२०९॥

अन्वय—(ब्रह्मचारी) गुरुपुत्रस्य गात्राणां उत्सादनम् स्नापनोच्छिष्टभोजने च पादयोः अवनेजनं च न कुर्यात्।

शब्दार्थ—गात्राणां—शारीरिक अंगों का, उत्सादनं—उबटन मलना, स्नापन—स्नान, अवनेजनं—धोना।

हिन्दी अर्थ—ब्रह्मचारी, गुरुपुत्र के अंगों में तैल उबटन आदि मर्दन, स्नान कराना, उच्छिष्ट भोजन एवं पादप्रक्षालन—इन कर्मों को न करे।

संस्कृत व्याख्या—ब्रह्मचारी, गुरुपुत्रस्य—गुरोः पुत्रः तस्य, गुरोरात्मजस्य; गात्राणां—शरीराङ्गानां, उत्सादनं—तैलोद्वर्तनादिमर्दनं, स्नापनोच्छिष्टभोजने—स्नापनं च उच्छिष्टं भोजनं च, ते, जलस्नानोच्छिष्टभक्षणे; च; पादयोः—चरणयोः, अवनेजनं—प्रक्षालनं, च, न, कुर्यात्—सम्पादयेत्।

विशेष—गुरुपुत्र के साथ गुरु के समान व्यवहार ही करना चाहिए किन्तु गुरुपुत्र के पैर छूना तथा उच्छिष्ट भोजन नहीं करना चाहिए।

—विष्णुधर्मसूत्र, २८-३१

गुरु-पत्नियों के साथ व्यवहार—

गुरुवत्प्रतिपूज्याः स्युः सवर्णा गुरुयोषितः।
असवर्णास्तु सम्पूज्याः प्रत्युत्थानाभिवादनैः ॥२१०॥

अन्वय—सवर्णाः गुरुयोषितः गुरुवत् प्रतिपूज्याः स्युः, असवर्णास्तु प्रत्युत्थानाभिवादनैः सम्पूज्याः।

शब्दार्थ—योषितः—पत्नियाँ, प्रतिपूज्याः—अर्चनीय, प्रत्युत्थानं—आगे बढ़कर स्वागत करना।

हिन्दी अर्थ—गुरु की सवर्ण पत्नियाँ गुरु के समान पूज्य हैं और असवर्ण पत्नियाँ प्रत्युत्थान तथा प्रणाम मात्र से ही पूज्य हैं।

संस्कृत व्याख्या—सवर्णाः—समानः वर्णः यासां ताः, समानजातीयाः, गुरुयोषितः—गुरोः योषितः, गुरुपत्न्यः; गुरुवत्—आचार्य इव, प्रतिपूज्याः—आज्ञापालनादिना अर्चनीयाः, स्युः—भवेयुः, असवर्णाः—असमानजातीयाः, तु,

प्रत्युत्थाभिवादनैः—प्रत्युत्थानं च अभिवादनं कृतः, सत्कारभाजः; सम्पूज्याः—समादरणीयाः ।

विशेष—आपस्तम्ब धर्मसूत्र, १.२.७.२७—भी समान नियम प्रस्तुत करता है ।

गुरुपत्नी की शुश्रूषा का निषेध—

अभ्यञ्जनं स्नापनं च गात्रोत्सादनमेव च ।
गुरुपत्न्या न कार्याणि केशानां च प्रसाधनम् ॥२११॥

अन्वय—(ब्रह्मचारी) गुरुपत्न्याः अभ्यञ्जनं स्नापनं च गात्रोत्सादनम् एव च केशानां प्रसाधनं च न कार्याणि ।

शब्दार्थ—अभ्यञ्जनं—तैलमर्दन, प्रसाधनं—अलङ्करण ।

हिन्दी अर्थ—ब्रह्मचारी गुरुपत्नी के तैलमर्दन, स्नान कराना, अंगों में तैलादि मर्दन, अंगों में उबटन लगाना और केशों की सज्जा—इन कार्यों को न करे ।

संस्कृत व्याख्या—ब्रह्मचारी, गुरुपत्न्याः—गुरोः पत्नी तस्याः, गुरुपरिणीतायाः; अभ्यञ्जनं—तैलादिना लेपनं, स्नापनं—स्नानक्रियायां सहयोगप्रदानं, च, गात्रोत्सादनं—गात्राणाम् उत्सादनं, देहाङ्गोद्वर्तनं, एव च, केशानां—कुन्तलानां, प्रसाधनं—विन्यासं, च न, कार्याणि—करणीयानि ।

विशेष—शिष्य को गुरुपत्नी के स्नान आदि में सहायता एवं केशों में कंघी करना, फूल लगाना, शरीर में चन्दनानुलेपन इत्यादि कार्य नहीं करना चाहिए ।

—गौतम स्मृति, २.३१

गुरुपत्नी के चरण-स्पर्श का निषेध—

गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः ।
पूर्णविंशतिवर्षेण गुणदोषौ विजानता ॥२१२॥

अन्वय—गुणदोषौ विजानता पूर्णविंशतिवर्षेण (ब्रह्मचारिणा) युवतिः गुरुपत्नी तु इह पादयोः न अभिवाद्या ।

शब्दार्थ—विजानता—विशेष रूप से जानने वाले, पूर्णविंशतिवर्षेण—बीस वर्षीय वयस्क ।

हिन्दी अर्थ—(स्त्रियों के) गुणदोष का विशेष ज्ञाता बीसवर्षीय वयस्क ब्रह्मचारी गुरु की युवा पत्नी के चरण-स्पर्श कर अभिवादन न करे ।

संस्कृत व्याख्या—गुणदोषौ—गुणः च दोषः च तौ, स्त्रीषु धैर्यचाञ्चल्यौ, विजानता—विशिष्टज्ञानवता, पूर्णविंशतिवर्षेण—पूर्णाः विंशतिवर्षाः तेन, सम्पूर्णवयस्केन, ब्रह्मचारिणा; युवतिः—तरुणी, गुरुपत्नी—गुरुविवाहिता स्त्री, तु, इह—जगति, पादयोः—चरणयोः संस्पर्शेण, न, अभिवाद्या—वन्दनीया ।

विशेष—पूर्णवयस्कविंशति—यह काल यौवनागम का सूचक है। शिष्य को चाहिए कि गुरुपत्नी को केवल मस्तक झुका कर अभिवादन करे, उसके पाँव छूना और चरण संवाहन निषिद्ध है। —बौधायन धर्मसूत्र, १.२.३७

स्त्री का सम्मोहक स्वभाव—

स्वभाव एष नारीणां नराणामिह दूषणम् ।
अतोऽर्थान्न प्रमाद्यन्ति प्रमदासु विपश्चितः ॥२१३॥

अन्वय—इह नराणां दूषणं एषः नारीणां स्वभावः, अतः अर्थात् विपश्चितः प्रमदासु न प्रमाद्यन्ति ।

शब्दार्थ—अर्थात्—इसी कारण, विपश्चितः—मेधावी जन ।

हिन्दी अर्थ—इस संसार में (शृङ्गारादि चेष्टाओं के द्वारा आकृष्ट कर) पुरुषों को दूषित करना स्त्रियों का स्वभाव है अतः विद्वान् पुरुष (प्रकृष्ट मद वाली) स्त्रियों के विषय में असावधानी नहीं करते हैं।

संस्कृत व्याख्या—इह—अस्मिन् लोके, नराणां—पुरुषाणां, दूषणं—हावभाव-कटाक्षविभ्रमशृङ्गारचेष्टाभिः आकृष्य वशीकरणं, नारीणां—रमणीनां, एषः—निकृष्टः, स्वभावः—प्रकृतिः, अतः अर्थात्—अस्मात् कारणात्, विपश्चितः—पण्डिताः, प्रमदासु—प्रकृष्टयौवनमदमत्तासु कामिनीषु, न प्रमाद्यन्ति—अनवहिताः भवन्ति ।

विशेष—नारीणां स्वभावः—'दूषणम्' शब्द 'गुण' मात्र का बोधक है यथा—अग्नि का स्वभाव है दाहकता, यह दाहकता गुण केवल अग्नि की निन्दा नहीं है केवल उसका स्वभाव अर्थात् गुण है। इसी प्रकार मनुष्य को दूषित करना स्त्री का स्वभाव है कह कर नारी की निन्दा नहीं की गई है केवल शृङ्गार चेष्टाओं तथा सम्मोहक स्वभाव से संकेत किया गया है।

प्रमदासु—प्रकृष्टो मदो यस्याः । यः प्रमादे पातयतीति ।

स्त्री का सम्मोहक स्वभाव—

अविद्वांसमलं लोके विद्वांसमपि वा पुनः ।
प्रमदा ह्युत्पथं नेतुं कामक्रोधवशानुगम् ॥२१४॥

अन्वय—हि लोके प्रमदाः कामक्रोधवशानुगम् अविद्वांसं पुनः विद्वांसम् अपि वा उत्पथं नेतुम् अलम् ।

शब्दार्थ—अनुगं—पीछे जाने वाले को, अविद्वांसं—मूर्ख को, उत्पथं—अनुचित मार्ग ।

हिन्दी अर्थ—क्योंकि संसार में (देह के स्वभाव से) स्त्रियाँ काम तथा क्रोध के वशीभूत होकर उनका अनुकरण करने वाले अविद्वान् को अथवा विद्वान् को भी कुमार्ग पर ले जाने में समर्थ होती हैं।

संस्कृत व्याख्या—हि—यतः, प्रमदाः—प्रकृष्टयौवनमदयुक्ताः, स्त्रियः, कामक्रोधवशानुगं—कामः च क्रोधः च ताभ्यां वशमनुगच्छतीति कामक्रोधवशवर्तिनम् अनुगामिनं, अविद्वांसं—न विद्वांसं, वैदुष्यरहितं मूर्खपुरुषं, पुनः, विद्वांसं—विद्याबुद्धिसमन्वितं, अपि वा, उत्पथं—अपमार्गं, नेतुं—प्रापयितुं, अलं—समर्थाः ।

विशेष—'स्त्रीणामष्टगुणः कामः ।' —बृहत्पराशर, पृष्ठ १२१

स्त्रियों की काम शक्ति पुरुष की कामशक्ति की आठ गुनी होती है अतः वे विज्ञ अथवा अविज्ञ पुरुष को सरलता से पथभ्रष्ट करती हैं ।

—महाभारत, अनुशासन पर्व, ३८.६

माता आदि के साथ एकान्तवास का निषेध—

माता स्वस्रा दुहित्रा वा न विविक्तासनो भवेत् ।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥२१५॥

अन्वय—(पुरुषः) मात्रा स्वस्रा दुहित्रा वा विविक्तासनः न भवेत्, बलवान् इन्द्रियग्रामः विद्वांसम् अपि कर्षति ।

शब्दार्थ—दुहित्रा—पुत्री, विविक्तासनः—एकान्त में आसन वाला, कर्षति—खींच लेता है ।

हिन्दी अर्थ—पुरुष माँ, बहिन तथा पुत्री के साथ एकान्त में एक आसन पर न बैठे क्योंकि सबल इन्द्रिय समूह विद्वान् पुरुष को भी वश में कर लेता है ।

संस्कृत व्याख्या—पुरुषः, मात्रा—जनन्या, स्वस्रा—भगिन्या, दुहित्रा—कन्यया, वा, विविक्तासनः—विविक्ते आसनः, जनशून्यस्थाने एकासनस्थः, न, भवेत्—उपविशेत्, बलवान्—सबलः, इन्द्रियग्रामः—इन्द्रियाणां ग्रामः, इन्द्रियसमूहः; विद्वांसं—शास्त्रज्ञातारं, अपि, कर्षति—स्वाधीनं करोति ।

विशेष—वस्तुतः मनु का उद्देश्य पुरुष मन की दुर्बलता प्रदर्शन है । वराहमिहिर ने पुरुषों की भर्त्सना करते हुए कहा है कि सच बताओ, स्त्रियों में कौन से दोष हैं जो तुम लोगों में नहीं पाये जाते ? पुरुष व्यर्थ ही स्त्रियों की धृष्टतापूर्वक निन्दा करते हैं, वे तो अधिक गुण सम्पन्न होती हैं ।

'प्रब्रूत सत्यं कतरोऽङ्गनानां दोषस्तु यो नाचरितो मनुष्यैः ।
धार्ष्ट्येन पुंभिः प्रमदा निरस्ता गुणाधिकास्ता ॥'

—बृहत्संहिता, ७४.६

गुरुपत्नियों के प्रति प्रणाम विधि—

कामं तु गुरुपत्नीनां युवतीनां युवा भुवि ।
विधिवद्वन्दनं कुर्यादसावहमिति ब्रुवन् ॥२१६॥

अन्वय—युवा (ब्रह्मचारी) युवतीनां गुरुपत्नीनां तु विधिवत् 'असौ अहम्' इति ब्रुवन् कामं भुवि वन्दनं कुर्यात् ।

शब्दार्थ—ब्रुवन्—कहते हुए, भुवि वन्दनं—पृथ्वी पर झुक कर प्रणाम ।

हिन्दी अर्थ—युवा (ब्रह्मचारी) युवती गुरुपत्नी को शास्त्र की विधि अनुसार 'अमुक नाम वाला मैं अभिवादन करता हूँ', इस प्रकार कहते हुए यथेष्ट मात्रा में पृथ्वी पर झुक कर (चरण-स्पर्श न करते हुए) प्रणाम करे ।

संस्कृत व्याख्या—युवा—तरुणशिष्यः, युवतीनां—तरुणीनां, गुरुपत्नीनां—गुरोः पत्न्यः तासां, गुरुपरिणीताङ्गनानां; तु, विधिवत्—यथा शास्त्रं, असौ अहम्—'अभिवादयेऽमुकनामाहं भोः !' इति, ब्रुवन्—उच्चारयन्, कामं—यथेष्टं, भुवि—पृथिव्यां, वन्दनं—प्रणामं, न तु चरणस्पर्शं, कुर्यात्—समाचरेत् ।

विशेष—विधिवत्—व्यत्यस्तपाणिना—मनुस्मृति, २.१७२—बाएँ हाथ से बायाँ चरण, दाहिने हाथ से दाहिना चरण-स्पर्श करे ।

गुरुपत्नियों के प्रति प्रणाम विधि—

विप्रोष्य पादग्रहणमन्वहं चाभिवादनम् ।
गुरुदारेषु कुर्वीत सतां धर्ममनुस्मरन् ॥२१७॥

अन्वय—(ब्रह्मचारी) सतां धर्मम् अनुस्मरन् विप्रोष्य गुरुदारेषु पादग्रहणं अन्वहं च अभिवादनं कुर्वीत ।

शब्दार्थ—अनुस्मरन्—स्मरण रखता हुआ, विप्रोष्य—प्रवास से लौटने पर, अन्वहं—प्रतिदिन ।

हिन्दी अर्थ—(ब्रह्मचारी) सत्पुरुषों के आचरण को स्मरण करता हुआ, प्रवास से लौटकर गुरुपत्नियों के चरण-स्पर्श करे, प्रतिदिन केवल प्रणाम करे ।

संस्कृत व्याख्या—ब्रह्मचारी, सतां—साधुपुरुषाणां, धर्मं—आचारं, अनुस्मरन्—संस्मरन्, विप्रोष्य—प्रवासादागत्य, गुरुदारेषु—गुरूणां दाराः तेषु, पादग्रहणं—पादयोः ग्रहणं, चरणस्पर्शं, अन्वहं—प्रतिदिनं, च, अभिवादनं—भूमौ प्रणमनं, कुर्वीत—आचरेत् ।

गुरु सेवा से लाभ—

यथा खनन्खनित्रेण नरो वार्यधिगच्छति ।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति ॥२१८॥

अन्वय—यथा नरः खनित्रेण खनन् वारि अधिगच्छति तथा शुश्रूषुः गुरुगतां विद्याम् अधिगच्छति ।

शब्दार्थ—खनित्रेण—कुदाल से, खनन्—खोदता हुआ, गुरुगतां—गुरु में निहित।

हिन्दी अर्थ—जिस प्रकार मानव कुदाल से पृथ्वी को खोदता हुआ (परिश्रमपूर्वक) जल को प्राप्त कर लेता है उसी प्रकार गुरु सेवा में संलग्न शिष्य गुरु में निहित ज्ञान को प्राप्त कर लेता है।

संस्कृत व्याख्या—यथा—येन प्रकारेण, नरः—श्रमशीलपुरुषः, खनित्रेण—खननोपकरणेन, खनन्—भूमिं विदारयन्, वारि—जलं, अधिगच्छति—प्राप्नोति, तथा, शुश्रूषुः—गुरुसेवापरः, गुरुगतां—गुरुं गताः वा गुरौ स्थितां, विद्यां—शास्त्रज्ञानं, अधिगच्छति—प्राप्नोति।

विशेष—ज्ञानदान की प्रक्रिया में गुरु और शिष्य दोनों का परस्पर सौमनस्य अनिवार्य है अन्यथा लक्ष्य मृगतृष्णा बन जाएगा। कहा गया है—

'आचार्यः पूर्वरूपम् अन्तेवास्युत्तररूपम्।
विद्या सन्धिः प्रवचनं सन्धानम्।'

—तैत्तिरीयारण्यक, १.३.३

ग्रामवास निषेध का काल निर्णय—

मुण्डो वा जटिलो वा स्यादथवा स्याच्छिखाजटः।
नैनं ग्रामेऽभिनिम्लोचेत्सूर्यो नाभ्युदियात्क्वचित् ॥२१९॥

अन्वय—मुण्डः वा जटिलः वा स्यात् अथवा शिखाजटः वा स्यात्, एनं सूर्यः ग्रामे न अभिनिम्लोचेत् क्वचित् न अभ्युदियात्।

शब्दार्थ—मुण्डः—मुण्डित शिर वाला, जटिलः—जटाधारी, शिखाजटः—मात्र शिखा रूप जटा वाला।

हिन्दी अर्थ—ब्रह्मचारी मुण्डितमस्तक हो अथवा जटाधारी हो अथवा केवल शिखामात्र जटा वाला हो, उसे ग्राम में सूर्योदय और सूर्यास्त कभी नहीं होने चाहिए अर्थात् सूर्योदय के पूर्व और सूर्यास्त के पश्चात् ग्राम (अथवा नगर) में न रुके।

संस्कृत व्याख्या—मुण्डः—कृतक्षौरकर्मः, वा, जटिलः—केशैः जटावान्, वा, स्यात्—भवेत्, अथवा, शिखाजटः—शिखा एव जटा यस्य सः, शिखामात्रजटायुक्तः, वा, स्यात्, एनं—ब्रह्मचारिणं, सूर्यः—रविः, ग्रामे—जनाकीर्णस्थाने, न, अभिनिम्लोचेत्—अस्तं प्राप्नुयात्, क्वचित्—कुत्रचित्, न, अभ्युदियात्—उदयं प्राप्नुयात्, सूर्योदयात् प्राक् सूर्यास्तस्यानन्तरं च ग्रामे न तिष्ठेत् इति तात्पर्यम्।

विशेष—ब्रह्मचारी उपर्युक्त तीनों प्रकार के केशविन्यासों में से कोई भी चुनने के लिए स्वतन्त्र था।

नियम भङ्ग का प्रायश्चित्त—

तं चेदभ्युदियात्सूर्यः शयानं कामचारतः।
निम्लोचेद्वाप्यविज्ञानाज्जपन्नुपवसेद्दिनम् ॥२२०॥

अन्वय—कामचारतः शयानं तं सूर्यः अभ्युदियात् अपि वा अविज्ञानात् (सूर्यः) निम्लोचेत् चेत् जपन् तद् दिनम् उपवसेत्।

शब्दार्थ—कामचारतः—स्वेच्छा से, अभ्युदियात—सूर्य उदय हो जाए, निम्लोचेत्—अस्त हो जाए।

हिन्दी अर्थ—ब्रह्मचारी के जानबूझ कर सोते रहने पर उसे सूर्योदय हो जाए अथवा अज्ञानतावश (सोते रहने पर) सूर्यास्त हो जाए तो जप करते हुए उस दिन उपवास करे अर्थात् रात्रि में भोजन करे।

संस्कृत व्याख्या—कामचारतः—स्वेच्छया न तु रोगेण, शयानं—निद्राणं, तं—ब्रह्मचारिणं, सूर्यः—दिनकरः, अभ्युदियात्—उदयं प्राप्नुयात्, अपि वा, अविज्ञानात्—निद्रावशात्, सूर्यः, निम्लोचेत्—अस्तम् इयात्, चेत—तर्हि, जपन्—प्रायश्चित्तरूपे गायत्रीमन्त्रावृत्तिं कुर्वन्, तद् दिनम्—तस्मिन् दिने, उपवसेत्—आहारलङ्घनं कुर्यात्। रात्रावेव भुञ्जीत इति।

विशेष—ब्रह्मचारी यदि सूर्योदय के बाद जागता है तो उसे दिन भर जप एवं उपवास करना चाहिए तथा रात्रि में भोजन करना चाहिए। किन्तु यदि वह सूर्यास्त के बाद जागता है तो उसे रात्रि में जप एवं उपवास करना चाहिए तथा प्रातः में भोजन करना चाहिए—'सूर्याभ्युदितो ब्रह्मचारी तिष्ठेदहरभुञ्जानोऽभ्यस्तमितश्च रात्रिं जपन्सावित्रीम्।' —गौतम धर्मसूत्र, २३.२१

प्रायश्चित्त के अभाव में दोष—

सूर्येण ह्यभिनिम्लुक्तः शयानोऽभ्युदितश्च यः।
प्रायश्चित्तमकुर्वाणो युक्तः स्यान्महतैनसा ॥२२१॥

अन्वय—हि यः शयानः सूर्येण अभिनिर्मुक्तः अभ्युदितः च (सः) प्रायश्चित्तम् अकुर्वाणः महता एनसा युक्तः स्यात्।

शब्दार्थ—अभिनिर्मुक्तः—छोड़ा गया, महता—बहुत बड़े, एनसा—पाप से।

हिन्दी अर्थ—जिस ब्रह्मचारी के सोते रहने पर सूर्यास्त हो जाए अथवा सूर्योदय हो जाए वह यदि प्रायश्चित्त का अनुष्ठान नहीं करता तो बहुत बड़े पापकर्म से युक्त होता है।

संस्कृत व्याख्या—हि—यतः, यः—ब्रह्मचारी, शयानः—निद्राणः, सूर्येण—दिनकरेण, अभिनिर्मुक्तः अभिनिम्लुक्तः, अभ्युदितश्च—उदयं प्राप्तः, सः—शिष्यः,

प्रायश्चित्तं—प्रायस्य पापस्य चित्तं विशोधनं यस्मात्, पापापनोदं; अकुर्वाणः अविदधत्, महता—गुरुणा, एनसा—पापेन, युक्तः स्यात्—संयुज्येत् ।

सन्ध्योपासना का विधिपूर्वक अनुष्ठान—

आचम्य प्रयतो नित्यमुभे सन्ध्ये समाहितः ।
शुचौ देशे जपञ्जप्यमुपासीत यथाविधिः ॥२२२॥

अन्वय—(ब्रह्मचारी) आचम्य प्रयतः नित्यं समाहितः शुचौ देशे जप्यं जपन् उभे सन्ध्ये यथाविधि उपासीत ।

शब्दार्थ—शुचौ देशे—पवित्र स्थान पर, जप्यं—जपनीय मंत्र को ।

हिन्दी अर्थ—ब्रह्मचारी जल से आचमन कर नियमपूर्वक प्रतिदिन एकाग्र-चित्त से पवित्र स्थान में (प्रणवसहित सावित्री) मन्त्र को जपता हुआ दोनों सन्ध्याकालों में शास्त्रादेशानुसार उपासना करे ।

संस्कृत व्याख्या—आचम्य—जलेन उपस्पृश्य, प्रयतः—नियम-पालने संलग्नः, नित्यं—प्रत्यहं, समाहितः—दत्तावधानाः, शुचौ—पवित्रे, देशे—स्थाने, जप्यं—सप्रणवगायत्रीमन्त्रं, जपन्—अभ्यसन्, उभे—सन्ध्ये, सायम्प्रातस्सन्ध्यवेले, यथाविधि—शास्त्रनिर्दिष्टविधिना, उपासीत—पूजां कुर्यात् ।

श्रेष्ठ आचरण अनुकरणीय—

यदि स्त्री यद्यवरजः श्रेयः किञ्चित्समाचरेत् ।
तत्सर्वमाचरेद्युक्तो यत्र चास्य रमेन्मनः ॥२२३॥

अन्वय—यदि स्त्री यदि अवरजः किञ्चित् श्रेयः समाचरेत्, यत्र च अस्य मनः रमेत्, तत् सर्वं युक्तः आचरेत् ।

शब्दार्थ—अवरजः—शूद्र, युक्तः—दत्तचित्त हो कर ।

हिन्दी अर्थ—यदि (आचार्याणी) स्त्री अथवा (आचार्य भृत्य) शूद्रादि किसी कल्याण कार्य को करते हों तो उसे अथवा (शास्त्रनिर्दिष्ट कर्मों में) जो उसे रुचिकर प्रतीत हो वह सब सावधान हो कर करे ।

संस्कृत व्याख्या—यदि—चेत्, स्त्री—आचार्याणी, अवरजः—आचार्य-शूद्रानुचरः, वा, किञ्चित्—किमपि, श्रेयः—कल्याणप्रदं, समाचरेत्—व्यवहरेत्, यत्र—यस्मिन् शास्त्रोक्त कार्ये, वा, अस्य माणवकस्य, मनः—चित्तं, रमेत्—प्रसादमनुभवेत्, तत्, सर्वं—निखिलं, युक्तः—अवहितः, आचरेत्—अनुतिष्ठेत् ।

विशेष—'गुणाः पूजास्थानं' गुण पूज्य होते हैं अतः प्राणी स्त्री हो अथवा शूद्र, यदि श्रेष्ठ कार्य करता है तो उसका अनुकरण उचित है ।

धर्म-अर्थ-काम का स्वरूप—

धर्मार्थावुच्यते श्रेयः कामार्थौ धर्म एव च ।
अर्थ एवेह वा श्रेयस्त्रिवर्ग इति तु स्थितिः ॥२२४॥

अन्वय—इह धर्मार्थौ श्रेयः उच्यते, कामार्थौ (श्रेयः उच्यते), धर्म एव च (श्रेयः उच्यते), अर्थ एव वा श्रेयः (उच्यते), त्रिवर्गः श्रेयः इति तु स्थितिः ।

शब्दार्थ—त्रिवर्गः—धर्म, अर्थ और काम पुरुषार्थ, स्थिति—सिद्धान्त ।

हिन्दी अर्थ—इस संसार में कोई आचार्य धर्म और अर्थ को, कोई काम और अर्थ को, कोई धर्म को और कोई अर्थ को ही श्रेयस्कर मानते हैं किन्तु सम्पूर्ण त्रिवर्ग—धर्म—अर्थ—काम श्रेयस्कर है, यह (हमारे मत में) निश्चित तथ्य है ।

संस्कृत व्याख्या—इह—जगति, केचिदाचार्यः, धर्मार्थौ—धर्मश्च अर्थश्च धर्मार्थौ, कामसाधनत्वात्, श्रेयः—हितकरः, उच्यते—मन्यते, कैश्चिद् आचार्यैः, कामार्थौ—कामश्च अर्थश्च कामार्थौ, सुखसाधनत्वात् श्रेयस्त्वेन कथ्यते, अपरैः, धर्म एव च, कामार्थसाधनत्वात् सौख्यकरत्वेन प्रस्तूयते, अन्यैः, अर्थ एव वा, धर्मकामयोः साधनत्वात् शुभंकरत्वेन उच्यते, मनुमते तु, त्रिवर्गः—धर्मार्थकामाः, पुरुषार्थसाधनत्वात् परस्परसहायकाः भूत्वा, श्रेयः—कल्याणकरः अस्ति, इति तु वास्तविकी, स्थितिः—सिद्धान्तः ।

विशेष—त्रिवर्ग—धर्म-अर्थ-काम परस्पर एक-दूसरे के पूरक हैं । धर्म से अर्थ, अर्थ से काम और काम से पुनः धर्म के फल का उदय होता है, शास्त्रों में बुद्धिमान् पुरुषों ने यही निर्णय किया है—

'धर्मादर्थोऽर्थतः कामः कामाद्धर्मफलोदयः ।
इत्येवं निर्णयं शास्त्रे प्रवदन्ति विपश्चितः ॥' —पद्मपुराण

ज्येष्ठ वर्ग सदा अभिनन्दनीय—

आचार्यश्च पिता चैव माता भ्राता च पूर्वजः ।
नार्तेनाप्यवमन्तव्या ब्राह्मणेन विशेषतः ॥२२५॥

अन्वय—आर्त्तेन अपि आचार्यः पिता च एव माता (च) पूर्वजः भ्राता च न अवमन्तव्याः, ब्राह्मणेन तु विशेषतः न (अवमन्तव्याः) ।

शब्दार्थ—आर्त्तेन—दुःखी ब्रह्मचारी के द्वारा, अवमन्तव्याः—अपमानित किए जाने चाहिए ।

हिन्दी अर्थ—(गुरु ताडन से) दुःखी होकर भी आचार्य, पिता, माता एवं अग्रज सहोदर भ्राता का अपमान अथवा अवहेलना नहीं करना चाहिए, विशेष रूप से ब्राह्मण तो कदापि न करे ।

संस्कृत व्याख्या—आर्तेन—दुःखापनेन्न शिक्षेण, अपि, आचार्यः—गुरुः, पिता—जनकः, माता—जन्मदात्री, च, पूर्वजः—पूर्वं जातः, अग्रजः, भ्राता—सहोदरः, च न, अवमन्तव्याः—अवमाननीयाः, ब्राह्मणेन—उत्कृष्टवर्णेन, तु, विशेषतः—विशेषरूपेण, न अवमन्तव्याः।

विशेष—आर्तेन—आचार्य आदि के द्वारा दिए गए दण्ड आदि से पीडानुभव के पश्चात् भी, प्रतिकार की भावना न रखे। यान्यस्माकं सुचरितानि, तानि त्वयोपास्यानि, नो इतराणि'

—तैत्तिरीय उपनिषद्, १.११.२।

ब्राह्मण अपने आचरण से संसार में जो प्रतिमान स्थापित करता है, संसार उसका अनुकरण करता है अतः उससे सदैव श्रेष्ठता की अपेक्षा की जाती है।

यान्यनवद्यानि कर्माणि, तानि सेवितव्यानि, नो इतराणि।
यान्यस्माकं सुचरितानि, तानि त्वयोपास्यानि, नो इतराणि।।

—तैत्तिरीय उपनिषद्, १.११.२

आचार्यादि का देवत्व—

आचार्यो ब्रह्मणोमूर्तिः, पिता मूर्तिः प्रजापतेः।
माता पृथिव्या मूर्तिस्तु, भ्राता स्वो मूर्तिरात्मनः।।२२६।।

अन्वय—आचार्यः ब्रह्मणः मूर्तिः, पिता प्रजापतेः मूर्तिः, माता तु पृथिव्याः मूर्तिः, स्वः भ्राता आत्मनः मूर्तिः।

शब्दार्थ—ब्रह्मणः—परमात्मा की, प्रजापति—ब्रह्मा की, आत्मनः—आत्मा की।

हिन्दी अर्थ—आचार्य परमात्मा की, पिता ब्रह्मा की, माता पृथिवी की तथा भाई आत्मा की मूर्ति है।

संस्कृत व्याख्या—आचार्यः—शिक्षकः, मोक्षोपदेशात् ब्रह्मणः—परमात्मनः, मूर्तिः—प्रतिमा, पिता—जन्मदः, रक्षणात् प्रजापतेः—विधातुः, मूर्तिः—प्रतिरूपः, माता—जन्मदात्री, तु, धारणात् पृथिव्याः—धरित्र्याः, मूर्तिः—आकृतिः, स्वः भ्राता—निज सहोदरः, स्नेहात् आत्मनः—स्वकीयस्य, मूर्तिः—शरीरमस्ति।

विशेष—जो अन्तःकरण को भावित करता है, जो जन्म देती है, जिसके द्वारा विद्या का उपदेश दिया जाता है और ज्येष्ठ भ्राता—ये सम्मान्य की श्रेणी में गण्य हैं—'यो भावयति या सूते येन विद्योपदिश्यते। ज्येष्ठोभ्राता.......एते गुरवः स्मृताः।'

—स्मृतिचन्द्रिका, पृष्ठ ३५

माता-पिता के अपार ऋण से निवृत्ति असम्भव—

यं मातापितरौ क्लेशं सहेते सम्भवे नृणाम्।
न तस्य निष्कृतिः शक्याः कर्तुं वर्षशतैरपि।।२२७।।

अन्वय—मातापितरौ नृणां सम्भवे यं क्लेशं सहेते तस्य वर्ष—शतैः अपि निष्कृतिः कर्तुं न शक्या ।

शब्दार्थ—सम्भवे—उत्पत्ति में, निष्कृतिः—प्रतिकार ।

हिन्दी अर्थ—माता-पिता मनुष्यों के जन्म में जो कष्ट सहते हैं, सैकड़ों वर्षों में भी उसका प्रतिकार असम्भव है ।

संस्कृत व्याख्या—माता च पिता च, जननीजनकौ, नृणां—अपत्यानां, सम्भवे—उत्पत्तौ, यं, क्लेशं—सहेते—अनुभूयेते, तस्य—क्लेशस्य, वर्षशतैरपि—वर्षाणां शतानि, तैः, निष्कृतिः—बहुजन्मभिः, कर्तुं—विधातुं, न, शक्या—समर्था ।

विशेष—क्लेशम्—माता भ्रूण शिशु के गर्भधारण एवं प्रसववेदना कष्ट को तथा पिता बालक के संरक्षण, संवर्धन तथा शिक्षण आदि दायित्वों के दुःख को सहर्ष सहन करते हैं । पुत्र पिता के ब्रह्म अध्ययन, यज्ञ (शुभ कर्म) लोक—यशः रूप में स्थापित, उसके अकृत को पूर्ण कर दायित्वों से मुक्ति दिला देता है, इसीलिए उसे पुत्र कहते हैं—'अथातः सम्प्रतिर्यदा प्रैष्यन् मन्यतेऽथ पुत्रमाह त्वं ब्रह्म त्वं यज्ञस्त्वं लोक.......। स यद्यनेन किञ्चिदक्ष्णयाऽकृतं भवति तस्मादेनं सर्वस्मात्पुत्रो मुञ्चति ।

—बृहदारण्यक उपनिषद्, १.५.१७

आचार्यादि की सन्तुष्टि आवश्यक—

तयोर्नित्यं प्रियं कुर्यादाचार्यस्य च सर्वदा ।
तेष्वेव त्रिषु तुष्टेषु तपः सर्वं समाप्यते ॥२२८॥

अन्वय—तयोः नित्यम् आचार्यस्य च सर्वदा प्रियं कुर्यात्, तेषु एव त्रिषु तुष्टेषु सर्वं तपः समाप्यते ।

शब्दार्थ—तुष्टेषु—सन्तुष्ट होने पर, समाप्यते—प्राप्त होते हैं का सर्वदा प्रिय कार्य करे, उन तीनों की सन्तुष्टि में ही समग्र तप समाहित होते हैं ।

संस्कृत व्याख्या—तयोः—जननीजनकयोः, नित्यं—अविरतं, आचार्यस्य—गुरोः, च, सर्वदा—आजीवनं, प्रियं—रुचिकरं, कुर्यात्—सम्पादयेत्, तेषु—पूर्वोक्तेषु, एव, त्रिषु—जननीजनकाचार्येषु, तुष्टेषु—प्रसादेषु, सर्वं—सकलं, तपः—पुण्यकर्म—समाप्यते—परिपूर्यते ।

विशेष—समाप्यते—दो प्रकार के अर्थ सम्भव हैं—सम् आप्यते—'सम्यग् आप्यते' अथवा—'समाप्तिं गच्छति—तपसः चरमसीमा तेष्वेव अस्ति' ।

आचार्यादि की अनुज्ञा अनिवार्य---

तेषां त्रयाणां शुश्रूषा परमं तप उच्यते ।
न तैरभ्यननुज्ञातो धर्ममन्यं समाचरेत् ॥२२९॥

अन्वय---तेषां त्रयाणां शुश्रूषा परमं तपः उच्यते, तैः अभ्यननुज्ञातः अन्यं धर्मं न समाचरेत् ।

शब्दार्थ---परमं---सर्वश्रेष्ठ, अभ्यननुज्ञातः---अनुज्ञा के बिना ।

हिन्दी अर्थ---उन तीनों की सेवा सर्वोत्कृष्ट तप कही गई है ? उनकी अनुमति के बिना दूसरे धर्म का आचरण न करे ।

संस्कृत व्याख्या---तेषां---पूर्वोक्तानां, त्रयाणां---जननीजनकाचार्याणां, शुश्रूषा ---परिचर्या, परमं---श्रेष्ठं, तपः---तपस्या, उच्यते---स्वीक्रियते, तैः---एतत्त्रयैः, अभ्यननुज्ञातः---अनाज्ञप्तः, अन्यं धर्मं---तीर्थव्रतोपवासादिकं, न, समाचरेत्---अनुतिष्ठेत् ।

विशेष---अभ्यननुज्ञात---शास्त्र निर्दिष्ट स्वधर्म के पालन में माता-पिता एवं आचार्य की अनुमति की आवश्यकता नहीं है क्योंकि स्वधर्म का अनुष्ठान प्रत्येक परिस्थिति में श्रेयस्कर है किन्तु पर धर्म का स्वीकार उचित नहीं है---

'श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः' ॥

---श्रीमद्भगवद्गीता ३.३५

आचार्यादि की त्रयः स्वरूपता---

त एव हि त्रयो लोकास्त एव त्रय आश्रमाः ।
त एव हि त्रयो वेदास्त एवोक्तास्त्रयोऽग्नयः ॥२३०॥

अन्वय---हि ते एव त्रयः लोकाः, ते स्व त्रयः आश्रमाः, हि ते एव त्रयः वेदाः, ते एव त्रयः अग्नयः उक्ताः ।

शब्दार्थ---त्रयः---तीन, लोकाः---संसार ।

हिन्दी अर्थ---क्योंकि वे ही तीन लोक हैं, वे ही तीन आश्रम हैं, वे ही तीन वेद हैं, वे ही तीन अग्नियाँ कहे गए हैं ।

संस्कृत व्याख्या---हि यतः, फलप्रदायकत्वात्---ते मातापिताचार्यः एव, त्रयः लोकाः---भूर्भुवः स्वर्लोकाः, ते एव त्रयः आश्रमाः---ब्रह्मचर्यगृहस्थवानप्रस्थाश्रमाः, हिते एव त्रयः वेदाः---ऋग्यजुःसामवेदाः ते एव त्रयः अग्नयः---गार्हपत्याहवनीयदक्षिणाग्नयः, उक्ताः---कथिताः

विशेष—माता-पिता-आचार्य की सेवा से भूः भुव, स्वः—लोकों के साधन, गृहस्थ, वानप्रस्थ, संन्यास—तीनों आश्रमों के रक्षण, ऋक्, यजुः, साम—तीनों वेदों के स्वाध्याय तथा गार्हपत्य, आहवनीय एवं दक्षिणात्य—तीनों अग्नियों की स्थापना—इन सबसे मिलने वाला पुण्यफल प्राप्त होता है। —मेधातिथि

जन्मभूमि के समान प्रीतिदायिनी होने से पृथ्वी लोक माता, सिञ्चन कर्म वर्ष के समान सन्तुष्टि प्रदान करने से अन्तरिक्ष लोक पिता, ब्रह्म की प्राप्ति का मार्ग दिखाने से स्वर्ग लोक आचार्य हैं। द्वितीय जन्म में अधिकार दिलाने से ब्रह्मचर्याश्रम माता, भोगों की उपलब्धि कराने से गृहस्थाश्रम पिता, आध्यात्मिकता में प्रेरित करने से संन्यासाश्रम आचार्य हैं। (वानप्रस्थ आश्रम का अन्तर्भाव पत्नी के साथ होने पर गृहस्थाश्रम में एवं साथ न होने पर संन्यासाश्रम में माना गया अतः उसे नहीं कहा गया है)। देवता गुण (स्नेह) से ऋग्वेद माता, आदेश गुण (दायित्व निर्वाह) से यजुर्वेद पिता, अध्ययन गुण (उपनयन) से सामवेद आचार्य हैं। —नन्दन

आचार्यादि त्रेताग्नि स्वरूप—

पिता वै गार्हपत्योऽग्निर्माताग्निर्दक्षिणः स्मृतः।
गुरुराहवनीयस्तु साग्नित्रेता गरीयसी ॥२३१॥

अन्वय—पिता वै गार्हपत्यः अग्निः, माता दक्षिणः अग्निः गुरुः तु आहवनीयः (अग्निः) स्मृतः सा अग्नित्रेता गरीयसी।

शब्दार्थ—अग्नित्रेता—तीन अग्नियों का समूह, त्राण के लिए अभिप्राय, गरीयसी—गौरवमय।

हिन्दी अर्थ—पिता गार्हपत्यअग्नि, माता दक्षिण अग्नि और आचार्य आहवनीय अग्नि हैं, वे तीनों अग्निसमूह अथवा रक्षा निमित्त से उपलब्ध तीनों अग्नियाँ गौरवमयी हैं।

संस्कृत व्याख्या—पिता—जनकः, वै शब्दोऽवधारणे, गार्हपत्यः अग्निः—तदाख्यः पावकः, माता—जननी, दक्षिणः अग्निः—तदाख्यः अनलः, गुरुः—आचार्यः, तु आहवनीयः अग्निः—तदाख्यः ज्वालः, स्मृतः—कथितः, सा—पूर्वोक्ता, अग्नित्रेता—त्राणार्थम् इता त्रेता, त्रेता चासौ अग्निः; अग्नेः त्रयी, गरीयसी—महीयसी।

विशेष—अग्नित्रेता—गार्हपत्याग्नि—गृहपतिना नित्यं संयुक्तः होत्रादि-साधनाधानाङ्गतया च प्राग् आधेयः'। विवाहोपरान्त गृहस्थ का प्रथम कर्त्तव्य था—वृत्ताकार यज्ञवेदी में देवपूजन हेतु अग्न्याधान। ऋत्विक् निम्न ऋचा से घर्षण द्वारा अग्नि का आवाहन करता था—

'इह प्रियं प्रजया मे समृध्यताम् । अस्मिन्गृहे गार्हपत्याय जागृहि' ।।

—ऋग्वेद, १०.८५.२७

दक्षिणाग्नि—दक्षिणाग्नि—'दक्षिणोऽनुकूलोऽग्नि': अथवा 'यज्ञाग्निविशेषः' इति अमरः अथवा 'दक्षिणस्या दिशोऽग्निः ।'

—भरत

'दत्तासु दक्षिणास्वादौ तृप्तिर्भूत्वा यतोऽमरान् ।
नयसे दक्षिणाभागं दक्षिणाग्निस्ततोऽभवत्' ।।

—वराहपुराण

'अन्वाहार्यं दक्षिणाग्नावधिश्रयति' ।

—कात्यायन श्रौतसूत्र, २.५.२०

दक्षिणाग्नि को अन्वाहार्य पचन भी कहते हैं, इसकी स्थापना के लिए दक्षिण दिशा में अर्द्धवृत्ताकार वेदी बनाई जाती थी ।

आहवनीयाग्नि—'आहूयते प्रणीयते प्रक्षिप्यते वा हविरत्र' अथवा 'आहवनमर्हति—गार्हपत्याउद्धृत्य होमार्थं यः संस्क्रियते ।'

—भरत

आहवनीय अग्नि की स्थापना के लिए वर्गाकार वेदी का निर्माण किया जाता था । गार्हपत्य अग्नि की स्थापना के एक दिन पश्चात् दो अरणियों से यजमान एवं यजमानपत्नी द्वारा घर्षण से आहवनीय अग्नि का आधान करवाता था ।

उत्पत्ति रूप गुण से पिता गार्हपत्य अग्नि, परतन्त्रता रूप गुण से माता दक्षिण अग्नि, पुरुषार्थ शिक्षण रूप गुण से आचार्य आहवनीय अग्नि हैं ।   —गोविन्दराज

प्रथम उपयोगिता के कारण पिता गार्हपत्य, अल्प उपयोगिता के कारण माता दक्षिण अग्नि, बहु उपयोगिता के कारण आचार्य आहवनीय अग्नि हैं—सर्वज्ञनारायण

भोगों की उपलब्धि रूप सामान्यता से पिता गार्हपत्य अग्नि स्वरूप हैं, श्रुतिवाक्य है—'स्वदितं तोकाय तनयाय पितुं पच' । अन्न के प्रति श्रद्धा उत्पत्ति रूप सामान्यता से माता दक्षिण अग्नि स्वरूप है; श्रुति वाक्य है—'अन्नमेवास्मै श्रद्दधात' । ब्रह्मलोक में अधिकार रूप सामान्यता से गुरु आहवनीय अग्नि रूप है, श्रुतिवाक्य है ।

—'अमुष्मिन्नाहवनीय'

आचार्यादि की सेवा से लाभ—

त्रिष्वप्रमाद्यन्नेतेषु त्रींलोकान्विजयेद् गृही ।
दीप्यमानः स्ववपुषा देववद्दिवि मोदते ।।२३२।।

अन्वय—गृही ऐतेषु त्रिषु अप्रमाद्यन् त्रीन् लोकान् विजयेत् स्ववपुषा दीप्यमानः दिवि देववत् मोदते ।

शब्दार्थ—स्ववपुषा—अपनी देह से, दिवि—स्वर्ग में, मोदते—आनन्दित होता है।

हिन्दी अर्थ—गृहस्थ पुरुष इन तीनों के प्रति सावधान रहकर तीनों लोकों को जीत लेता है, अपने शरीर से कान्तिमान् होकर देवलोक में इन्द्रादि देवों के समान आनन्द का उपभोग करता है।

संस्कृत व्याख्या—गृही—गृहमस्यास्तीति गृही, गृहस्थः, एतेषु उपरिकथितेषु त्रिषु—मातापितााचार्येषु, अप्रमाद्यन्—अस्खलन्, त्रीन् लोकान्—भूर्भुवः स्वरिति लोकान्, विजयेत्—आधिपत्यं स्थापयेत, स्ववपुषा—स्वस्य वपुः तेन, निजशरीरेण, दीप्यमानः—भासमानः, दिवि—स्वर्गे, देवता—आदित्यादीनाम् अमराणां तुल्यः, मोदते—प्रसादं गच्छति।

विशेष—ब्रह्मचारी माता-पिता-आचार्य की समुचित शुश्रूषा से त्रिलोकजयी होता है। गृहस्थ पुरुष सेवा के विषय में आजीवन दत्तावधान रहे तो इन लोकों के साथ-साथ देवताओं के सामीप्य फल को तथा मुक्ति की आह्लादमयी स्थिति को प्राप्त करता है—

'त्रिणाचिकेतस्त्रयमेतद् विदित्वा, य एवं विद्वांश्चिनुते नाचिकेतम्।
स मृत्युपाशान् पुरतः प्रणोद्य, शोकातिगो मोदते स्वर्गलोके॥'

—कठोपनिषद्, १.१८

आचार्यादि की भक्ति से लोक प्राप्ति—

इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम्।
गुरुशुश्रूषया त्वेवं ब्रह्मलोकं समश्नुते॥२३३॥

अन्वय—मातृभक्त्या इमं लोकं, पितृभक्त्या तु मध्यमं (लोकं) एवं गुरुशुश्रूषया ब्रह्मलोकं समश्नुते।

शब्दार्थ—मातृभक्त्या—माँ की भक्ति से, इमं—पृथिवी को, मध्यमं—मध्यमलोक अर्थात् स्वर्ग को।

हिन्दी अर्थ—(गृहस्थ पुरुष) माँ की भक्ति से इस लोक अर्थात् पृथिवी को, पिता की भक्ति से मध्यम अर्थात् अन्तरिक्ष लोक को और आचार्य की सेवा से ब्रह्मलोक अर्थात् हिरण्यगर्भ लोक को प्राप्त करता है।

संस्कृत व्याख्या—मातृभक्त्या—मातुः मातरि वा भक्त्या, जननीसेवया; इमं—पृथिवीं, लोकं, पितृभक्त्या—पितुः पितरि वा भक्त्या, जनकाराधनया; तु, मध्यमं—स्वर्गमन्तरिक्षं वा लोकं, एवं—एवमेव, गुरुशुश्रूषया—गुरोः शुश्रूषा तया आचार्यश्रद्धया, ब्रह्मलोकं—ब्रह्मणः लोकं, हिरण्यगर्भलोकं, समश्नुते—प्राप्नोति।

विशेष—माता धारण क्षमता अथवा सहनशीला होने से धरित्री का, पिता पालनवृत्ति से प्रजापति के वासस्थान अन्तरिक्ष का एवं आचार्य वेदज्ञान-दान गुण से ब्रह्मलोक का प्रतिनिधित्व करते हैं। इनके प्रति श्रद्धा भाव रखने से मनुष्य तीनों ही लोकों में सुख को प्राप्त करता है।

आचार्यादि के आदर से सभी धर्म आदृत—

सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृताः।
अनादृतास्तु यस्यैते सर्वास्तस्याफला क्रियाः ॥२३४॥

अन्वय—यस्य एते त्रयः आदृताः तस्य सर्वे धर्माः आदृताः यस्य एते तु अनादृताः तस्य सर्वाः क्रियाः अफलाः।

शब्दार्थ—आदृताः—आदर किया, अफलाः—निष्फल।

हिन्दी अर्थ—जिस गृहस्थ पुरुष ने इन तीनों का आदर किया उसने सभी धर्मों का आदर किया, जिसने इन तीनों का अनादर किया, उसकी (श्रुतिस्मृतिविहित) सभी क्रियाएं निष्फल हुईं।

संस्कृत व्याख्या—यस्य—गृहस्थ पुरुषस्य, एते त्रयः—मातृपित्राचार्याः, आदृताः—सत्कृताः, तस्य—पुरुषस्य, सर्वे—निखिलाः, धर्माः—यमनियमादयः, आदृताः—अर्चिताः, यस्य, एते—जननीजनकाचार्याः, तु, अनादृताः—असंपूजिताः, तस्य—कृतघ्नपुरुषस्य, सर्वाः—सकलाः, क्रियाः—श्रुतिस्मृतिविहितानुष्ठानानि, अफलाः—निष्फलानि भवन्ति।

विशेष—पुरुष विशेष के सत्कार से सन्तुष्ट माता-पिता-आचार्य के आशीर्वाद से सभी बाधाएं सहज समाप्त हो जाती हैं।

आचार्यादि की आजीवन सेवा—

यावत्त्रयस्ते जीवेयुस्तावन्नान्यं समाचरेत्।
तेष्वेव नित्यं शुश्रूषां कुर्यात्प्रियहिते रतः ॥२३५॥

अन्वय—यावत् त्रयः ते जीवेयुः तावत् अन्यं न समाचरेत् तेषु एव प्रियहिते रतः नित्यं शुश्रूषां कुर्यात्।

शब्दार्थ—जीवेयुः—जीवित रहें, अन्यं—अन्य धर्म को, प्रियहिते—प्रीति और कल्याण सम्पादन में।

हिन्दी अर्थ—जब तक वे तीनों जीवित रहें तब तक अन्य धर्म को (स्वेच्छा से) न करे, उनके ही प्रिय एवं सुखकर कार्यों में व्यस्त रहता हुआ (उनकी) नित्य सेवा करे।

संस्कृत व्याख्या—यावत्—यावत्कालपर्यन्तं, त्रयः ते—मातापित्राचार्याः, जीवेयुः—प्राणान्धारयेयुः, तावत्—तावत्क्षणपर्यन्तं, अन्यं—इतरं धर्मं (स्ववर्णाश्रमाननुरूपं), न, समाचरेत्—स्वीक्रियेत्, तेषु—त्रिषु, एव प्रियहिते—प्रियं च हितं च तस्मिन्, प्रीतिसौख्यसम्पादने, रतः—संलग्नः, नित्यं—आजीवनं, शुश्रूषां—सेवां, कुर्यात्—धारयेत् ।

विशेष—माता-पिता-आचार्य की अनुमति से अन्य धर्म का समाचरण सम्भव है किन्तु अनुमति न होने पर स्व-इच्छा होते हुए भी अन्य धर्म को व्यवहार में न लाये । औषधि-पान के सम्मान ज्येष्ठानुकूल आचरण अनुष्ठान काल में दुःसाध्य हो सकता है किन्तु परिणाम निश्चय ही सुखदायी होगा । इस दृष्टि से हित शब्द का प्रयोग सार्थक है । जो भविष्य में इष्ट सिद्धि का माध्यम बने ।—'आयत्यामिष्टसाधनम् ।'

आचार्यादि के प्रति समग्र कर्म निवेदित—

तेषामनुपरोधेन पारत्र्यं यद्यदाचरेत् ।
तत्तन्निवेदयेत्तेभ्यो मनोवचनकर्मभिः ॥२३६॥

अन्वय—तेषाम् अनुपरोधेन मनोवचनकर्मभिः यत् यत् पारत्र्यम् आचरेत् तत् तत् तेभ्यः निवेदयेत् ।

शब्दार्थ—अनुपरोधेन—अनुमति अथवा विरोध के बिना, पारत्र्यं—परलोक के फल से सम्बन्ध रखने वाला ।

हिन्दी अर्थ—उनकी अनुज्ञा के बिना मन, वचन तथा कर्म से जो-जो पारलौकिक कर्म करे उसे उन्हीं के लिए समर्पित कर दे ।

संस्कृत व्याख्या—तेषां—जननीजनकाचार्याणां, अनुपरोधेन—न उपरोधः तेन, अनाज्ञप्तेन, मनोवचनकर्मभिः—मनश्च वचनं च कर्म च तैः, चित्तवाक्क्रियाकलापैः; यत् यत्, पारत्र्यं—परत्र भावं पारत्र्यं, पारलौकिक कर्मानुष्ठानं; आचरेत्—अर्जेत्, तत् तत्, तेभ्यः—मातृपित्राचार्येभ्यः, निवेदयेत्—मयानुष्ठितमिति समर्पयेत् ।

विशेष—निवेदयेत्—उन्हें सूचित कर दे अथवा उचित तो यह है कि अनुष्ठानजन्य पुण्यफल उन्हें समर्पित कर दे । महाभारत में कहा गया है—

'यत्किञ्चित्कर्मसंयुक्तमाचरामि युधिष्ठिर ।
मातापित्रोर्गुरोश्चैव तत्सर्वं विसृजाम्यहम् ॥'

आचार्यादि की सेवा परं धर्म—

त्रिष्वेतेष्विति कृत्यं हि पुरुषस्य समाप्यते ।
एष धर्मः परः साक्षादुपधर्मोऽन्य उच्यते ॥२३७॥

अन्वय—हि एतेषु त्रिषु पुरुषस्य इतिकृत्यं समाप्यते, एषः साक्षात् परः धर्मः अन्यः उपधर्मः उच्यते।

शब्दार्थ—इतिकृत्यं—कर्त्तव्यसमाप्ति अथवा पुरुषार्थप्राप्ति, उपधर्म—गौण धर्म।

हिन्दी अर्थ—इन तीनों की सेवा में पुरुष की इतिकर्त्तव्यता अर्थात् कर्त्तव्य की समाप्ति हो जाती है यही साक्षात् परम धर्म है अन्य (अग्निहोत्रानुष्ठानादि) धर्म गौणधर्म कहे गए हैं।

संस्कृत व्याख्या—हि—यतः, एतेषु त्रिषु—जननीजनकाचार्येषु, पुरुषस्य—सद्गृहस्थस्य, इतिकृत्यं—श्रौतस्मार्तकर्त्तव्यकार्त्स्न्यं, समाप्यते—परिपूर्यते एषः शुश्रूषारूपः, साक्षात्—पुरुषार्थसाधनत्वात्, परः धर्मः—सर्वोत्कृष्टः धर्मः, अन्यः—अवशिष्टः स्वर्गसाधनत्वात्, उपधर्मः—गौणधर्मः, उच्यते—आख्यायते।

विशेष—माता-पिता-आचार्य का प्रियसम्पादन नृपस्थानीय तथा यज्ञानुष्ठान आदि प्रतिहारस्थानीय है, अतः उनको पर्याप्त सेवा से प्रसन्न रखना चाहिए।

विद्या, धर्म, आदि की ग्राह्यता—

श्रद्दधानः शुभां विद्यामाददीतावरादपि।
अन्त्यादपि परं धर्मं स्त्रीरत्नं दुष्कुलादपि ॥२३८॥

अन्वय—श्रद्दधानः शुभां विद्याम् अवरात् अपि आददीत अन्त्यात् अपि परं धर्मं, दुष्कुलात् अपि स्त्रीरत्नं (आददीत)।

शब्दार्थ—शुभां—श्रेष्ठ, अवरात्—शूद्र से, दुष्कुलात्—कलंकित कुल से।

हिन्दी अर्थ—श्रद्धाभाव से युक्त पुरुष श्रेष्ठ (गारुड आदि) विद्या को निकृष्ट जाति (के पुरुष) से भी ग्रहण कर ले, चाण्डाल से भी उत्कृष्ट धर्म तथा दूषित कुल से भी स्त्रीरत्न अर्थात् श्रेष्ठ स्त्री को स्वीकार कर ले।

संस्कृत व्याख्या—श्रद्दधानः—श्रद्धावान्, शुभां—श्रेष्ठां, विद्यां—गारुडादिविद्यां, अवरात्—अधमवर्णपुरुषात्, अपि, आददीत—गृह्णीत, अन्त्यात्—चाण्डालात्, अपि, परं—सर्वोत्कृष्टं, धर्मं—व्यवस्थादिकं, दुष्कुलात्—दुष्टं कुलं तस्मात् शूद्रवर्णवंशात्, अपि, स्त्रीरत्नं—स्त्री रत्नमिव इति, नारीरत्नं (आददीत)।

विशेष—श्रद्दधानः—'श्रद्धावांल्लभते ज्ञानम्।' अतः सभी वर्णों के व्यक्ति वर्ण धर्म का पालन न करने वाले पुरुष से भी व्यावहारिक ज्ञान ग्रहण कर, उसके प्रति सदैव श्रद्धावान् रहे। —श्रीमद्भगवद्गीता २.३९

शुभां विद्यां—दार्शनिक भावना से युक्त अन्तःकरण वाला शिष्य दर्शन-शास्त्र (सांख्य, न्याय, मीमांसा) को, आस्तिक भावना से युक्त अन्तःकरण वाला शिष्य विशदकाव्य (रामायण, महाभारत, पुराण) को तथा साहित्यिक भावना से युक्त अन्तःकरण वाला शिष्य नाट्यशास्त्र को, व्यावहारिक भावना से युक्त अन्तःकरण वाला शिष्य मन्त्रविद्या को हीन जाति के पुरुष से भी सीख सकता है।

—मेधातिथि

गारुड विद्या—साँपों का विष उतारने का मन्त्र अथवा ऐसी विद्या जिसके परिणाम की अनेक बार परीक्षा हो चुकी हो। —कुल्लूकभट्ट

परं धर्म—श्रुतिस्मृति की अपेक्षा न रखने वाला उत्कृष्ट लौकिक धर्म अथवा धर्म शब्द व्यवस्था अर्थ में भी प्रयुक्त होता है। वेदानुशीलन चाण्डाल के वश का नहीं, ऐसी स्थिति में उससे (परं धर्म) मोक्ष ज्ञान की आशा करना व्यर्थ है। किन्तु यदि अन्त्य अर्थात् चाण्डाल पुरुष कहे कि इस स्थान पर अधिक देर रुकना अथवा इस जल में स्नान करना उचित नहीं है तो उस व्यावहारिक ज्ञान को मान लेना चाहिए। यह नहीं सोचना चाहिए कि यह तो चाण्डाल है मैं इसका आदेश क्यों मानूँ ?

अमृता आदि की ग्राह्यता—

विषादप्यमृतं ग्राह्यं बालादपि सुभाषितम्।
अमित्रादपि सद्वृत्तममेध्यादपि काञ्चनम्॥२३९॥

अन्वय—विषात् अपि अमृतं ग्राह्यं, बालात् अपि सुभाषितं (ग्राह्यं) अमित्राद् अपि सद्वृत्तं (ग्राह्यं) अमेध्यात् अपि काञ्चनं (ग्राह्यं)।

शब्दार्थ—सुभाषितं—सुन्दर उक्ति को, सद्वृत्तं—उत्तम आचरण, अमेध्यात्—अपवित्र से।

हिन्दी अर्थ—विष से भी अमृत को, बालक से भी सुक्ति को, शत्रु से भी सदाचार को, अपवित्र (स्थान) से भी सुवर्ण को ग्रहण कर लेना चाहिए।

संस्कृत व्याख्या—विषात्—हलाहलात्, अपि, अमृतं—पीयूषं, ग्राह्यं—ग्रहणीयं, बालात्—बालकात्, अपि, सुभाषितं—हितकारिवचनं, ग्राह्यं, अमित्रात्—न मित्रं तस्मात् शत्रोः, अपि, सद्वृत्तं, सतां वृत्तं शिष्टाचारं, ग्राह्यं, अमेध्यात्—न मेध्यं तस्मात्, अपवित्रस्थानात्, अपि, काञ्चनं—सुवर्णं, ग्राह्यं।

विशेष—विष से अमृत 'ओषधि' रूप में, बालक से सुभाषित, 'कल्याण वचन' रूप में, शत्रु से सदाचार 'नीति' रूप में तथा 'अपवित्रता' से सोना 'मूल्यवान्' रूप में ग्रण कर लेना चाहिए।

श्रद्दधानः शुभां विद्यां हीनादपि समाप्नुयात् ।
सुवर्णमपि चामेध्यादाददीताविचारयन् ।।'

—महाभारत, शांतिपर्व १६.५.३१

लोकजित् उद्गाता का यही रहस्य है कि वह असत् से सत् की ओर, अन्धकार से प्रकाश की ओर, मृत्यु से अमरत्व की ओर जाने की इच्छा करता है—

'असतो मा सद् गमय, तमसो मा ज्योतिर्गमय, मृत्योर्माऽमृतं गमय'

—बृहदारण्यक उपनिषद्, १.३.२८

समग्र वस्तुओं की ग्राह्यता—

स्त्रियो रत्नान्यथो विद्या धर्मः शौचं सुभाषितम् ।
विविधानि च शिल्पानि समादेयानि सर्वतः ।।२४०।।

अन्वय—अथ उ स्त्रियः रत्नानि विद्या धर्मः शौचं सुभाषितं विविधानि शिल्पानि सर्वतः समादेयानि ।

शब्दार्थ—शौच—शुद्धता, शिल्प—कला-कौशल, समादेयानि—ग्रहण योग्य ।

हिन्दी अर्थ—स्त्रियाँ, रत्न, विद्या, धर्म, पवित्रता, सुभाषित, तथा अनेक प्रकार के शिल्प (कला-कौशल आदि) सब ओर ग्रहण करने योग्य है ।

संस्कृत व्याख्या—अथ उ स्त्रियः—नार्यः, रत्नानि—मणिमाणिक्यहीरकादीनि, विद्या—ज्ञानं, धर्मः—धर्मतत्त्वं, शौचं—शुद्धत्वं, सुभाषितं—माङ्गलिकवचनं, विविधानि—अनेकप्रकाराणि, शिल्पानि—कलाकौशलादीनि, सर्वतः—दिक्देश जातिवर्गविशेषमनपेक्ष्य सर्वस्मात्, समादेयानि—स्वीकर्त्तव्यानि ।

विशेष—स्त्रियः रत्नानि—ब्युहलर का कथन है कि यह एक साथ अन्वित पद है तब इसका अर्थ है । स्त्रियाँ जो रत्नवत् श्रेष्ठ हैं—excellent wives.

इस विषय में कहा गया है सोम से पवित्रता, गन्धर्वों से शुभ वाणी व अग्नि से सर्वमेध्यता अर्जित करने के कारण स्त्रियाँ सदा पवित्र हैं—

सोमः शौचं ददौ तासां गन्धर्वाश्च शुभां गिरम् ।
पावकः सर्वमेध्यत्वं मेध्या वै योषितः सदा ।।'

अब्राह्मण से विद्याध्ययन—

अब्राह्मणादध्ययनमापत्काले विधीयते ।
अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरो ।।२४१।।

अन्वय—आपत्काले अब्राह्मणात् अध्ययनं विधीयते, गुरोः अनुव्रज्या शुश्रूषा च यावत् अध्ययनं । (तावत् कुर्यात्) ।

शब्दार्थ—आपत्काले—ब्राह्मण अध्यापक न मिलने पर, विधीयते—विधान है, अनुव्रज्या—अनुगमन।

हिन्दी अर्थ—आपत्ति काल में (ब्राह्मण गुरु के अभाव में) अब्राह्मण से अध्ययन शास्त्रानुमोदित है, (किन्तु अब्राह्मण) गुरु का अनुगमन एवं शुश्रुषा (चरण स्पर्श, प्रक्षालन आदि) जब तक पढ़े (तब तक ही करनी चाहिए)।

संस्कृत व्याख्या—आपत्काले—आपदः कालः तस्मिन्, संकटकाले; ब्राह्मणाचार्याभावे, अब्राह्मणात्—न ब्राह्मणः तस्मात्, क्षत्रियात् वैश्याद्वा:, अध्ययनं—विद्याग्रहणं, विधीयते—उपदिश्यते, गुरोः—शिक्षकस्य अनुव्रज्या—अनुव्रजितुं योग्या अनुगमनादिरूपाः, शुश्रूषा—पादवन्दनोच्छिष्टभक्षणादिकः, च, यावत्—यावत्कालपर्यन्तं, अध्ययनं—शिक्षाग्रहणं तावदेव कर्त्तव्या।

विशेष—आपत्काले—(१) आचार्य अन्य देश को प्रस्थान कर गया हो, (२) योग्य अध्यापक का अभाव हो, (३) माणवक शिक्षा योग्य स्थान गमन में असमर्थ हो। —मेधातिथि

अब्राह्मणात्—ब्राह्मण अध्यापक के अभाव में क्षत्रिय तथा क्षत्रिय के अभाव में वैश्य से शिक्षा ग्रहण करे। इस विषय में एक सिद्धान्त प्राप्त है कि ब्राह्मण द्वारा प्रेरित किए जाने पर ही क्षत्रिय अथवा वैश्य शिक्षा दान करें स्वेच्छा से नहीं—

'अध्यापनं तु क्षत्रियवैश्ययोर्ब्राह्मणप्रेरितयोर्भवति न स्वेच्छया।'

—याज्ञवल्क्य स्मृति, १.११८

अध्ययन—अध्यापन में अधिकार न होने से शूद्र गुरु नहीं हो सकता है।

गुरु—गुरुत्व का निर्णय करते हुए महर्षि व्यास कहते हैं कि अध्ययन काल तक क्षत्रिय का सम्मान विप्र द्वारा किया जाएगा, अध्ययन के पश्चात् ब्राह्मण पुनः गुरु रूप में स्मृत होगा—

'मन्त्रदः क्षत्रियो विप्रैः शुश्रूषानुगमादिना।
प्राप्तविद्यो ब्राह्मणस्तु पुनस्तस्य गुरुः स्मृतः॥'

—व्यास स्मृति, १३५

आत्यन्तिक वास का निषेध—

नाब्राह्मणे गुरौ शिष्यो वासमात्यन्तिकं वसेत्।
ब्राह्मणे चाननूचाने काङ्क्षन्गतिमनुत्तमाम्॥२४२॥

अन्वय—शिष्यः अनुत्तमां गतिं काङ्क्षन् अब्राह्मणे गुरौ अननूचाने ब्राह्मणे च आत्यन्तिकं वासं न वसेत्।

शब्दार्थ—अनुत्तमां—सर्वोत्तम मोक्षरूप, अननूचाने—(१) अङ्गोपाङ्ग सहित वेद को न पढ़ने वाला, (२) वेद के व्याख्यान में असमर्थ, (३) विद्या अरसिक।

हिन्दी अर्थ—शिष्य सर्वोत्तम अर्थात् मोक्षरूप गति को अभिलाषा करता हुआ अब्राह्मण गुरु के समीप अथवा साङ्गवेदाध्ययन से रहित ब्राह्मण गुरु के समीप आत्यन्तिक वास अर्थात् आजीवन ब्रह्मचर्य हेतु निवास न करे।

संस्कृत व्याख्या—शिष्यः—शास्तुं योग्यः जिज्ञासु छात्रः, अनुत्तमां—न उत्तमः यस्याः सा ताम्, अतुलनीयां, मोक्षप्रापकां, गतिं—स्थितिं,—काङ्क्षन्—अभिलषन्—अब्राह्मण—क्षत्रियवैश्ये, अननूचाने—न अनूचानः तस्मिन्, साङ्गवेदज्ञानरहिते, ब्राह्मणे—विप्रे, च, आत्यन्तिकं—यावज्जीवं ब्रह्मचर्यं पालयन्, वासं—निवासं, न, वसेत—कुर्यात्।

विशेष—आचार्य की कतिपय विशेषताओं की गणना शास्त्रों में इस प्रकार है—

'वृद्धा ह्यलोलुपाश्चैव आत्मवन्तो ह्यदम्भकाः।
सम्यग्विनीता ऋजवस्तानाचार्यान् प्रचक्षते॥'

—वायुपुराण १.५९.३९

वृद्ध, निर्लोभी, गम्भीर, विनम्र एवं सरलस्वभाव होने के अतिरिक्त सत्यवाक्, धृतिमान्, दक्ष, दयालु, आस्तिक, वेदज्ञ व पवित्र व्यक्ति ही आचार्यत्व के योग्य है—

'सत्यवाक् धृतिमान् दक्षः सर्वभूतदयापरः।
आस्तिको वेदनिरतः शुचिराचार्य उच्यते॥'

—वीरमित्रोदय संस्कार प्रकाश, पृष्ठ ४०८

आत्यन्तिक वास में गुरुसेवा—

यदि त्वात्यन्तिकं वासं रोचयेत गुरोः कुले।
युक्तः परिचरेदेनमाशरीरविमोक्षणात्॥२४३॥

अन्वय—यदि तु गुरोः कुले आत्यन्तिकं वासं रोचयेत् (तदा) आशरीरविमोक्षणात् युक्तः एनं परिचरेत्।

शब्दार्थ—आत्यन्तिकं—अत्यधिक, आजीवन, आशरीरविमोक्षणात्—शरीर से मुक्ति तक, मृत्यु काल तक।

हिन्दी अर्थ—यदि गुरु के कुल में आत्यन्तिक वास (आजीवन नैष्ठिक ब्रह्मचर्य रक्षण) की इच्छा हो तो शरीर छूटने (मृत्यु) तक यत्नपूर्वक इनकी (गुरु) की सेवा करे।

संस्कृत व्याख्या—यदि—चेत्, तु, गुरोः—आचार्यस्य, कुले—आश्रमे, आत्यन्तिकं—आजीवनं ब्रह्मचर्यं पालयन् (नैष्ठिक-ब्रह्मचर्यं, वासं—निवासं, रोचयेत्—अभिलषेत्, तदा, आशरीरविमोक्षणात्—शरीरस्य विमोक्षणं, शरीरविमोक्षणं, तम् अभिव्याप्य, देहत्यागावधेः; युक्तः—सयत्नः, एनं—गुरुं, परिचरेत्—शुश्रूषेत।

विशेष—गुरोः कुले—आचार्य का गृह जहाँ किसी सामाजिक वैषम्य के बिना विद्यार्थी अध्ययन कार्य-करते थे।

आत्यन्तिकं वासम्—ब्रह्मचर्य की समाप्ति काल में विद्यार्थी को जीवन के दो मार्गों—उपकुर्वाण व नैष्ठिक—में से एक का चयन करना पड़ता था। प्रथम प्रवृत्ति मार्ग में विवाह कर, समग्र दायित्व ग्रहण करते हुए व्यस्त सांसारिक जीवन में प्रवेश तथा निवृत्ति मार्ग में सांसारिक बन्धनों से मुक्त रहकर मानसिक एवं शारीरिक तपश्चर्या पूर्ण जीवन व्यतीत करना। 'निष्ठां वेदगच्छतीति इतरस्तूपकुर्वाणक उच्यते। अध्ययनार्थं शुश्रूणाकरणं प्रवृत्तत्वात्।' —हारीतस्मृति

'आत्मानं निष्ठाम् उत्क्रान्तिकालं नयतीति नैष्ठिकः।'

—मिताक्षरा, याज्ञवल्क्य स्मृति, १.४९

ब्रह्मचारी बनकर अपने को तपस्या से क्षीण करते हुए, आचार्यकुल में रहना-यह धर्मरूपी वृक्ष की ब्रह्मचर्यरूपी तीसरी डाल है—'त्रयो धर्मस्कन्धा—ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन्।'

—छान्दोग्य उपनिषद्, २.२३.१

शारीरिक दृष्टि से अपंग, कुबु, वामन, रोगी इत्यादि समावर्तन के अभाव में आजीवन ब्रह्मचारी रहते थे क्योंकि विवाह उनके लिए सम्भव नहीं था (परन्तु समृद्धिशाली होने पर इसके अपवाद भी उपलब्ध थे यथा—धृतराष्ट्र)।

'कुब्जवामनजात्यन्धक्लीबपङ्ग्वार्तरोगिणाम्।
व्रतचर्या भवेत्तेषां यावज्जीवमनंशतः॥'

—संस्कार मयूख, पृष्ठ ६२

आत्यन्तिक वास से ब्रह्मलोक प्राप्ति—

आसमाप्तेः शरीरस्य यस्तु शुश्रूषते गुरुम्।
स गच्छत्यञ्जसा विप्रो ब्रह्मणः सद्म शाश्वतम्॥२४५॥

अन्वय—यः तु शरीरस्य आ समाप्तेः गुरुं शुश्रूषते सः विप्रः ब्रह्मणः शाश्वतं सद्म अञ्जसा गच्छति।

शब्दार्थ—शाश्वतं—चिरन्तन, सद्म-गृह, लोक, अञ्जसा—शीघ्र।

हिन्दी अर्थ—जो नैष्ठिक ब्रह्मचारी देहत्याग की अवधि तक गुरु की सेवा करता है वह परमात्मा के चिरन्तन धाम रूप अविनश्वर पद को शीघ्र ही प्राप्त करता है।

संस्कृत व्याख्या—यः नैष्ठिक ब्रह्मचारी, तु, शरीरस्य—देहस्य, आसमाप्तेः—परित्यागपर्यन्तं, गुरुं—आचार्यं, शुश्रूषते—परिचरति, सः—वटुषः, ब्रह्मणः—

परमात्मनः, शाश्वतं—अविनश्वरं, सद्म—स्थानं, अञ्जसा—झटित्येव, गच्छति—प्राप्नोति ।

विशेष—अञ्जसा—अक्लिष्ट मार्ग जहाँ मध्य में मनुष्य, पक्षी, प्रेतयोनि इत्यादि की बाधा न हो । —मेधातिथि

स्पष्ट मार्ग, जो अन्य गतियों से अव्यवहित हो । —गोविन्दराज

नैष्ठिक ब्रह्मचारी अपने व्रत से च्युत हो जाए तो उसके लिए कोई प्रायश्चित्त नहीं है । —आत्रेय धर्मशास्त्र, ८.१८

गुरुदक्षिणा विधि—

न पूर्वं गुरवे किञ्चिदुपकुर्वीत धर्मवित् ।
स्नास्यंस्तु गुरुणाऽऽज्ञप्तः शक्त्या गुर्वर्थमाहरेत् ॥२४५॥

अन्वय—धर्मवित् पूर्वं गुरवे किञ्चित् न उपकुर्वीत, स्नास्यन् तु गुरुणा आज्ञप्तः शक्त्या गुर्वर्थम् आहरेत् ।

शब्दार्थ—उपकुर्वीत—उपकार करे, स्नास्यन्—समावर्तन स्नान करता हुआ, आज्ञप्तः—आज्ञा प्राप्त ।

हिन्दी अर्थ—धर्मवेत्ता ब्रह्मचारी (समावर्तन संस्कार से) पहले गुरु के (सेवा के अतिरिक्त दक्षिणा उपहार आदि) कुछ उपकार न करे, (समावर्तन) स्नान के लिए गुरु से आज्ञा लेकर सामर्थ्यानुसार गुरु के लिए (उपहार आदि) लाए ।

संस्कृत व्याख्या—धर्मवित्—धर्मं वेत्तीति, धर्मज्ञः, ब्रह्मचारी, पूर्वं—विद्याग्रहणकाले, समावर्तनस्नानात्पूर्वमित्यर्थः, गुरवे—आचार्याय, किञ्चित्—गोवस्त्रसुवर्णादिकं, न, उपकुर्वीत—दद्यात्, स्नास्यन्—विद्यासमाप्तिकाले समावर्तनस्नानमाचरिष्यन्, तु, गुरुणा—आचार्येण, आज्ञप्तः—आदिष्टः, शक्त्या—सामर्थ्यानुसारं गुर्वर्थं—गुरोः अर्थं, आहरेत्—आनयेत् ।

विशेष—महर्षि याज्ञवल्क्य से विदेहराज जनक ने कहा—मैं आपको सहस्र गाएँ और हाथी के समान बैल भेंट करता हूँ । याज्ञवल्क्य ने कहा, नहीं, मेरे पिता का यह आदेश है कि जब तक उपदेश पूर्ण न हो तब तक भेंट न ले—'हस्त्यृषभं सहस्रं ददामीति होवाच, जनको वैदेहः । स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ।' —बृहदारण्यकोपनिषद् ४.१.२

अध्यापन काल में वेतन लेने वाला गुरु भृतक अध्यापक कहा जाता है । विद्या के अन्त में शिष्य को गुरु से धन अथवा अन्य भौतिक सामग्री लेने की प्रार्थना करनी चाहिए, गुरु आज्ञापित कर दे अथवा बिना कुछ लिये जाने को कह दे तब शिष्य को स्नान करना चाहिए—'विद्यान्ते गुरुमर्थेन निमन्त्र्य कृत्वाऽनुज्ञातस्य वा स्नानम्' । —आश्वलायन गृह्यसूत्र, ३.९.४

दक्षिणा योग्य सामग्री—

क्षेत्रं हिरण्यं गामश्वं छत्रोपानहमासनम् ।
धान्यं शाकं च वासांसि गुरवे प्रीतिमावहेत् ॥२४६॥

अन्वय—उपकुर्वाण ब्रह्मचारी क्षेत्रं हिरण्यं गाम् अश्वं छात्रोपानहम् आसनं धान्यं शाकं वासांसि च (शक्त्या गुर्वर्थमाहरेत्, एवं) गुरवे प्रीतिम् आवहेत् ।

शब्दार्थ—उपानह—जूता, आवहेत्—प्राप्त करे ।

हिन्दी अर्थ—उपकुर्वाण ब्रह्मचारी कृषियोग्य भूमि, सुवर्ण, गौ, अश्व, छाता, जूता, आसन, अन्न, शाक और वस्त्र (सामर्थ्यानुसार गुरु के लिए लाए, इस प्रकार) गुरु के लिए प्रसन्नता को लाए ।

संस्कृत व्याख्या—उपकुर्वाणब्रह्मचारी, क्षेत्रं—कृषिभूमिं, हिरण्यं—कञ्चनं, गां—धेनुं, अश्वं—वाजिनं, छत्रोपानहं—छत्रं च उपानत् च, अनयोः समाहारः; आतपत्र-पादुकां; आसनं—कुशोर्णनिर्मितकटं, धान्यं—अन्नादिकं, शाकं—भोजन-व्यञ्जनादिकं, वासांसि—वस्त्राणि, च, शक्त्या गुर्वर्थमाहरेत् एवं, गुरवे—आचार्याय, प्रीतिं—प्रसन्नतां स्नेहं वा, आवहेत्—उत्पादयेत् ।

विशेष—यदि गुरु एक अक्षर भी शिष्य को पढ़ा दे तो सम्पूर्ण पृथ्वी का द्रव्य देकर भी उस ऋण से उऋण नहीं हुआ जा सकता है—

'एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत् ।
पृथिव्या नास्ति तद् द्रव्यं, यद् दत्वा चानृणी भवेत्' ॥

—लघुहारीत

वस्तुतः शिष्य के कार्यों एवं व्यवहार से प्राप्त प्रसन्नता ही वास्तविक गुरु दक्षिणा है—'दक्षिणा परितोषो वै गुरुणां सद्भिरुच्यते'—महाभारत, आश्वमेधिक पर्व, ५६.२१ । महर्षि दयानन्द ने गुरु विरजानन्द को दक्षिणास्वरूप मात्र एक मुट्ठी लौंग देकर, सुगन्धित जीवनचर्या का आशीर्वाद प्राप्त किया था । 'शक्त्या' पद सब कुछ देने का विधान नहीं करता है, यथा गुरु के आदेश से स्त्री नहीं देनी चाहिए ।

आचार्य के अभाव में गुरु के समान सम्मान्य जन—

आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते ।
गुरुदारे सपिण्डे वा गुरुवद् वृत्तिमाचरेत् ॥२४७॥

अन्वय—नैष्ठिकब्रह्मचारी आचार्ये तु खलु प्रेते गुणान्विते गुरुपुत्रे गुरुदारे (वा) सपिण्डे वा गुरुवत् वृत्तिम् आचरेत् ।

शब्दार्थ—प्रेते—मृत्यु के पश्चात्, गुणान्विते—गुणसम्पन्न।

हिन्दी अर्थ—नैष्ठिक ब्रह्मचारी आचार्य के मृत्यु को प्राप्त हो जाने पर गुणवान्—गुरुपुत्र—में, गुरुपत्नी में अथवा सपिण्ड (चाचा, मामा आदि बान्धवों) में गुरु के समान आचरण करे।

संस्कृत व्याख्या—नैष्ठिक ब्रह्मचारी, आचार्ये—गुरौ, तु खलु प्रेते—मृते, गुणान्विते—गुणैः अन्वितः तस्मिन्, शिक्षणादिगुणयुक्ते; गुरुपुत्रे—गुरोः पुत्रः तस्मिन् आचार्यसुते; तदभावे, गुरुदारे—गुरोः दारः तस्मिन्, आचार्याणां; तदभावे, सपिण्डे—पितृव्यमातुलादौ बान्धवे, वा, गुरुवत्—आचार्यसमं, वृत्तिं—शुश्रूषाभैक्षार्पणादिकं व्यवहारं, आचरेत्—अनुतिष्ठेत्।

विशेष—यदि वे शिक्षणकार्य इत्यादि में समर्थ नहीं हैं तो गुरु तुल्य सम्मान के अधिकारी भी नहीं है।

सम्मान्यों के क्रमशः अभाव में कर्त्तव्य—

एतेष्वविद्यमानेषु स्नानासनविहारवान्।
प्रयुञ्जानोऽग्निशुश्रूषां साधयेद् देहमात्मनः ॥२४८॥

अन्वय—एतेषु अविद्यमानेषु स्नानासनविहारवान् शुश्रूषां प्रयुञ्जानः आत्मनः देहं साधयेत्।

शब्दार्थ—अविद्यमानेषु—अविद्यमान न रहने पर, प्रयुञ्जानः—प्रयुक्त करता हुआ।

हिन्दी अर्थ—इनके न रहने पर स्नान, आसन और भ्रमण से युक्त (नैष्ठिक ब्रह्मचारी) अग्नि की परिचर्या (यज्ञभूमि लेपन प्रकृष्ट रूप से अग्नि होमादि) करता हुआ अपनी देह को सार्थक करे।

संस्कृत व्याख्या—एतेषु—पूर्वकथितेषु, गुरुसुतदारा—सपिण्डेषु, अविद्यमानेषु—अनुपलब्धेषु, स्नानासनविहारवान्—स्नानं च आसनं च विहारः च तद्वान्, मज्जनानदेशाटनशीलः; अग्निशुश्रूषां—अग्नेः शुश्रूषा तां, अग्निपरिचर्यां, समिद्धोममित्यर्थः; प्रयुञ्जान—विधिवत्कुर्वन्, आत्मनः—निजस्य, देहं—शरीरं, साधयेत्—मुक्त्यर्थं समर्पयेत्।

विशेष—स्नानासनविहारवान—कुल्लूकभट्ट के अतिरिक्त सभी टीकाकारों ने 'स्थानासनविहारवान्' पाठ ग्रहण किया है।

साधयेत्—ब्युहलर के अनुसार 'साधयेत्' का अर्थ है—'समापयेत्'—Finish his life।

ब्रह्मचर्य के मर्यादापूर्ण पालन से मोक्ष प्राप्ति—

एवं चरति यो विप्रो ब्रह्मचर्यमविप्लुतः ।
स गच्छत्युत्तमस्थानं न चेहाजायते पुनः ॥२४९॥

अन्वय—य विप्रः अविप्लुतः एवं ब्रह्मचर्यं चरति स उत्तमस्थानं गच्छति, इह च पुनः न जायते ।

शब्दार्थ—अविप्लुतः—अखण्डित ब्रह्मचर्य, उत्तमस्थानं—मोक्ष को ।

हिन्दी अर्थ—जो ब्राह्मण इस प्रकार अखण्डित ब्रह्मचर्य का पालन करता है वह उत्तम लोक (मोक्ष) को प्राप्त करता है और इस संसार में पुनः उत्पन्न नहीं होता है ।

संस्कृत व्याख्या—यः—पूर्वोक्तः, विप्रः—द्विजः, अविप्लुतः—अखण्डितः, एवं—इत्थं, ब्रह्मचर्यं—नैष्ठिकब्रह्मचर्यव्रतं, चरति—पालयति, सः—वटुः, उत्तमस्थानं—उत्तमं च यत् स्थानं, ब्रह्मलोकं मोक्षदं वा, गच्छति—प्राप्नोति, इह—अस्मिन्, च, पुनः—मृत्योरनन्तरं, न, जानते—उत्पद्यते, पुनरागमनं न भवतीति ।

विशेष—स्मृति में कहा गया है कि वे सब प्रलय वेला में ब्रह्म के साथ विचरण करते हैं तथा परब्रह्म के साक्षात्कार से परम पद में प्रविष्ट होते हैं ।

'ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे ।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् ॥'